21. The Kauśikasūtra of Atharvaveda : Ed. M. Bloomfield. Delhi : Motilal Banarasidass. 1972 (rpt.) (1st ed.- 1889)
22. Macdonell, A.A., History of Sanskrit Literature, 1899, rpt., Delhi, Motilal Banarsidass, 1971.
23. Macdonell, A.A. and Keith, A.B., Vedic Index of Names and Subjects, 1912, rpt., Delhi: Motilal Banarsidass, 1982.
24. Maitrāyaṇī Saṁhitā : Ed. Pt. Sripada Damodar Satvalekar. Paradi : Svadhyaya Mandala, 1942.
25. Majumdar, R.C., Corporate Life in Ancient India, Calcutta: Calcutta University, 2nd rev. edn., 1922.
26. Monier-williams, Sir Monier, A Sanskrit-English Dictionary, Oxford 1899, 9th rpt., Delhi: Motilal Banarsidass, 1986.
27. Mukhopadhyay, Bandana, Life in Ancient India (Based on Dhammapada: Aṭṭhakathā) Calcutta: Sanskrit Pustak Bhandar, 1996.
28. Paňcaviṃśa-Brāhmaṇa : Trans. Eng. W. Caland. Kolkata : The Asiatic Society, 1982 (rpt) (1st ed. -1931)
29. Principal Upaniṣads, tr. S. Radhakrishnan, Centenary edn., Oxford, 1953, Delhi: Oxford University Press, 1989.
30. Ṛgveda Saṃhitā, with comm. of Sāyaṇa, N.S. Sontakke,5 vols: vol. I 1933, 2nd edn., 1972; vol. II, 1936, 3rd edn., 1984; vol. III, 1941, 3rd edn., 1984; vol. IV, 1946, 2nd edn., 1983; vol. V, 1951, Pune: Vaidika Samsodhana Mandala.
31. Ṛgveda Saṃhitā, R.T.H. Griffith, Hymns of the Rigveda, The Chowkhamba Sanskrit Series No. 35, Vol. I-II, Varanasi: Chowkhamba Sanskrit Series Office, 5th edn., 1971.
32. Ṛgveda Saṃhitā, Ramesh Chandra Dutta, Vol. I-II, Calcutta: Haraf Prakashn, 1976, 2nd edn., 1987.
33. Sāmaveda Saṃhitā, ed. with Sāyaṇa,s comm.. Acarya Satyavrata Samashrami, Bibliotheca Indica Series No. 218, 224, 235, 244, 251, 270,

280, 285-286, 293, Vol. I-V, Calcutta: The Asiatic Society of Bengal, 1874-78.
34. Sāṅkhāyanāraṇyaka : Ed. Shridhara Shastri Pathak. Poona : Anandashram, 1987. (Anandashram Sanskrit Series No. 90)
35. Śatapatha Brāhmaṇa, ed. with comm. of Sāyaṇa and Harisvāmin, 5 vils., Delhi: Gian Publishing House, 1987.
36. Taittirīya Brāhmaṇa : Ed. with Sāyaṇa's commentary. N.S. Godbole. [Vol. I-II]. Poona : Anandashram, 1979 (3rd edn.) (Anandashram Sanskrit Series No. 37)
37. Taittirīya Saṁhitā : Ed. Pt. Sripada Damodar Satvalekara. Paradi : Svadhyaya Mandala, 1957 (2nd edn.)
38. Taittirīya Saṁhitā : Ed. A.B. Keith. The Veda of the Black Yajus School. [Part I-II]. Delhi : Motilal Banarasidass, 1967 (rpt.) (1st edn.-1914) (Harvard Oriental Series No. 18-19)
39. Vājasaneya Mādhyandina Śuklayajurveda Saṃhitā, ed. pt. Sripada Damodar Satvalekar, Paradi: Svadhyaya Mandala, 4th edn.
40. Vājasaneya Mādhyandina Śuklayajurveda Saṃhitā, tr. R.T.H. Griffith, Chowkhamba Sanskrit Series, Vol. 25, Varanasi: Chowkhamba Sanskrit Series Office, 4th edn.,1976.

Received on: 25/02/2020 Accepted on: 11/02/2021.

# सांख्योक्तप्रमाणव्यवस्था

**सोमेन-दत्तः***

**प्रबन्धसारः**

तरङ्गैः साकं मनुजानाम् अन्तःज्ञानप्रवाहः उदेति तिष्ठति लीयते च।दृश्यते सकलं ज्ञानं विषयमवलम्ब्य उदेति तिष्ठति चेति। सर्वं ज्ञानं सविषयकमिति कमपि विषयम् अवलम्ब उदेति, तद्व्यतिक्रम नानुभूयते। न कोऽपि विषयः अवगाहते तथापि ज्ञानं जायते इत्येतावत् न घटते कथमपि। तथाच रूपञ्च दृश्यते न चास्ति चक्षुः इत्येतद्वाक्यं प्रामादिकमेव। एवं जायते ज्ञानं, नास्ति विषयः इति ततोऽधिकं प्रामादिकं वचः। अतो ज्ञानमात्रे कोऽपि विषयः तिष्ठेत्।अर्थात् जायते ज्ञानं, नास्ति विषय इति कथमपि न घटते। विषयः किल ज्ञानावगाहित्वेन बोध्यः। पुनः ज्ञानमित्युच्यमाने विषयपरिगतं ज्ञानं बोद्धव्यम्। शब्दार्थयोः यथा अविनाभावः सम्बन्धः अस्ति, ज्ञान-ज्ञेययोः तथैवावस्थानम्।

महार्णवतरङ्गेषु समुत्थितानि बहुविधज्ञानानि किं यथार्थतया किं वा अयथार्थतया बुध्यन्ते, तेषां निर्णयः अवश्यं कर्त्तव्यः। सत्यानृतयोः परिज्ञानाय आदौ यथार्थज्ञानस्य लक्षणमावश्यकम्।एतत् यथार्थज्ञानं प्रमाज्ञानमुच्यते। आचार्यकपिलेन प्रमाज्ञानलक्षणं कृतम्। प्रज्ञा, सम्यक् ज्ञानं, प्रमा, प्रमितिः, अनुभवश्च इति पर्यायवाचिनः शब्दाः। एतत् प्रमाज्ञानं स्वीयविषयात् नभिद्यते, न कथमपि व्यभिचरति। प्रमाज्ञानविषयकं ज्ञेयं यदि कोऽपि विषयो ज्ञानपरिधौ ज्ञानसम्पर्कीभवति तदा तस्य प्रमात्वम् अस्वीकृत्य स्मृतित्वम् आयाति। केषाञ्चित् नये यथार्थज्ञानं द्विधा – स्मृतिरनुभवश्चेति कीर्तनमप्रयोजनम्। तेषां नये ज्ञानमबाधितमिति प्रमात्वम् आयाति। यस्य प्रमात्वं नास्ति ईदृशं द्वयमेकं वा ज्ञानमवलम्ब्य प्रमां स्पष्टीकर्त्तुं यत्नः क्रियते।

**कुञ्चिशब्दाः**

प्रमा, प्रमितिः, अनुभवः, प्रमाणम्, स्मृतिः, दृष्टः, अनुमानम्, वीतः,अवीतः, आप्तः, उपमानम्।

## सांख्योक्तप्रमाणव्यवस्था

**भूमिका:**

मन्दान्धकारे रज्जुमवलम्ब्य कदाचित् सर्पज्ञानं जायते। नैतत् ज्ञानं प्रमापदवीं लभते यतः

**Assistant Professor, Sanskrit Method, Ramakrishna Mission Shiksanamandira.*

तस्मिन् सर्पाकारज्ञाने सर्परूपविषय: व्यभिचरति, सर्पस्तु न तिष्ठति। तत्त्वपक्षपातस्वभावज्ञानं सदा सत्यं गृह्णाति। अतो नायं सर्प इति परमविज्ञानस्य बाधो व्यभिचारो वा न दृष्ट:। अत्र " अयम्" इत्यस्मिन् प्रमा, पूर्वोत्पन्नसर्पाकारज्ञाने भ्रम इति संशयज्ञानं न प्रमात्वं लभते। अत्र ज्ञानस्य व्यवसायो निश्चयात्मिका वृत्तिर्वा न जायते। अनेन प्रकारेण ज्ञानं स्मृति-प्रमा-भ्रम-संशयरूपं चतुर्धा विभजते। तेषु प्रमाज्ञानं विशेषतया विचार्यम्।

यथार्थविषयस्य ज्ञानस्य प्रमात्वेन निर्णयो जात:। अथवा द्वयोरेकतरस्य वापि असन्निकृष्टार्थपरिच्छित्ति: प्रमा इत्यादिरूपेण प्रमाज्ञानस्य तथा प्रमोत्पादकप्रमाणस्य सुष्पष्टं लक्षणं निर्णीतं स्यात्। प्रमाणस्यापि प्रमाणप्रमाज्ञानसाक्षात्सम्बन्धतया अवश्यं ग्राह्यम् इति दार्शनिकानां प्रबन्ध:। अत्रैवं वक्तुं शक्यते यत् प्रमाणेन वस्तुपरीक्षा सिध्यति; अर्थात् वस्तु प्रमाणारूढं चेत् परीक्षा जायते।

प्रमाणं कतिविधम्,एकं वा नाना वा? दार्शनिका अत्र प्रत्यप्रतिष्ठन्ते। यद्यपि प्रमेयमवलम्ब्य प्रमाणव्यवस्था जायते तथैव प्रमाणस्य विविधत्वाख्याने न कश्चन दोष आपद्यते। वस्तुनो नानाप्रकारत्वेन तद्गतावस्था अनेकविधा अतीतावस्था, अनगतावस्था वर्त्तमानावस्था च। एवं सर्वविधवस्तूनां परीक्षणम् आवश्यकम्। अत: प्रायेण स्थूलसूक्ष्मदृश्यादृश्यपदार्थपरिपूर्णबहुगुणयुक्तपरिदृश्यमानस्य जगत: परीक्षणाय नैकं प्रमाणं स्थातुमलम्। परिदृश्यमाने जगति न किमपि वस्तु अखण्डतया राजते। परीक्षासाधके वस्तुनि एकस्मिन् विद्यमाने, यस्मिन् काले परीक्षितव्यं वर्त्तमानं तदा परीक्षासाधकसामग्री स्थातुं नार्हेत् अथवा यदा परीक्षासाधकं प्रमाणं विद्यमानं तदा परीक्षितव्यं वस्त्वपि स्थातुं न सम्भवेत्-इत्थं परीक्षा अप्रतिष्ठिता भवति। एतादृशाप्रतिष्ठितत्वदोषपरिहाराय स्वीकर्त्तव्य: कश्चनपदार्थ: य: किल कालत्रयावस्थायी। एकस्मिन् प्रमाणे स्वीकृते त्रैकालिकपरीक्षाया: असिद्धत्वात् वर्त्तमानपरीक्षानिमित्ताय सर्वसम्मतप्रत्यक्षप्रमाणोपस्थिते अतीतानागतपरीक्षानिमित्तयो: प्रमाणान्तराणां स्वीकार आवश्यक:।

पुन: प्रेक्षान्तरं वर्त्तते यत् परीक्षा जगदन्त:पातिनी स्वीकरणीया। अत एवं मन्तुं शक्यं यत् जागतिकावस्थादीनां नानात्वेन तद्-ग्राहकानि प्रमाणानि नाना इति मन्तव्यम्।

प्रमाणसंख्यानिर्णये वैमत्यं दृश्यतेतराम्। केचन एकम्, अन्ये द्वितयं, अपरे त्रितयं, तुरीये चतुष्टयम्, अनन्तरं पञ्चमं, तत: षष्ठं,ततश्च अष्ट इति प्रमाणस्वीकारयाथार्थं परिदृष्टम्। तथा च चार्वाका: प्रत्यक्षम् एकं प्रमाणमङ्गीकुर्वन्ति। अनन्तरं काणादा: सौगताश्च प्रत्यक्षमनुमानामिति द्वितयं प्रमाणमङ्गीकुर्वन्ति। अनन्तरं सांख्या: योगाश्च प्रत्यक्षमनुमानं शब्दश्चेति त्रिविधं प्रमाणं कक्षीकुर्वन्ति। पुन: नैयायिका: तद्-त्रितयं व्यतिरिच्य उपमानप्रमाणं तदरिक्ततया मन्यन्ते। पुन: प्रभाकरमीमांसका: तदतिरिक्ततया अर्थापत्तिप्रमाणमिति पञ्चप्रमाणानि संभजन्ते। पुन: भाट्टा: वेदान्तिन: अनुपलब्धिप्रमाणं तदतिरिक्ततया स्वीकुर्वाणा: षट्प्रमाणानि आश्रयन्ति। एवं प्रमाणनिर्णये प्रसिद्ध: श्लोकसंग्रह:।

प्रमाणस्वीकारविषये दार्शनिकानां स्पष्टतया विवेचनात् दु:खप्रहाणे मुख्यविषयतया विद्यमानत्वात् स्वस्वतत्त्वावगमनेन प्रमाणानि व्यवस्थितानि। तत्र सांख्यायोगाश्च प्रमाणत्रितयं स्वीकुर्वन्ति। एतस्मिन् प्रमाणत्रये स्वाभिप्रायचरितार्थत्वात् न्यूनाधिकव्यवच्छेदार्थत्वेन त्रित्वं समाहितम्।

प्रमाणशब्देन तत्सामान्यलक्षणमादौ निरूपितव्यम्।प्रमीयतेअनेनेतिव्युत्पत्त्याप्रपूर्वकात्मा-धातो: करणवाच्येल्युटिप्रमाणशब्दस्यनिष्पत्ति:।तथाच प्रसंज्ञकोपसर्गेणप्रकर्षोऽर्थ:, मा-धातो: ज्ञानार्थक: सूचित: ; तेनप्रमा-शब्दस्ययथार्थज्ञानेविनिष्पत्ति:। प्रमाया:करणमितिप्रमाणम्।तेनय थार्थज्ञानकरणत्वंप्रमाणत्वमित्यर्थआयाति।यथार्थज्ञानविवेचनयासंशयविकल्पविपर्ययस्मृतिप्रभृ तीनांव्यवच्छेदोजायते।

सांख्यनयेज्ञानंविषयाकारधारणरूपम्।अपरिणामिन: पुरुषस्यविषयाकारेणपरिणमनं नसम्भवति।व्याप्तिज्ञानसाहचर्यात्बुद्धि: यदाविषयसम्पृक्ताभवतितदाबुद्धिस्तदाकारंलभते।सत् त्वप्रधानबुद्धिवृत्तौचेतनपुरुषसम्पृक्तत्वात्पुरुषप्रतिविम्बपातेनबुद्धिवृत्तिरुद्भासिताभवति।वृ त्तिगतंज्ञानसुखादिकंपुरुषेआरोपितंभवति।तदाअहंज्ञाता, अहंसुखी, अहंदु:खीइत्यादिप्रतीति: घटते।पुरुषनिष्ठोऽयंबोध: प्रमा।विज्ञानभिक्षु: पुन: बुद्धिवृत्तौयथापुरुषप्रतिविम्बपात: इत्योन्यन् यप्रतिविम्बवादमवलम्ब्यपौरुषेयंबोधंव्याख्यायते।अत्रवाचस्पतिमिश्रा: नतथामन्यन्ते, केवलपुरु षविम्बपातेनबुद्धिवृत्तौपौरुषेयबोधसम्भवात्।असौपौरुषेयबोध: प्रमेतिनतात्त्विकम्, किन्तु आरो पितमौपचारिकंवा।सांख्यनयेचैतन्यस्वरूपआत्मा, चैतन्यंनात्मधर्म:।

प्रमाया: करणंसाधनंप्रमाणमिति। सांख्यनयेविषयाकारचित्तवृत्तेर्यत्साधनंसन्निकर्षरूपव् यापारवत्चक्षुरादि, यच्चपौरुषेयबोधकरणंचित्तवृत्तिरूपंतदुभयमपिप्रमाणम्।अत्रप्रमाणस्यव्यापा रगर्भत्वात्चित्सान्निध्यमेवव्यापार:। विज्ञानभिक्षुस्तुफलायोगव्यवच्छिन्नंकारणंकरणमित्याशये नसाधनंनिश्चितवान्।संशयविपर्ययादीनांप्रमात्वभावेनतत्तद्वृत्तिभिन्नचित्तवृत्तिकरणत्वस्यैवप्र माणत्वमितिस्पष्टंभवति।

**प्रत्यक्षप्रमाणम्**

प्रमाणेषुत्रिषुप्रत्यक्षस्यनिखिलप्रमाणोपजीव्यत्वात्सर्ववादिसम्मतत्वाच्चतदादौनिरूप्यतेसां ख्यकारिकाकृता[1] अत्रदृष्टमितिपदंप्रत्यक्षप्रमाणनिर्देशकम्, प्रतिविषयाध्यवसायइतिलक्षणपरम्। एतेनअनुमानादीनांप्रत्यक्षकोटौप्रवेशोदुर्वारएव। लक्षणेविषयपदंषिञ्बन्धनेइतिधातुघटितत्वेन विषिण्वन्तिनिबध्नन्तिस्वेनरूपेणनिरूपणीयंकुर्वन्ति। तेखलुपृथिव्यादय: सुखादयश्च।

अत्रायमाशय:। घटादयोविषया: इन्द्रियसन्निकर्षादिनाचित्तंस्वीयाकारेणोपरञ्जयन्ति, यदि

दमुपरञ्जनंविषयिणिचित्तेविषयाणांस्वाकारार्पणमेतदेवस्वेनरूपेणनिरूपणीयमितितत्त्वम्। अत्र विषयपदंनकेवलंस्थूलपृथिव्यादिमात्रपरमपितुतन्मात्रादिसूचकम्, तन्मात्रादिषुयोगिजनप्रत्यक्ष सिद्धत्वात्। एवं योगसूत्रे मण्डितम्।

विषयंविषयंप्रतिवर्त्ततेइतिप्रतिविषयम्इन्द्रियम्। विषयनिरूपितवृत्तितावदितिअर्थो भ्यते। तच्चयदीन्द्रियादे:स्वस्थानपरित्यागपूर्वकंविषयदेशगमनरूपंतदाऽन्धत्वादिप्रसङ्गइत्त उक्तम्। वर्ततेइत्यनेनप्राप्तावृत्ति। साचसन्निकर्षाख्या। तथाचअर्थसन्निकृष्टमिन्द्रियमित्यर्थोल यते। तस्मिन्अध्यवसाय: प्रतिविषयाध्यवसाय:। अत्रसप्तम्यन्तस्यार्थ: आश्रित:। तेनअर्थसन नि कृष्टेन्द्रियसम्बन्धनिबन्धनइतिफलितम्। अध्यवसायोबुद्धिव्यापारोज्ञानम्, अन्त:करणस्यवृत्ति रूपपरिणामात्मकंज्ञानमिति। अत्रतदाश्रितइत्यनेनअध्यवसायइन्द्रियधर्मइतिनमन्तव्यम्, अपि तुइन्द्रियमाश्रित्यबुद्धौवर्तमानत्वेनबुद्धेरेवसधर्मोऽभ्युपेय:। यथावीजसलिलादिसन्निधानेजाय मानोऽङ्कुर: नकालाङ्कुर: सलिलाङ्कुर: इतिवाव्यपदिश्यते, तस्यकालादिधर्मत्वाभावात्, अपितुवीजेनैवव्यपदिश्यते। बुद्धिविषयेन्द्रियालोकसंयोगादिसन्निधानेनजायमानमपिज्ञानंने न्द्रियादिधर्मइतिव्यपदिश्यते, किन्तुबुद्धिधर्मत्वेनैवव्यपदेश:। अध्यवसायशब्देननिश्चितमेव ज्ञानमुच्यते योगसूत्रे व्यासभाष्ये विशदीकृतम्। अध्यवसायग्रहणेनसंशयोव्यवच्छिद्यते। वि षयग्रहणेनअसद्विषयंविपर्ययादिकंनिवारितंभवति। प्रतिग्रहणेनइन्द्रियार्थसन्निकर्ष: सूच्यते। तदभावात्अनुमानादौअतिव्याप्ति: स्यात्।

## अनुमानम्

सांख्यनयेद्वितीयंप्रमाणंकिलानुमानम्। लौकायतिका: नानुमानंस्वीकुर्वन्ति। तथासतिअप्रतिपन्न: सन्दिग्ध: विपर्यस्त: वापुरुषान्तर्गता: कथं प्रतिपद्येते ? नचपुरुषान्तर्गताअज्ञा नसन्देहविपर्ययावाच्या: साधारणै: प्रत्यक्षेणप्रतिपत्तुम्। नापिप्रमाणान्तरंवाच्यं, तैरनभ्युपगमात्। किञ्चअन्येषाम्अज्ञानसंशयविपर्ययादीन्अनवधारयन्पुरुष: अन्यान्प्रतिउपदिशति, तदाउपेक्षित व्यानिउन्मत्तवत्तानिवचनानिप्रेक्षाविद्भि:। एवंपरपुरुषवर्तिन: अज्ञानादय: अभिप्रायभेदात्वचन भेदलिङ्गादनुमानव्याइतिअकामेनापिअनुमानंप्रमाणमभ्युप्रेयम्।

प्रत्यक्षकार्यत्वात्अनुमानंप्रत्यक्षानन्तरंलक्षणीयम्। अनुमानसामान्यंलक्ष्यतयाईश्वरकृष् णेनसांख्यकारिकायामुक्तम्। लिङ्गंव्याप्यं, लिङ्गिव्यापकम्। शङ्कितसमारोपितोपाधिनिरा करणेनवस्तुस्वभावप्रतिबद्धंव्याप्यं, येनचप्रतिबद्धंतद्व्यापकम्। लिङ्गलिङ्गिग्रहणेनविषयवा चिनाविषयिणंप्रत्ययमुपलक्षयति। धूमादिव्याप्य: वह्न्यादिर्व्यापक:इतिय: प्रत्यय: तत्पूर्वकम्। लिङ्गिग्रहणञ्चआवर्तनीयम्। तेनचलिङ्गमस्यास्तीतिपक्षधर्मताज्ञानमपिदर्शितंभवति। तद्व्याप्य व्यापकभावपक्षधर्मताज्ञानपूर्वकमनुमानमितिअनुमानसामान्यंलक्षितम्।

अनुमानविशेषान् शास्त्रान्तरप्रतिपाद्यान् स्मारयति सन्दर्भेण। त्रिविधशब्देन पूर्ववत् शेषवत् सामान्यतोदृष्टञ्चेति बोध्यम्। आदौ वीतावीतभेदेन द्विविधम्। तत्र अन्वयमुखेन प्रवर्तमानं विधायकं वीतम्, व्यतिरेकमुखेन प्रवर्तमानं निषेधकमवीतम्। तथाहि तत्सत्त्वे तत्सत्त्वम् इत्यन्वयव्याप्ति:, तदसत्त्वे तदसत्त्वम् इति व्यतिरेकव्याप्ति:। तेन धूमसत्त्वे वह्निसत्त्वाम् इत्यन्वयव्याप्ति:,वह्न्यसत्त्वे धूमासत्त्वम् इति व्यतिरेकव्याप्ति: बोद्ध्या।

तत्र अवीतं शेषवदनुमाने अन्तर्हितं भवति। शिष्यते परिशिष्यते इति शेष:। स एव विषयतया यस्यास्ति अनुमानज्ञानस्य तत् शेषवत्। शास्त्रकारै: समीरितम्- प्रसक्तप्रतिषेधे अन्यत्राप्रसङ्गात् शिष्यमाने सम्प्रत्यय: परिशेष इति।

वीतञ्च द्विविधम्- पूर्ववत् सामान्यतोदृष्टञ्च। पूर्ववत् दृष्टस्वलक्षणसामान्यविषयम्। पूर्वं प्रसिद्धं दृष्टस्वलक्षणसामान्यमिति यावत्, तदस्य विषयत्वेन अस्ति अनुमानज्ञानस्य इति पूर्ववत्। यथा धूमात् वह्नित्वसामान्यविशेष: पर्वतेऽनुमीयते, तस्य वह्नित्वसामान्यविशेषस्य स्वलक्षणं वह्निविशेषो दृष्टो रसवत्याम्। अपरञ्च वीतं सामान्यतोदृष्टम्। एतच्च अदृष्टस्वलक्षणसामान्यविषयम्। यथा इन्द्रियविषयमनुमानम्। अत्र हि रूपादिविज्ञानानां क्रियात्वेन करणवत्वम् अनुमीयते। यद्यपि करणत्वसामान्यस्य छिदादौ वास्यादिस्वलक्षणमुपलब्धं तथापि यज्जातीयं रूपादिज्ञाने करणमनुमीयते तज्जातीयस्य करणत्वस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण। इन्द्रियजातीयं हि तत् करणम्। न चेन्द्रियत्वसामान्यस्य स्वलक्षणम् इन्द्रियविशेष: प्रत्यक्षेण गोचर: साधारणानाम्। यथा वह्नित्वसामान्यस्य स्वलक्षणं वह्नि:, सोऽयं पूर्ववत: सामान्यतोदृष्टात् सत्यपि वीतत्वेन तुल्यत्वे विशेष:। दृष्टं दर्शनं, सामान्यतो इति सामान्यस्य सार्वविभक्तिक: तसिल्, अदृष्टस्वलक्षणसामान्यविशेषस्य दर्शनं सामान्यतो दृष्टमनुमानमिति।

अयमाशय:। तत्रेन्द्रियसन्निकर्षोपेतानामर्थानां प्रत्यक्षेणोपलब्धिर्जायते। ये च पदार्था इन्द्रियसन्निकर्षोपलब्धिरहितास्तेषां कृतेऽनुमानम्। किन्तु ये नामातीन्द्रिया भावास्तेषां न प्रत्यक्षकोटौ न वावुमानकोटौ वर्त्तते। आगामिकत्वे सर्ववादसिद्धिप्रसङ्ग:। एवमतीन्द्रियेषु भावेषु एतावद्भि: प्रमाणै: अप्राप्तत्वात् सांख्यशास्त्रीयपदार्थानामवबोधाभाव: प्रसज्येत। एतादृशातिप्रसक्त्या प्रमाणत्रैविध्यवत् अनुमानत्रैविध्यमासादितम् इत्यत: सामान्यतो दृष्टस्यावसर:।

सामान्यतो दृष्टादतीन्द्रियाणामर्थानां समधिगम:। यथा कृतकत्वानित्यत्वयोर्घटे सहभावमुपलभ्य अन्यत्र शब्दादौ कृतकत्वदर्शनादनित्यत्वमनुमीयते, एवं शकलादीनां तज्जातीयतया चन्दनादिपूर्वकत्वसिद्धिर्भवति। कार्यस्य सुखादिजातीयत्वे तत्कारणस्य सुखादिजातीयत्वेनानुमिति स्यात्। शयनादीनाञ्च संघातत्वात् पारार्थ्यसिद्धि: यथा दृश्यते तथैव कार्यकारणस्य पञ्चमहाभूतैकादशेन्द्रियपञ्चतन्मात्राहङ्कारमहत्प्रधानस्वरूपस्य सन्निवेशात् पारार्थ्यसिद्धि:, यस्या: पुरुषोऽनुमीयते।

ये किल शेषवति सामान्यतो दृष्टानुमानस्याभेदं गणयन्ति, तेषां नये कार्येण कारणोपलब्धे: पुरुषस्योपलब्धि: न जायते। यत: पुरुष: प्रकृतिमध्ये तथा विकृतिमध्ये न वर्तत इत्यनुभयरूपत्वात् न गणनं जायते पुरुषस्य। अत: पृथगवसर: सामान्यतो दृष्टस्य।

पुन: पुरुषस्य कार्याभावसत्त्वेऽपि पुरुषाव्यक्तमहदहङ्कारविषाणां साम्प्रते काले स्ववृत्तिभ्यस्तेषां ग्रहणमिति प्रतिपादितम्। वृत्तिशक्तिरेषां कार्यत्वेनोपचरिता स्वमात्मानं युनक्तीति। एतदपि न युज्यते। यत: पुरुषस्य सिद्धौ तादृशौपचारिकप्रयोगासभवात् संहतपारार्थस्य हेत्वन्तरस्य ईश्वरकृष्णेनाभिधानात् शेषवत्सामान्यतोदृष्टयोरर्थान्तरभावोऽभ्युपगन्तव्य:। एतेनातीन्द्रियाणामर्थानां सामान्यतो दृष्टात् समधिगम:।

वीतावीतभेदेनानुमानस्य द्वैविध्यम्। वीते हेतु: स्वरूपेण साध्यसिद्धौ प्रयुज्यते। अर्थान्तराक्षेपात् अवीत: कथित:। अर्थात् हेतुर्यदा स्वसाध्यात् अर्थान्तरभूतानां प्रसङ्गिनां क्षेपम् अपोहं कृत्वा परिशेषत: साध्यसिद्धावपदिश्यते तदाऽवीताख्ये भवति। वीतहेतु: पूर्ववत् सामान्यतो दृष्टश्च इति द्विविधो भवति। यत्र साध्यतावच्छेदकहेतुतावच्छेदकरूपपुरस्कारेण व्याप्तिग्रहस्तत्पूर्ववदनुमानं, यत्र च साध्यतावच्छेदकहेतुतावच्छेदकरूपव्यापकधर्मपुरस्कारेण व्याप्तिग्रहस्तत्सामान्यतो दृष्टमनुमानम् इत्यनयोर्भेद:।

**शब्दप्रमाणम्**

"त्रिविधं प्रमाणमिष्टम्" इति कथनात् आप्तवचनमिति अन्तिमं प्रमाणम्। तथाच प्रयोजकवृद्धशब्दश्रवणसमनन्तरं प्रयोज्यवृद्धप्रवृत्तिहेतुज्ञानानुपूर्वकत्वात् शब्दार्थसम्बन्धग्रहणस्य स्वार्थसम्बन्धज्ञानसहकारिणश्च शब्दस्यार्थप्रत्ययकत्वात् अनुमानपूर्वकत्वमित्यमनुमानानन्तरं शब्दं लक्षयति ईश्वरकृष्ण:।

आप्तवचनमिति लक्ष्यनिर्देश:, परिशिष्टं लक्षणम्। आप्ता प्राप्ता युक्ता इति यावत्। आप्ता चासौ श्रुतिश्चेति आप्तश्रुति:। श्रुति: वाक्यजनितं वाक्यार्थज्ञानम्। तच्च स्वत: प्रमाणम्। अपौरेषेयवेदवाक्यजनितत्वेन सकलदोषाशङ्काविनिर्मुक्ते: युक्तं भवति। आदिविदुषश्च कपिलस्य कल्पादौ कल्पादौ कल्पान्तराधीतश्रुतिस्मरणसम्भव:,सुप्तप्रबुद्धस्येव पूर्वेद्युरवगतानामर्थानामपरेद्यु:। तथाच आवट्यजैगषव्यसम्वाद: प्रमाणम्।

ननु शाक्यभिक्षुप्रभृतीनां शास्त्रकाराणां संसारमोचकादीनां सत्त्वात् तत्रैवाप्तशब्दस्याति व्याप्तिरिति चेदुच्यते आप्तग्रहणेन ते ते शास्त्रकारा: वियुक्ता:, तेषां मतानाम् आगमाभासकत्वेन निराकरणं द्योतितम्। कारिकाकृता तु- शब्दोल्लेखेन अनुमानाद्यवच्छिद्यन्ते छिन्नमूलानां शास्त्रकाराणां मतानि।

अनुमानप्रमाणमध्ये उपमानार्थापत्तिसम्भवानां प्रत्यक्षे अभावप्रमाणस्य, आप्तवचने ऐतिह्यानुगमात् नास्ति प्रमाणत्रिविधत्वातिरिक्तत्वस्वीकार: सांख्यशास्त्रे।

एवं प्रमाणत्रितयं निरूपितं नाम। अत्रेयं पृच्छा उपमानादीनां प्रमाणान्तराणामुपस्थिते तेषु तेषु च प्रमाणेषु गौतमादीनाम् ऋषिणां चिन्तनसत्त्वात् तेषु च ऋषिवाक्येषु पुन: प्राधान्यस्थापनात् व्यर्थं चिन्तनं सांख्यादीनां प्रमाणतत्त्वनिर्णय इति। सांख्यास्तत्र मन्यन्ते प्रमाण सामान्यतद्विशेषनिर्वचननिरूपणप्रकरणम् उपसंहरन्त: "सर्वप्रमाणसिद्धत्वात् " इत्यत्र अभिहिते प्रमाणत्रये अन्यप्रमाणान्तर्भावं स्मारयन्ति।

प्रमाणत्रैविध्यमतिरिच्य चतुर्थं प्रमाणं किलोपमानम्। एतत् प्रमाणं नैयायिकादिभिरङ्गीक्रियते। आदिपदेन प्राभाकर-कुमारिल-वैदान्तिकानां ग्रहणम्। उपमानं नाम प्रसिद्धसाधर्म्यात् साध्यसाधनमिति। तथाच प्रसिद्ध: प्रज्ञात: तेन साधर्म्यात् साध्यस्याऽप्रसिद्धस्य साधनमभिगमो यस्तदुपमानम्। अवबोधविधिस्तु येनाऽनुपलब्धौ गवय: स तस्योपलब्ध्यर्थमधिगतगवयं पर्यनुयुङ्क्ते- किंरूपो गवय इति। स तस्मात् आचष्टे - यथा गौरेवं गवय इति। तत्र प्रतिपत्त्याऽत्यन्ताऽनुपलक्षितगवयस्वरूपो व्याख्यातृप्रतिपादितप्रसिद्धवस्तु साधर्म्यज्ञानाहितसंस्कार: प्रतिपद्यते -नूनमेवंरूपो गवय इति। अपर आह-आप्तवचनोपजनितप्रसिद्धवस्तुसाधर्म्यज्ञानाहितसंस्कारस्योत्तरकालं प्रत्यक्षेण तमुपलभ्य या समाख्यासम्बन्धप्रतिपत्ति:- अयमसावर्थोऽस्य शब्दस्य समाख्या इति -तदुपमानमुच्यते।

यद्येवमुपमैतिह्यावचनम्, आप्तोपदेशसिद्धे:। यथा गौरेवं गवय इति चाप्तोपदेशवलात् प्रत्तिपत्ता अप्रसिद्धं गवयमूपलभते न साधर्म्यमात्रात्। तस्मान्न शब्दात् पृथगुपमा। यत्तु खल्विति ह उवाच याज्ञवल्क्य इत्येतदैतिह्यं नाम प्रमाणान्तरमुपकल्प्यते तदपि वक्तृविशेषापेक्षत्वान्न शब्दादर्थान्तरम्।

उपमा प्रमाणान्तरं न, साधर्म्यापेक्षत्वात्। यदि ह्याप्तोपदेश उपमा स्यात्तेन यथा स्वर्गेऽप्सरस:, उत्तरा: कुरव इत्येवमादिष्वन्तरेण साधर्म्योपादानं प्रतिपत्तिर्भवति एवमिहापि स्यात्। गवयन्तु अयमाख्याता प्रतिपादयिष्यन् प्रसिद्धसाधर्म्यगर्भं शब्दमुपादत्ते न केवलम्। प्रतिपत्तापि तस्मादेव प्रतिपद्यते न शब्दमात्रात्। तस्मात् पृथगेवास्योपदेश: कर्त्तव्य:। शब्दव्यापारात्तदन्तर्भाव इति चेत् स्यान्मतं शब्दव्यापारसहितोऽयं प्रसिद्धसाधर्म्यलक्षणार्थो गवयप्रतिपत्तौ न केवल:, तस्मादस्य तत्रान्तर्भाव इति तदप्यनुपपन्नम्, वीतावीतयोरपि तत्प्रसङ्गात्। वीतावीतावपि हेतू परप्रतिपादनार्थमुपादीयमानौ शब्दव्यापारमपेक्षेते। तयोरप्याप्तवचनत्वप्रसङ्ग:। अनिष्टं चैतत्। तस्मान्नोपमानमाप्तोपदेश:।

उच्यते, साधर्म्याऽव्यतिरेक:, उपायभूतत्वात्। आख्यातृप्रामाण्यादेव प्रतिपत्तुर्गवयविज्ञान मुपपद्यते। स तु कौशलाद्दुरुपपादोऽयमर्थ इति कृत्वा प्रसिद्धसाधर्म्यमुपादत्ते। तस्मादाख्यातुर्गव यप्रतिपादनार्थमुपायभूतं साधर्म्यमुपाददानस्य शब्दादर्थान्तरमुद्भवति।

अथैवं जातीयकानामपि प्रमाणान्तरत्वमिष्यते तेनात्यल्पमिदमुच्यते चत्वारि प्रमाणानीति। किं तर्हि पाणिविहाराक्षिनिकोचप्रभृतीनामप्युपसंख्यानं कर्त्तव्यम्। किञ्च वक्तृविशेषापेक्षत्वात्। यत्र ह्यर्थवशात्प्रतिपत्तिरुत्पद्यते न तत्र प्रतिपत्ता वक्तृविशेषमपेक्षते दृष्टार्थोऽयमिति। तद् यथाऽनुमाने। अस्ति चोपमाने वक्तृविशेषापेक्षा। तस्मान्न शब्दादर्थान्तरं तत्। अवश्यं चैतदेवं विज्ञेयम्। यो हि मन्यते प्रसिद्धसाधर्म्यादेव गवयप्रतिपत्तिरिति यथाश्वस्तथा गवय इत्येतस्मादपि तस्य सम्प्रतिपत्तिः स्यात्। न चार्हति भवितुं, मिथ्याज्ञानत्वात्। यत्तु खल्विदमुच्यते यतः समाख्यासम्बन्धप्रतिपत्तिरिति तदुपमानमिति। एतदनुपपन्नम्। अनवस्थाप्रसङ्गात्।

तद् यथा बहुषु निषण्णेषु कोऽत्र देवदत्त इत्युक्ते यो मुकुटी कुण्डली व्यूढोरस्कस्ताम्रायताक्ष इति प्रत्याह। ततश्च समाख्यासम्बन्धप्रतिपत्तिरिति प्रमाणान्तरत्वप्रसङ्ग इत्येवमनवस्था प्रमाणानां स्यात्। अनिष्टं चैतत्। एवं हि न तावत्परत उपमानं प्रमाणान्तरम्। यदा स्वयमेव गां गवयं चोपलभ्य विकल्पयति यथाऽयं तथाऽयमिति तदा तस्यार्थस्य प्रमाणान्तरेणाधिगतत्वात् प्रमाणमेव तन्न भवतीति। तस्मात् सुष्ठूक्तमयमैतिह्यावचनमाप्तोपदेशात् सिद्धेरिति।

किञ्चान्यत्- अर्थापत्तिसम्भवाभावचेष्टानामनुमानसिद्धेः। अवचनमित्यनुवर्त्तते। तत्रार्थापत्तिर्नाम यत्रार्थयोः पूर्वमव्यभिचारमुपलभ्य पश्चादन्यतरस्य दर्शनाच्छ्रवणाद्वान्यतरस्मिन् प्रतिपत्तिर्भवति। दर्शनाद् यथा गुडमुपलभ्य माधुर्यमिन्द्रियान्तरविषयं प्रतिपद्यते। श्रवणाद् यथा गुडशब्दं श्रुत्वा माधुर्यमशब्दकं प्रतिपद्यत इति। अपरा खल्वर्थापत्तिः। यत्र धर्म्यर्योरव्यभिचारमुपलभ्य तत् प्रतिद्वन्दिनोरपि साहचर्यकल्पना। सा तु द्विविधा,व्यभिचारिणी चाव्यभिचारिणी च। तत्र व्यभिचारिणी यथा सावयवमनित्यमित्युक्तेऽर्थादापन्नं निरवयवं नित्यमिति।

तच्च कर्मादिष्वदृष्टमित्येषाऽनैकान्तिकत्वात् प्रमाणमेव न भवति। या त्वविनाभाविनी अव्यभिचारिणी यथा केशरिवराहयोरुपगह्वरे सन्निपातमुपलभ्योत्तरकालं केवलं केशरिणं वराहव्रणाङ्कितशरीरं प्रयान्तमुपलभ्य प्रतिपद्यते जितो वराह इति तदनुमानम् कथम् ? यस्मात् केशरिवराहयोर्यौ जयपराजयौ तयोरव्यभिचारी सम्बन्धः।तत्र यदा केशरिणो जयमुपलभ्याव्यभिचारिणमितरस्य पराजयं प्रतिपद्यते किमन्यत्स्यादृतेऽनुमानात् ? अधिगतोभयसम्बन्धिसमुदायस्य हि प्रत्तिपत्तुः प्रत्यक्षीभूतान्यतरसम्बन्धिनो या सम्बन्ध्यन्तरप्रतिपत्तिस्तदनुमानम्। इत्थं चार्थापत्तिरतो न तस्मात् पृथग्भवितुमर्हति।

सम्भवो नाम द्रोणः प्रस्थ इत्युक्तेऽर्धद्रोणादीनां सन्निधानमवसीयते इत्ययमपि साहचर्यकल्पनयाऽर्थापत्तिरेव। यस्मादुक्तपरिमाणे द्रव्ये द्रोणशब्दो वर्त्तते, न न्यूने नाधिके। तत्र द्रोण इत्युक्ते यदत्यन्तसहभुवां तदवयवानामन्यशब्दवाच्यानामपि सन्निधानं तदर्थापत्तिरेव।सा चाऽनुमानमित्युक्तम्।

अभावो नाम तद् यथा धूमस्य भावादग्नेर्भाव: प्रतीयते एवं धूमाभावादग्न्यभाव इत्ययं प्रतिद्वन्द्विसाहचर्यकल्पनयार्थापत्तिरभिहित:। तत्र यदा व्यभिचारसाहचर्यकल्पना तदा प्रमाणाभाव एव। तद्-यथाऽयोगुडाङ्गादिषु धूमाभावो नाग्न्यभाव:। यत्र तु क्वचिदेकान्त: स्यात् यथाऽकृतकत्वान्नित्य इति तत्राऽनुमानंसाहचर्योपपत्ते:,कृतकत्वानित्यत्ववत्।

अन्ये तु - अभावमन्यथा वर्णयन्ति। तद्यथा गेहे नास्ति चैत्र इत्युक्ते वहिरस्तीति सम्प्रत्ययो भवति, तत्र गेहाभावो वहिर्भावसम्प्रतिपत्तिहेतुरर्थान्तरापत्तिरेव प्रतिद्वन्द्विसाहचर्यकल्पनया। यथैव हि दिवा न भुङ्क्ते देवदत्त: पीन इत्यत्राऽभोजनप्रतियोगिनो मेदुरत्वस्योपलम्भाद्दिवाप्रतियोगिनि काले रात्रौभुजिरवसीयते एवमिहापि गेहाभावाभिधानसामर्थ्यात्तत्प्रतियोगिनि विपर्यय: कल्प्यते। अन्यथा तु यद्यभाव एवाभिप्रेत: स्यान्नास्ति चैत्र एवेति ब्रूयात्। अर्थापत्तिश्चानुमानम्।

चेष्टा नाम अभिप्रायसूचक: कश्चिदेवोदरताडनाञ्जलिकरणादिक: शरीरव्यापार:।स हि वुभुक्षादीन्यप्रतीयमानानि प्रतिपादयतीतिप्रमाणमित्युच्यते। स चानुमानमेव। यस्मात् भोजनेच्छादि सहचरो हि व्यापारोऽनुष्ठीयमानो यदि सहचारिणं गमयति तदा नानुमानात्पृथगिति शक्यं प्रतिज्ञातुम्। अर्थात् भोजनेच्छासहचरो हि व्यापारोऽनुष्ठीयमानो भवति सहचारिणं च यदि गमयति कथं तदनुमानात् पृथगिति शक्यं प्रतिज्ञातुम्?

प्रतिभा तर्हि प्रमाणान्तरं भवतु। उच्यते - केयं प्रतिभा नाम ? आह, योऽयमनादौ संसारे देवमनुष्यतिरश्चामभिन्नेऽर्थे वाह्येस्त्र्यादौ प्रत्यये पूर्वाभ्यासवासनापेक्ष: कुणपकामिनीभक्ष्याद्याकारभेदभिन्नप्रत्यय इतिकर्त्तव्यताङ्गमुत्पद्यते सा हि प्रतिभा।

येन हि योऽर्थोऽभ्यस्तस्सुखादित्वेन तस्य विनाऽपि तेनार्थेन शब्दमात्रात् प्रतिपत्तिरुत्पद्यते। तद् यथा व्याघ्रोऽत्र प्रतिवसतीत्युक्ते विनाऽपि वाह्येनाऽर्थेनाभ्यासवशादेव स्वेदवेपथुप्रभृतयो भवन्ति। तस्मात् प्रतिभैव देवमनुष्यतिरश्चामितिकर्त्तव्यताङ्गत्वात् प्रमाणमिति।

उच्यते प्रतिभाया दृष्टादिव्यतिरेकेण रूपान्तरानुपपत्ते:। अवचनमित्यनुषज्यते। यदि पूर्वाभ्यासवासनापेक्ष: प्रत्यय: प्रतिभेत्यभ्युपगम्यते तेन तर्हि असौ प्रत्यक्षमनुमानमाप्तवचनं चेत्येतदापन्नम्। यतो न हि दृष्टादिव्यतिरेकेण प्रत्ययरूपं कदाचिदप्युपलभामहे। तस्मान्न तेभ्योऽर्थान्तरं प्रतिभा।

आर्यप्रत्ययसम्भवादयुक्तमिति चेत् - स्यादेतत्, अस्त्यार्यो हि दृष्टादिव्यतिरेकेण सर्वपदार्थेषु सांसिद्धिक: प्रत्यय:। स प्रातिभो भविष्यतीति। एतच्चाप्ययुक्तम्। कस्मात् ? उक्तत्वात्। उक्तमेतत् सिद्धरूपं भगवत: परमर्षे: ज्ञानम्। अतो न प्रमाणापेक्षमिति। योगिनामिति चेन्न, अनभ्युपगमात्। न हि योगिनामप्रमाणपूर्वकं ज्ञानमिति योगशास्त्रे दृष्टम्।

स प्रत्यय: लौकिक इति चेत् न। अनिश्चितत्वात्। स्यादेतत् -अस्ति लौकिक: प्रत्ययो

दृष्टादिव्यतिरेकेण। तद् यथा सन्तमसे व्रजतो द्रागिति विज्ञानमुत्पद्यते - अस्ति मे प्रतीघाति द्रव्यं पुरस्तादूर्ध्वमवस्थितमिति। तच्च नैवम् ; अनिश्चितत्वात्। न हि तत्र निश्चय उत्पद्यते इदं तद् द्रव्यमस्ति पुरतो वा व्यक्तमस्तीति। न चानिश्चितं प्रमाणज्ञानमिष्यते। किञ्चान्यत् - अनवस्थाप्रसङ्गात्। यदि चैवं जातीयकोऽपि प्रत्यय: प्रमाणमभ्युपगम्यते तेनानवस्था प्राप्नोति, किं अनवस्थानाद्विकरणस्य। कामक्रोधलोभभयविषादद्वारको विकल्प: सम्यङ्मिथ्या वा यस्मादनेक उत्पद्यते तस्मान्न लौकिक: प्रत्यय: प्रतिभा।

यत्तु खल्विदमुच्यते अभ्यासवासनापेक्षाऽसत्स्वपि व्याघ्रादिषु प्रतिपत्तिरुत्पद्यते इति सत्यमेतत्। सा तु मिथ्याज्ञानत्वात् प्रमाणत्वेन न परिगृह्यते इत्ययमदोष:। तस्मात् सिद्धं दृष्टादिव्यतिरेकेण रूपान्तरानुपपत्ते: प्रतिभाया: पृथगनभिधानम्। ततश्च सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टमिति शम्।

ग्रन्थेतिवृत्तम्

१) श्रीमद्वाचस्पतिमिश्रविरचिता (२०१६ आङ्गलाब्द:), सांख्यतत्त्वकौमुदी, श्रीनारायणचन्द्रगोस्वामिसम्पादिता, देवाशिस्-भट्टाचार्यप्रकाशिता, संस्कृतपुस्तकभाण्डार:, कलिकाता-६,
२) आचार्यकपिलप्रणीतम् (२००९ आङ्गलाब्द:), सांख्यदर्शन, अमितभट्टाचार्यसम्पादितम्, सदेशप्रकाशितम्, १०१ सि . विवेकानन्दरोड्, कलकाता ७००००६,।
३) आचार्यकपिलप्रणीतम् (१४१६ वङ्गाब्द:), सांख्यदर्शन, नगेन्द्रनाथचक्रवर्तिसम्पादितम्, भोलानाथघोषप्रकाशित:, नगेन्द्रप्रज्ञामन्दिर:, कलिकाता ७०००९२।
४) आचार्यकपिलप्रणीतम् (१३६० वङ्गाब्द:), सांख्यदर्शन, दुर्गाचरणसांख्यवेदान्ततीर्थसम्पादितम्, कलिकाता।
५) विधुभूषणभट्टाचार्य्यसम्पादितम् (२००८ आङ्गलाब्द:), सांख्यदर्शनेर विवरण, पश्चिमवङ्गराज्यपुस्तकपर्षद्प्रकाशितम्, आर्यम्यान्सन्, कलकाता ७०००१३,।
६) श्रीरवीन्द्रनाथशास्त्रिसम्पादितम् (२०१० आङ्गलाब्द:), सांख्यदर्शनरहस्य, देवाशिस्-भट्टाचार्यप्रकाशितम्, संस्कृतपुस्तकभाण्डार:, कलिकाता - ६।
७) अन्नंभट्टकृत: (२०१३ आङ्गलाब्द:), तर्कसंग्रह:,श्रीयुधिष्ठिरगोपसम्पादित:, अभयवर्मनप्रकाशित:, संस्कृतवुकडिपो।
८) बादरायणकृतम्, ब्रह्मसूत्र (शाङ्करभाष्यम्), श्रीकरुणासिन्धुदाससम्पादितम्, अभयवर्मनप्रकाशित:, संस्कृतबुकडिपो, कलकाता ७००००६।
९) अध्यापक: अमितभट्टाचार्यकृता (२०१३ आङ्गलाब्द:), भारतीयदर्शनेर रूपरेखा, अभयवर्मनप्रकाशिता, संस्कृतवुकडिपो।
१०) नारायणभट्टकृत:, मानमेयोदय: (प्रथमखण्ड:), श्रीदीननाथत्रिपाठीनवतीर्थसम्पादित:, विनयेन्द्रनाथचतुर्धुरिप्रकाशित:, संस्कृतकलेज, कलिकाता ७३।

Received on: 14/03/2020 Accepted on: 12/02/2021

# अद्वैतवेदान्ते जीवात्मनः गत्यागतिपर्यालोचनम्

निमाई-रक्षितः*

**सारसंक्षेपः**

भगवता बादरायणेन विरचितं ब्रह्मसूत्रं वेदान्तदर्शनस्य मूलसूत्रग्रन्थः। अस्मिन् प्रपञ्चे परमसुखप्राप्तिपूर्वकात्यन्तिकदुःखनिवृत्त्यर्थं भगवता बादरायणेन विरचितं ब्रह्मसूत्रम्। परवर्तिनि काले ब्रह्मसूत्रमाश्रित्य विविधैः भाष्यकारैः विविधानि भाष्याणि सञ्जातानि। जीवब्रह्मणोरैक्यप्रतिपादनमेव वेदान्तदर्शनस्य मूलोऽभिप्रायः। जीवः स्वयमेव ब्रह्मस्वरूपोऽपि सन् कथमात्मस्वरूपं ज्ञातुं न पारयति,संसारे पुनरपि कथमावर्तते,पुनरपि जननं पुनरपि मरणं पुनरपि जठरग्रहणं कथं तस्य भवति इति सर्वासां जिज्ञासानां विचारार्थं प्रतिपादितमिदं शोधपत्रम्।




अस्मिन् शोधप्रत्रे सन्देहा जायन्ते जीवात्मनः आदौ गमनागमनं सम्भवति न वा? कथम्? आत्मनः सर्वव्याप्यत्वात्। सर्वेषां जीवानां गमनागमनं गर्भधारणं वा भवति न वा? केषां भवति केषां न भवति? भवति चेत् कया पक्रियया? इत्यादीनां विविधानां प्रश्नानां समाधानं क्रमेण दीयते अस्मिन् शोधप्रत्रे। एतदर्थं विषयोऽयं मया गृहीतः।

**Ph.D Scholar, Sanskrit Department, University of Calcutta.*

**कुञ्चीभूतपदानि-**

वेदान्तः, अद्वैतम्, जीवः, गत्यागत्यादिश्च ।

## अद्वैतवेदान्ते जीवात्मनः गत्यागतिपर्यालोचनम्

**सारसंक्षेपः**

भगवता बादरायणेन विरचितं ब्रह्मसूत्रं वेदान्तदर्शनस्य मूलसूत्रग्रन्थः। अस्मिन् प्रपञ्चे परमसुखप्राप्तिपूर्वकात्यन्तिकदुःखनिवृत्त्यर्थं भगवता बादरायणेन विरचितं ब्रह्मसूत्रम्। परवर्तिनि काले ब्रह्मसूत्रमाश्रित्य विविधैः भाष्यकारैः विविधानि भाष्याणि सञ्जातानि। जीवब्रह्मणोरैक्यप्रतिपादनमेव वेदान्तदर्शनस्य मूलोऽभिप्रायः। जीवः स्वयमेव ब्रह्मस्वरूपोऽपि सन् कथमात्मस्वरूपं ज्ञातुं न पारयति,संसारे पुनरपि कथमावर्तते,पुनरपि जननं पुनरपि मरणं पुनरपि जठरग्रहणं कथं तस्य भवति इति सर्वेषां जिज्ञासानां विचारार्थं प्रतिपादितमिदं शोधपत्रम्।

**कुञ्चीभूतपदानि-** वेदान्तः, अद्वैतम्, जीवः, गत्यागत्यादिश्च

**विषयचयनकारणम्**

अद्वैतवेदान्तमाधारीकृत्य विविधविश्वविद्यालये विविधशोधपत्रे विविधैः गवेषकैः ‘पुनर्जन्मविमर्शः’, ‘जीवस्वरूपा’दिविषये गवेषणं कृतम्। यद्यपि अद्वैतवेदान्ते विविधानि गवेषणानि विविधैः गवेषकैः विविध-विश्वविद्यालये कृतानि तथापि “अद्वैतवेदान्ते जीवात्मनः गत्यागतिपर्यालोचनम्” इत्यस्मिन् विषये अधुनापि मद्ज्ञानतः किमपि गवेषणपत्रं नैव रचितम्। पुनश्च विषयपठनकाले मन्मनसि विविधाः प्रश्नाः सञ्जिताः। एतदर्थं विषयोऽयं मया गृहीतः।

**मन्मनसि सञ्जाताः संशयाः शोधप्रत्रस्य मूलाभिप्रायाश्च**

अस्मिन् शोधप्रत्रे सन्देहा जायन्ते जीवात्मनः आदौ गमनागमनं सम्भवति न वा? कथम्? आत्मनः सर्वव्यप्यत्वात्। सर्वेषां जीवानां गमनागमनं गर्भधारणं वा भवति न वा? केषां भवति केषां न भवति? भवति चेत् कया पक्रियया? इत्यादिनां विविधानां प्रश्नानां समाधानं क्रमेण दीयते अस्मिन् शोधप्रत्रे।

**गवेषणापद्धतिः**

गवेषणाकार्यमिदं सम्पूर्णतया ग्रन्थोपेतं न तु क्षेत्रसमीक्षात्मकम् । प्राथमिकतथ्यरूपेण पुस्तकानि सहायतां करिष्यन्ति। विविधानि भाष्याणि टीकाटिप्पण्यादीनि च कार्येऽस्मिन्

सहायकानि भविष्यन्ति। अस्मिन् विषये एतावत्कालं यानि गवेषणानि जातानि तेषामपि तथ्यानि ज्ञातव्यानि। विषयेऽस्मिन् अद्वैतादिदर्शने विविधतत्त्वविषये मतवादसादृश्यानि वैसादृश्यानि, विविधवादेषु विराजातानि मतपार्थक्यानि यथार्थरूपेण विश्लेषणात्मकदिशा तुलनात्मकदिशा च प्रदर्शयिष्यन्ते मया।

**भूमिका-**

प्रपञ्चेऽस्मिन् स्वकीयमाहात्वेन भासते भारतं नाम कर्मधर्मभूमिः। कर्मधर्मभूमिभारतमिदं समेषां दर्शनानामाकरः। किमिदं दर्शनम्? किं वा लक्ष्यं तेषामिति प्रश्ने आमनन्ति दार्शनिकाः येन साधनेन बिश्वमिदं वस्तुजगत् जीवात्मा प्रकृतिश्च यथार्थरूपेण दृश्यन्ते ज्ञायन्ते समीक्षीयन्ते तत् दर्शनम्।

जगति किं शाश्वतं तत्त्वम्? जीवनस्य कर्तव्यं किम्? जीवात्मनः स्वरूपम् किम्? क पुनर्जायते? केन रुपेण पुनर्जायते? क वा न? क सृष्टिकर्ता? कास्तवत् सृष्टिप्रक्रिया एतेषां समेषां प्रश्नानां समाधनं दीयते दर्शनेन।

भारतीयं पाश्चात्यश्चेति दर्शनस्य द्वैविध्यत्वं स्वीकृतं दार्शनिकैः। भारतीयदर्शने नैकः सम्प्रदायो विद्यते। एकैकस्य दर्शनस्य सिद्धान्तरूपेण प्रतिपाद्यविषयप्रतिस्थापनाय एकत्र अनेकाः दार्शनिका उपस्थितवन्तः। प्रधानतया आस्तिकनास्तिकभेदात् भारतीयदर्शनस्यापि द्वैविध्यत्वं स्वीकृतम् दार्शनिकैः। “अस्ति नास्ति दिष्टम् मति”[1] इति सूत्रेण ठक्प्रत्यये “तस्य ठस्येक”[2] इति सूत्रेण आस्तिकनास्तिकशब्दयोः निस्पत्तिः भवति। सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमांसा-उत्तरमीमांसा इति षडेव आस्तिकदर्शनरूपेण प्रसिद्धानि। एतेषु आस्तिकेषु वेदान्तदर्शनमन्यतमम्। वेदान्तेषु द्वैताद्वतादि-विविधाः सम्प्रदायाः सन्ति। एतेषु सम्प्रदायेषु शाङ्करभाष्यभाषिते अद्वैते जीवात्मनः मरणादनन्तरं विविधलोकगमनागमनमधुना विविधभाष्यादिदिशा आलोच्यते।

**विषयप्रवेशः-**

“सत्यं ज्ञानमनन्तं ब्रह्म” इति श्रुतेः ब्रह्म सच्चिदानन्दं नित्यम् आनन्दस्वरूपञ्च। “अयमात्मा ब्रह्म” इति श्रुतेः आत्मा एव ब्रह्मपदवाच्यम्। स्थूलदेहधारणादनन्तरम् अयमेवात्मा जीवात्मारूपेण अभ्युपगम्यते। वेदान्तदिशा स्थूलदेहस्य नाशो दृश्यते न तु जीवात्मनः आत्मनः वा। स्थूलदेह हन्यते न तु जीवात्मा

“न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता न वा भूयः” इति स्मृतेः।

1. पाणीनियसूत्रम्-४-४-६०
2. पाणीनियसूत्रम् -७-३-५०

"वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि"इति स्मृतेः देहान्तरपरिवर्तनमिदमिदं जीवात्मनः पुनःपुनः दृश्यतेआकर्मफ़लभोगम्। वस्तुतः जीवात्मनः नास्ति जन्म न वा मृत्युः अविनश्वरत्वात्। जन्ममृत्युस्तु स्थुलदेहस्य केवलम्। अर्थात् जीवात्मनः केवलं देहान्तरपरिवर्तनं दृश्यते न तु जन्म न वा मृत्युः।जीवात्मनः देहान्तरपरिवर्तनमिदं वेदान्तदर्शने जीवगत्यागतिः जायस्वम्रीयस्वगति इति विविधा नाम्ना परिचीयते।

जीवात्मनः देहान्तरपरिवर्तनमिदं देहान्तरधारणं वा विविधप्रक्रियामाध्यमेन साध्यते। एकस्मात् देहपरित्यागादनन्तरं धूममार्गेण देवयानेन वा कर्माफ़लानुसारेण जीवात्मना चन्द्रलोकादिगतिस्त्रयेषु गतिरेकं प्राप्यते। प्रक्रियेयं जीवस्य गतिः इति नाम्ना कथ्यते। येन खलु ब्रह्मलोकः प्राप्यते, तेन अस्मिन्लोके नैव आगम्यते, येन चन्द्रलोकः प्राप्यते तेन खलु चन्द्रलोके कर्मफलक्षयादनन्तरं पुनरपि अस्मिन् लोके मनुष्यादिशरीरं प्राप्यते। उक्तम् गीतायाम्-

"शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते
एकया यात्यनावृत्तिमन्ययावर्तते पुनः"।[3] इति।

एतैः पुनःपुनः मरणं जठरग्रहणं प्राप्यते आकर्मफलभोगात्। सूक्ष्मभूतपरिवेष्टितजीवः पञ्चाग्नौ श्रद्धासोमादि-आहुतिक्रमे अन्तिमे मातृगर्भं प्रविशते। प्रक्रियेयं जीवस्य आगतिः इति नाम्ना कथ्यते। परन्तु उक्तद्वयमार्गभ्रष्टानां जायस्व-म्रियस्व इति तृतीया गति प्राप्यते। ते खलु कीटादिरुपेण अस्मिन् लोके विराजते इति छान्दोग्ये वर्णितम्। गतिरियं अत्यन्तं दुःखदा । एवं त्रिविधा जीवगति विद्यते अद्वैतदिशा। मुण्डकोपनिषदि आम्नातम्-

"इष्टापूर्तं मन्यमाना वरिष्टं नान्यच्छ्रेयो वेदयन्ते प्रमुढाः
नाकस्य पृष्टे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति"।[4] इति।

अर्थात् ये खलु जनाः जीवत्काले सुखभोगार्थं यज्ञोपासना कुर्वन्ति अथवा लोकहितार्थे इष्टादिकर्म कुर्वन्ति ते जनाः मृत्योः परम् आतिवाहिकदेहेन कर्मफलभोगार्थं चन्द्रलोकं गच्छन्ति। स्वर्गभोगसमापनान्ते पुनरपि इहलोके ब्राह्मनादियोनिं प्राप्नुवन्ति, किञ्च कुक्कुरशुकरादियोनिमपि प्राप्नुवन्ति। तदेव आम्नातम् छान्दोग्यो-

"तद् य रमणीयचरणा अभ्यासो ह यत्ते रमणीयं योनिमापद्यरन्
ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह
कपूयचरणा अभ्यासो ह यत्ते कपूयां योनिमापद्यरत्रऽश्वयोनिम्
वा शूकरयोनिं वा चण्डालयोनिं वा"[5]। इति।

---

3. श्रीमद्भगवद्गीता-८/२६
4. मुण्डकोपनिषद्-१/२/१०
5. छान्दोग्योपनिषद्-५/१०/०७

अग्नि-ज्योति-शुभदिन-शुक्लपक्षाद्युत्तरायनकाले देहत्यागिनः जीवात्मनः अनेन मार्गेन ब्रह्मलोकं गच्छन्ति। एते जीवात्मनः आदौ देवयानेन अग्निलोकं, ततः वायुलोकं ततः वरुणलोकं ततः आदित्यलोकं अनन्त्रम् इन्द्रलोकं तस्मात् परं प्रजापतिलोकं अन्तिमे च ब्रह्मलोकं प्राप्नुवन्ति। आम्नातं कौषितकी-उपनिषदि-

"स एतं देवयानं पन्थानमापद्याग्निलोकम् आगच्छति, स वायुलोकं स आदित्यलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकं स ब्रह्मलोकं....सोऽऽमस्मीति"[6]।इति।

अस्मिन् लोके न पापमस्ति, न शोकमस्ति न दुःखमस्ति न मृत्यु अस्ति। "अथः य आत्मा सेतुवृधितिरेषां लोकानामसंभेदाय नैतं सेतुमोहरात्रे तरतो न जरा न म्रृत्युर्न शोको न सुक्रृतं न दुष्कृतं सर्वे पापमानोहतो निवर्तस्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः"[7]।

उपर्युक्तगतिद्वय-व्यततिरिच्य वेदान्तदर्शने जायस्वम्रीयस्वगति-नाम्ना तृतीयागति स्वीकृता वेदान्ताचार्यैः। छान्दोग्योपनिषदि आम्नातम्-" अथः एतयोः पथोः न कतरेणचन तानि इमानि क्षुद्राणि असकृत् आवर्त्तीनि भूतानि भवन्ति जायस्व मीर्यस्व इति एतत् तृतीयं स्थानं तेन असौ लोक न सम्पूर्यते"।[8] इति। भगवद्शंकराचार्यैः ब्रह्मसुत्रभाष्ये उक्म्-"'ये च विद्यासाधनेन देवयाने पथि अधिकृताः नापि कर्मणा पितृयाने तेषाम् एषः क्षुद्रजन्तुलक्षणः असकृदावर्त्ती तृतीयः पन्ता भवति इति"[9]।

अतः दृश्यते ये खलु ब्रह्मलोकं गच्छन्ति ते तु नैव प्रत्यावर्तन्ते, ये खलु जायस्वम्रीयस्व इति नाम्ना तृतीयगतिं प्राप्नुवन्ति ते अपि नैव जीवरूपेण गर्भं धारयन्ति केवलं पितृयानगतिप्राप्ताः जनाः गर्भं धारयन्ति इति। छान्दोग्योपनिषदि आम्नायते –"त इह व्रीहियवा औषधिवनस्पतयतिलमासा इति जायन्ते"[10] इति। अत्र ते नाम जीवाः इति। अर्थात् जीवाः व्रीह्यादिद्वारा गर्भं स्थूलशरीरं वा धारयति। परन्तु केन माध्यमेन? "वेथ्य यथा पञ्चम्याम् आहुतौ आपः पुरुषाः वचसाः भवन्ति"[11] इति छान्दोग्योपनिद्। अत्र "पञ्चम्यामाहुतौ आपः पुरुषाः भवन्ति" इत्युक्ते सिद्धिर्भवति अपां पुरुषानां पूर्वे आहुतिचतुष्टयमस्ति। तर्हि किं तावत् आहुतिचतुष्टयम्? उच्यते भगवत्पादैः –"द्यु पर्ज्जन्यप्रुथिवीपुरुषयोषित्सु पञ्चसु अग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीः"[12] इति।

---

6. कौषितकी-उपनिषद्-३-६।
7. छान्द्योग्योपनिषद्-८/४/१
8. छान्दोग्योपनिषद्-५/१०/८
9. ब्रह्मशुत्रशाङ्करभाष्यम्-३/१/१७
10. छान्दोग्योपनिषद्-५/१०/६
11. छान्दोग्योपनिषद्-५/३/३
12. ब्रह्मशुत्रशाङ्करभाष्यम्-३/१/१

अर्थात् द्यु-पर्ज्जन्य-पृथिवी-पुरुष-योषीतिपञ्चाग्नौ श्रद्धा-सोम-वृष्ट्यन्न-रेतोरूपाः पञ्चाहुतीः। जीवानां देहत्यागादनन्तरं गत्यागतिप्रक्रियेयं वेदान्तदर्शनरित्या एका यज्ञप्रक्रिया। पञ्चाग्निविद्या इति नाम्ना कथ्यते इयं प्रक्रिया। यज्ञार्थं यथा अग्नेः आहुतिद्रव्यानां च प्रयोजनमस्ति तथैव गत्यागतिप्रक्रिया गर्भधारणप्रक्रिया इति यज्ञप्रक्रियायाम् अग्नि-श्रद्धा-आहुतिद्रव्यानि स्वीकृतानि सन्ति। मरनादनन्तरम् अद्भिः (भूतसूक्ष्म-सम्परिष्वक्तः) परिवेष्टितः जीवः आदौ द्युलोके (चन्द्रलोके) श्रद्धारुपेण हूयते, ततः सोमरूपेण पर्ज्जन्यलोके हूयते। तत्र प्रवर्षनादन्तरं पृथीविलोके व्रीहियवादिरूपेण जायन्ते। आम्नातम् छान्दोग्योपनिषदि-"ते इह् व्रीहियवाः ओषधिवनस्पतय तिलमाषाः इति जायन्ते"[13]। इति। तस्मात् परं पुरुषशरीरे व्रीह्यादिभावस्य रेतःसिगभावः आम्नायते अर्थात् पुरुषशरीरे रेतरूपेण विराजते। आम्नातम् छान्दोग्योपनिषदि-" यः यः अन्नम् अत्ति यः रेतः तद्भूयः एव भवति"[14]। अथः रेतःसिग्भावस्य अनन्तरं योनौ निषिक्ते रेतसि योनेः अधि शरीरम् अनुशयिनाम् अनुशयफलिपभोगाय जायते। आम्नातम् छान्दोग्योपनिषदि-"तत् ये इह रमणीयचरणाः"[15]। ब्रीह्यादिभावावसरे शरीरमिदं सुखदुःखान्बितं भवति।

जीवानां गर्भधारणप्रक्रिया इयं चक्राकारेण आमुक्तिकालं चलति। कर्मफलानुसारेण जीवाः पितृ-देवलोकं प्राप्यन्ते। ये खलु देवलोकं प्राप्यते नास्ति तेषां पुनरागमनं परन्तु पितृलोकप्राप्तानां पुनरपि जननं पुनरपि मरणं पुनरपि जठरग्रहणं दृश्यते। व्रीह्यादिक्रमेण ते जीवाः शरीरं प्राप्यन्ते। परन्तु व्रीह्यादिग्रहणं न तु जीवानां मूख्यजन्म। मुख्यजन्म तु मातृगर्भे शरीरग्रहणम्।

**पुनर्जन्मनि सन्देहः**

केचित् वदन्ति पूर्वजन्मनः किमपि स्मरणं वयं कर्तुं न पारयामः अतः पुनर्जन्म मिथ्या एव प्रतिभाति इति सन्देहे उच्यते यत् वर्तमानकाले अपि सङ्घटितान् सर्वान् प्रसङ्गान् सर्वे जनाः स्मरणं कर्तुं न शक्नुवन्ति परन्तु ते प्रसङ्गाः नैव घटिता इति वक्तुं न शक्यते। वस्तुतस्तुः कदापि एकस्यैव प्राप्तजन्मनः कर्माणि अस्माकं मनसि असह्यं मनस्तापं जनयन्ति। अप्रियप्रसङ्गस्मरणेन मनः शोकाकुलं भवति इति प्रायः दृश्यते। मनुजीवने सुखं सर्षपमात्रं परन्तु दुःखं पर्वतसमम्। अतः यदि पूर्वजन्मानां सर्वेषां स्मरणं मनसि आयाति चेत् का गतिः भविष्यति मनुष्यानामिति सर्वैः ज्ञातम्। अतः वक्तुं शक्यते ईश्वरसृष्टमनुष्यजीवने पूर्वजन्मनः विस्मरणे ईश्वरस्य दयालुता एव कारणम् इति यथा सत्यं तथैव मुनिजनाः योगीनश्च ध्यानवलेन पूर्वजन्मनः विस्मरणं कर्तुं शक्नुवन्ति अतः पूर्वजन्मनः विस्मरणात् पुनर्जन्मनः अस्तित्वं नास्ति इति न सत्यम्।

---

13. छान्दोग्योपनिषद्-५/१०/०६
14. छान्दोग्योपनिषद्-५/१०/६
15. छान्दोग्योपनिषद्-५/१०/७

**पर्यालोचनम्-**

अस्मादालोचनादयमेवायाति सिद्धान्तः यत् मृत्योः परं जीवात्मनः विविधलोके गमनं भवति, विविधलोकात् कर्मफलानुसारेण पुनरपि आगमनं भवति मनुष्यादिरूपेण। परन्तु सन्देहः जायते जीवात्मनः गमनागमनं सम्भवति न वा? "सर्वं खल्विदिं ब्रह्म" इति श्रुतेः जीवात्मनः सर्वत्र विराजत्वात् कथं तस्य आत्मनः गमनागमनं सम्भवति? वस्तुतः एकस्मिन् स्थाने यस्य अभावः दृश्यते, तस्मिन् स्थाने तस्य गमनं सम्भवति परन्तु जीवात्मनः अभावः कुत्रापि नैव दृश्यते अद्वैतदिशा अतः कथं जीवात्मनः गमनं कथं वा तस्य आगमनमिति जीज्ञासायां वक्तुं शक्यते यत् जीवात्मनः गमनागमनं नैव भवति, केवलं पञ्चसूक्ष्मभूतानां गमनागमनं भवति। न्यायदिशा यथा मनसः गमनागमनं तथैव वेदान्तदिशा पञ्चसूक्ष्मभूतानाम्। जीवसंज्ञाविषये अद्वैतिनामभिप्राय "इयं बुद्धिः ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोशो भवति। अयम् एव कतृत्व-भोक्तृत्व-सुखित्व-दुःखित्वादि अभिमानत्वेन इहलोक-परलोकगामी व्यवहारिकः जीवः इत्युच्यते" इति। अतः मरणादनन्तरं विविधलोके सर्वविराजितस्य आत्मनः सह पञ्चसूक्ष्मभूतानां संयोगः भवति। संयोगत्वात् पञ्चसूक्ष्मभूतारोपितात्म कर्मफलानुसारेण पुनरपि इहलोके आगमं प्रचलति अखण्डरूपेण। अतः अस्मात् जन्ममरणचक्रात् मोक्ष एव परमपुरुषार्थः हिन्दूनाम्। जन्ममरणचक्रात् मोक्ष एव जीवनस्य ध्येयं इति वैदिकदर्शानानं सिद्धान्तः। वैदिक-बौद्ध-जैनादयः सर्वे अपि सम्प्रदायाः पुनर्जन्मनि विश्वसन्ति। केवलं चार्वाकाः "भस्मिभूतस्य देहस्य पुनरागमनं कुतः" इत्युक्त्वा पुनर्जन्म निषेधन्ति इति शिवम्।

**परिशीलिता ग्रन्थाः प्रबन्धाश्च**


**संस्कृतभाषा-सम्पादित-ग्रन्थाः**

- ब्रह्मसूत्रशाङ्करभाष्यम्. २०१२. सम्पादकौ अनन्तकृष्णशास्त्री वासुदेवशर्मा च. नई दिल्ली : राष्ट्रियसंस्कृतसंस्थानम्,.
- मध्वाचार्यः. १९८५. श्रीभाष्यम्,सम्पादकः मदनलालशास्त्री. बम्बई
- वल्लभाचार्यः. १९८५.ब्रह्मसूत्र-अणुभाष्यम्. सम्पादकः मदनलालशास्त्री. बम्बई

**बङ्गभाषा-सम्पादित-ग्रन्थाः**

- बादरायणः. २०१६.ब्रह्मसूत्र. सम्पादकः.स्वामी वीरेश्वरानन्दः. कलकाता : उद्बोधन कार्यालयः.
- विद्यारण्यमुनिः. १४१८ बङ्गाब्दः. पञ्चदशी. सम्पादकः अशोककुमारबन्द्योपाध्यायः. कलकाता : सदेश.
- वेदान्तदर्शनम् (प्रथम अध्याय). २०१३ (नवमपुनमूद्रणम्). अनुवादकः व्याख्याता च स्वामीबिश्वरूपानन्दः.कलकाताः : उद्बोधन कार्यालय.

**बङ्गभाषाग्रन्थाः**

- उपनिषद्. २००७(तृतीय-मूद्रणम्).गोरक्षपूरम्.गीताप्रेस

**आङ्गलभाषाग्रन्थाः**

- Newton, Michael. 1994(1st Ed).Journey of Soul.. U.S.A :Liewellyn Publication,
- Paul, Douglas.2013. Advaita View of Truth, Benaras : M.L.B.D
- Willam, Barton. 1996.Transmigration of Soul. U.S.A : Author Preferred Edition,

Received on: 16/03/2020 Accepted on: 11/02/2021

# मीमांसकनये शाब्दबोधे नञर्थान्वयः

शंकर-मण्डलः*

**विषयसारः**

नञर्थप्रतिषेधो द्विविधः पर्युदासः प्रसज्यश्चेति। पर्युदासे हि विधेः प्राधान्यं, प्रसज्ये तु निषेधस्यैव। वृत्त्या पदोपस्थितपदार्थानामाकाङ्क्षाभास्यसंसर्गज्ञानमेव शाब्दबोधः। शाब्दबोधे चैकं मुख्यं विशेष्यं भवति, वाक्यगतानामन्येषां च पदार्थानां तत्रैव साक्षात्परम्परया वान्वयो भवति। मीमांसका हि भावनामुख्यविशेष्यकं शाब्दबोधमङ्गीकुर्वन्ति। तेषां नये द्विविधयोः भावनयोः मध्ये शाब्दीभावनाया एव मुख्यत्वात् सा एव भवति मुख्यं विशेष्यम्। सा च भावना "यजेत स्वर्गकाम" इत्याद्यत्र लिङ्प्रत्ययप्रतिपाद्या। अत एव मीमांसका बहुविचारमाध्यमेन प्रकटयन्ति यत् "न कलञ्जं भक्षयेत्" इत्यादिवाक्ये नञर्थस्य प्रत्ययार्थभावनायामेवान्वयो भवति। तदा नञर्थो भवति प्रसज्यप्रतिषेधः। किन्तु नञः प्रत्ययार्थान्वये द्विविधं बाधकं वर्तते- "तस्य व्रतमि"त्युपक्रमः विकल्पप्रसक्तिश्च। तत्र प्रथमबाधकसद्भावात् "नेक्षेत उद्यन्तमादित्यम्" इत्याद्यत्र एकवाक्यताहानिसद्भावात् नञः प्रत्ययार्थान्वयमनङ्गीकृत्य धात्वर्थे एवान्वयः स्वीकृत्य ईक्षणविरोध्यनीक्षणसङ्कल्प एव नञा लक्षणया प्रतिपाद्यते। स चार्थः पर्युदास एव। एवं च यजतिषु ये यजामहं करोति नानुयाजेषु इत्यत्रापि नञः प्रत्ययार्थान्वये विकल्पप्रसक्तिः स्यात्। विकल्पश्चाष्टदोषदुष्टः। अत एव बाधकसद्भावात् नञः तत्र प्रत्ययार्थान्वयं परित्यज्य अनुयाजनाम्नान्वयमङ्गीकृत्य अनुयाजव्यतिरिक्तत्वरूपोऽर्थो लभ्यते।

**शब्दसङ्केतः**–प्रसज्यप्रतिषेधः, पर्युदासः, शाब्दबोधः, भावना, विकल्पः

## मीमांसकनये शाब्दबोधे नञर्थान्वयः

भारतीयदार्शनिकपरम्परायां षट्सु आस्तिकदर्शनेषु आन्यतम्यं भजते महर्षिजैमिनिप्रणीतं मीमांसादर्शनम्। मीमांसा नाम विचारशास्त्रम्। मीमांसाशब्दः पूजितविचारार्थे प्रसिद्धः। "मान् पूजायाम्""माङ् माने" इति पूजार्थे मानार्थे च धातुद्वयम्। तत्र "मान्वधदान्शान्भ्यो दीर्घश्चाभ्यासस्य"[1] इति सूत्रेण माङ् इत्यस्य धातोर्नान्तत्वं निपात्य अनिच्छार्थे सन्प्रत्ययेऽभ्यासस्य

1. पाणिनीयसूत्रम्(३/१/६)

**Ph.D Scholar, Sanskrit Department, Ramakrishna Mission Vidyamandira.*

च दीर्घे मीमांसाशब्दो निष्पद्यते। वेदार्थविचारार्थमेव मीमांसादर्शनस्य समुद्भवः। कथितं च -

"Discussion and doubts became more common about the many intricacies of the sacrificial rituals and regular rational enquiries into them were begun in different circles by different scholars and priests. These represent the beginnings of Mimamsa etc."[2]इति।

वेदवाक्यार्थविचारार्थमादौ वाक्यार्थबोध आवश्यकः। स च बोध एव शाब्दबोध इत्युच्यते। शाब्दबोधो नाम पदार्थानां परस्परसम्बन्धज्ञानम्। तत्र प्रतिदर्शनं शाब्दबोधप्रकारो हि भिन्नः।

**• मीमांसकनये शाब्दबोधः**

शाब्दबोधो वाक्यार्थज्ञानम्। शब्दाज्जायमानो बोधः शाब्दबोधः। तत्र बोधे शाब्दत्वं च शब्दात्प्रत्येमीत्यनुभवसिद्धो जातिविशेषः। शाब्दबोधलक्षणं च लक्षितं वाक्यपदीये- "शाब्दबोधलक्षणं तु शक्तिलक्षणान्यतरसम्बन्धेन पदजन्यपदार्थस्मृतित्वावच्छिन्नकारणतानिरूपितकार्यत्वम्"[3] इति। शाब्दबोधे च पदज्ञानं करणं, पदार्थोपस्थितिर्व्यापारः, शाब्दबोधः फलमं, पदज्ञानस्य च शक्तिज्ञानम् आकांङ्क्षायोग्यतासन्निधीनां ज्ञानं च सहकारि इति नव्यनैयायिकानां मतम्। उक्तं च भाषापरिच्छेदे-

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी"।।[4] इति।

"शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते"[5]। संसर्गो नाम सम्बन्धः। संसर्गमर्यादा नाम चाकांक्षा। तेन वृत्त्या पदोपस्थितपदार्थानां आकांक्षाभास्यसंसर्गज्ञानमेव शाब्दबोधः। शाब्दबोधो ह्येकं विशिष्टं ज्ञानम्। तत्र च मुख्यं विशेष्यं किं भवतीत्यस्मिन् विषये सन्ति दार्शनिकानां वैमत्यम्। तथाहि नैयायिकाः प्रथमान्तार्थमुख्यविशेष्यकं शाब्दबोधमङ्गीकुर्वन्ति। प्रथमान्तपदसमभिव्याहाराभावे कुत्रचित् निपातार्थमुख्यविशेष्यकः, क्वचित् कृतिमुख्यविशेष्यकः, क्वचिच्च व्यापारमुख्यविशेष्यकः शाब्दबोधो भवति तेषां नये। वैयाकरणा हि व्यापारमुख्यविशेष्यकं शाब्दबोधमङ्गीकुर्वन्ति। मीमांसकास्तु भावनामुख्यविशेष्यकमेव शाब्दबोधं मन्यन्ते। तथाहि कथितं मीमांसाशास्त्रसारे-

---

2. The Systems of Indian Philosophy (Kapoor 2004,p.378)
3. भर्तृहरिप्रणीतं वाक्यपदीयम्
4. भाषापरिच्छेदः (भट्टाचार्य २०१६, पृ.४१०)
5. व्युत्पत्तिवादः (हरेरामत्रिपाठी २०११, पृ.१)

"तत्र शाब्दबोधे प्रथमान्तमेव मुख्यविशेष्यमिति नैयायिकाः। तेषां मते देवदत्तः पचति इत्यस्य पाकानुकूलकृत्याश्रयो देवदत्त इति, देवदत्तस्तण्डुलं पचति इत्यस्य तण्डुलकर्मकपाकानुकूलकृत्याश्रयो देवदत्त इति च बोधः। धात्वर्थमुख्यविशेष्यकः शाब्दबोध इति वैयाकरणाः। तेषां मते देवदत्तः पचति इत्यत्र देवदत्तनिष्ठः पाकः इति, देवदत्तस्तण्डुलं पचति इत्यत्र देवदत्तनिष्ठः तण्डुलकर्मकः पाकः इति च बोधः।

तत्र प्रथममते कारकाणां क्रियया सहैवान्वयनियमात् प्रथमार्थस्याप्यभिहितकारकस्य क्रियायामन्वयस्यैव युक्तत्वात्तादृशनियमोल्लङ्घनं, द्वितीयमते सर्वत्र प्रत्ययार्थः प्रधानम् इति यो नियमस्तस्य धात्वनन्तरप्रत्ययार्थे परित्यागात्तादृशनियमोल्लङ्घनं च दोषः इति मीमांसका आख्यातार्थमुख्यविशेष्यकं शाब्दबोधं मन्यन्ते"[6] इति।

मीमांसकनये आख्यातप्रत्ययार्थश्च भावना एव। "भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः"[7] इति। भवितुः उत्पद्यमानस्य उत्पत्त्यनुकूलो भावयितुः प्रयोजकस्य व्यापारविशेषो भावना इत्यर्थः। यथा यजेत स्वर्गकाम इत्यत्र उत्पद्यमानस्य धात्वर्थस्य स्वर्गस्योत्पत्त्यनुकूलो लिङो व्यापारविशेषः। सा च भावना द्विविधा- शाब्दीभावना आर्थीभावना च। तत्र शाब्दीभावना नाम पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः। सा च लिङंशेनोच्यते। पुनश्च प्रयोजनेच्छाजनितक्रियाविषयव्यापार आर्थीभावना। सा चाख्यातत्वांशेनोच्यते। द्विविधयोः भावनयोः मध्ये शाब्दी भावना एव प्रधाना, तत्साध्या आर्थीभावना तु गौणी। अतः मीमांसकनये शाब्दबोधरूपविशिष्टबुद्धौ शाब्दी भावना एव मुख्यं विशेष्यं भवति।

- **शाब्दबोधे नञर्थान्वयः**

मीमांसकनये शाब्दबोधे भावनाया एव मुख्यविशेष्यत्वाद् वाक्यगतानां सर्वेषामेव पदार्थानां तत्रैव साक्षात्परम्परया वान्वयो भवति। एवं "न कलञ्जं भक्षयेत्" इत्यस्मिन् निषेधवाक्ये नञर्थस्य कुत्रान्वयो भवतीति विचार्यम्। संस्कृतवाङ्मये चतुर्विधपदेषु आन्यतम्यं भजते निपातः। "उच्चावचेष्वर्थेषु निपतन्ति"[8] इति निपातलक्षणं कथितं यास्काचार्येण। निपातेष्वन्यतमो भवति नञ्। नञर्थो हि अभावः। तत्र नञर्थस्य मुख्यविशेष्येण प्रत्ययार्थशब्दभावनया साक्षादन्वयो भवतीति मीमांसकमतं प्रत्यवतिष्ठता पूर्वपक्षिणोच्यते यत् नञा सह धात्वर्थस्यैव अव्यवधानेन साक्षात्सम्बन्धो विद्यते, न तु व्यवहितेन प्रत्ययार्थेन। किञ्च प्रथमातिक्रमणे मानाभाव इति न्यायेन अव्यवहितं परित्यज्य व्यवहितेनान्वयो नानुभवसिद्धः। ततश्च नञर्थस्य धात्वर्थे एवान्वयः,

---

6. मीमांसाशास्त्रसारः
7. अर्थसंग्रहः (कामेश्वरनाथमिश्र २०१९, पृ.२५)
8. निरुक्तम् (तारकनाथ अधिकारी २०१६, पृ.७५)

प्रत्ययार्थे अन्वयश्च धात्वर्थविशेषणत्वेन इति। तदेतन्मतं निराचिकीर्षुणां सिद्धान्तिनां मतमित्थं यत् भक्षयेत् इत्यत्रास्ति अंशद्वयं- भक्षधातुः प्रत्ययश्च। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यं, प्रकृत्यर्थस्तत्रोपसर्जनीभूत इति सर्वजनविदितमेव। न ह्यन्योपसर्जनत्वेनोपस्थितमन्य त्रान्वेति। अतः राजपुरुषमानय इत्यादौ आनयनक्रियाया अन्वयः पुरुषविशेषणे राज्ञि न भवति तस्योपसर्जनत्वात्। एवं च राजपुरुषमानय इत्युक्ते आनयनं पुरुषस्यैव भवति न तु राज्ञः। अत एवात्रापि प्रत्ययार्थोपसर्जनत्वेन धात्वर्थे नञर्थस्यान्वयो न भवति। तदुक्तं लौगाक्षिभास्करेण-

"न तावदत्र धात्वर्थस्य नञर्थेनान्वयः, अव्यवधानेऽपि तस्य प्रत्ययार्थभावनोपसर्जनत्वेनो पस्थितेः"[9] इति।

"एवं च धात्वर्थस्य नञर्थेनान्वयासम्भवात् कलञ्जादिपदार्थस्यापि कारकोपसर्जनत्वेनोपस्थितस्य तत्रान्वयासम्भवाच्च परिशेषात् प्रत्ययार्थस्यैव नञर्थेन अन्वयो भवति"[10]। ननु च भोः प्रत्ययार्थो द्विविधः आख्यातत्वांशवाच्यार्थभावना लिङंशवाच्यशाब्दभावना चेति। आर्थभावनापि शब्दभावनायामुपसर्जनीभूता। अत एव तत्रापि न नञर्थान्वयः। एवं च "न कलञ्जं भक्षयेत्" इत्यादौ कलञ्जादिपदार्थस्य धात्वर्थस्य च नञर्थेनान्वयो भवतैव निरस्तः, प्रत्ययार्थस्यापि अर्थभावनारूपस्य नञर्थेनान्वयानङ्गीकारे प्रत्ययार्थत्वाविशेषात् शब्दभावनाया तेनान्वयासम्भवेन अनन्वितशब्दस्याप्रामाण्यापत्तिरिति चेदत्रोच्यते- नात्र प्रत्ययार्थत्वं नञर्थान्वये प्रयोजकं किन्तु सर्वापेक्षया मुख्यत्वेनोपस्थिततत्वम्। सर्वापेक्षया मुख्यत्वं च शब्दभावनायामबाधिततत्वम् इति हेतोः तत्रैव नञर्थस्यान्वयो भवति। अत एवोक्तं लौगाक्षिभास्करेण- "तत्रापि नाख्यातत्वांशवाच्यार्थभावनायास्तस्यालिङंशवाच्यप्रवर्तनोपसर्ज नत्वेनोपस्थितेः, किन्तु लिङंशवाच्यशब्दभावनायाः, तस्याः सर्वापेक्षया प्रधानत्वात्"[11] इति।

नञश्चैष स्वभावो यत् स्वसमभिव्याहृतपदार्थविरोधिबोधकत्वम्। यथा घटो नास्तीत्यादौ अस्तीतिशब्दसमभिव्याहृतो नञ् घटसत्त्वविरोधिघटासत्त्वं गमयति, तदिह लिङ्समभिव्याहृतो नञ् लिङर्थप्रवर्तनाविरोधिनीं निवर्तनामेव बोधयति। एवं कलञ्जं भक्षयेत् इत्यस्य वाक्यस्य मीमांसकसम्मतशाब्दबोधो हि – कलञ्जकर्मकभक्षणानुकूलपुरुषप्रवृत्तिजनकप्रवर्तना इति। न कलञ्जं भक्षयेत् इत्यत्र च नञर्थस्य प्रवर्तनायाम् अन्वये प्रवर्तनाविरोधिनी निवर्तना गम्यते। तदा शाब्दबोधस्तु इत्थं – कलञ्जकर्मकभक्षणानुकूलपुरुषप्रवृत्तिनिवर्तकनिवर्तना इति। इत्थमेव नञर्थस्य शब्दभावनायामन्वये तद्वाक्यं निषेधवाक्यत्वेन परिगणितं भवति। वैदिकवाक्यं हि पञ्चविधं वि धिमन्त्रनामधेयनिषेधार्थवादभेदात्।

---

9. अर्थसंग्रहः (कामेश्वरनाथमिश्र २०१९, पृ.१७०)
10. मीमांसार्थसंग्रहकौमुदी (राजेश्वरशास्त्रि १९६१, पृ.३१०)
11. अर्थसंग्रहः (कामेश्वरनाथमिश्र २०१९, पृ.१७०)

• **नञर्थस्य प्रत्ययार्थान्वये बाधकम्**

मीमांसकैः यत् नञर्थस्य प्रत्ययार्थशाब्दभावनायामन्वयोऽङ्गीक्रियते तत्र द्विविधं बाधकं वर्तते। तद्यथा- "तस्य व्रतम्" इत्युपक्रमः, विकल्पप्रसक्तिश्च। तथा च तत्र बाधोपस्थितेः नञर्थस्य कुत्र अन्वयो भवतीति अधस्ताद् बाधप्रदर्शनपुरःसरमालोच्यते।

• **तस्य व्रतम् इत्युपक्रमः**

गृह्यसूत्रे स्मृतिग्रन्थे वा तस्य ब्रतम् इत्यनेन स्नातकस्य कर्तव्यप्रकरणमारब्धम्। तथाहि मनुस्मृतिः-

"अतोऽन्यमया वृत्त्या जीवंस्तु स्नातको द्विजः।
स्वर्गायुष्ययशस्यानि व्रतानीमानि धारयेत्"।।[12] इति।

एतस्मिन्नेव प्रसङ्गे कथितं- नेक्षेत उद्यन्तमादित्यम्। तथाहि स्मृतिः-

"नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन।
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम्"।।[13] इति।

अत्रेदं द्रष्टव्यं यत् व्रतशब्दस्य कर्तव्यार्थे रूढत्वात्[14] उपक्रमवाक्ये यत् प्रतिज्ञातं तत्र किञ्चिदनुष्ठेयमेव प्रतिभाति। कानि च तानि अनुष्ठेयानि व्रतानि इत्यपेक्षायां स्नातकव्रतप्रदर्शनायास्य नेक्षेत इत्यादिवाक्यस्यावतारणम्। एवं च प्रस्तुतेऽस्मिन् वाक्ये यदि प्रत्ययार्थस्यैव नञर्थेनान्वयः क्रियते तर्हि प्रत्ययार्थप्रवर्तनाविरोधिनी निवर्तना एव प्रतीयते। शाब्दबोधश्चेत्थं – उद्यन्ताभिन्नादित्यकर्मक-ईक्षणानुकूलपुरुषप्रवृत्तिनिवर्तकनिवर्तना इति। किन्तु उपक्रमवाक्ये कर्तव्यप्रतिपादनाद्, अत्र च निवर्तनाप्रतिपादनात् पूर्वोत्तरवाक्ययोः एकवाक्यता एकतात्पर्यकत्वं वा न संगच्छते। एवं चात्र नञर्थे प्रत्ययार्थान्वयस्य बाधोपस्थितेः तत्र धात्वर्थस्यान्वयो भवति। तथाह्युक्तं लौगाक्षिभास्करेण- "यदा तु प्रत्ययार्थस्य तत्रान्वये बाधकं तदा धात्वर्थस्यैव तत्रान्वयः"[15] इति। किञ्चैवं नञः प्रत्ययेनान्वयासम्भवे प्रत्ययादवतारितो नञ् धातुना सह सम्बध्यते, धातुना नञः सम्बन्धे च न तस्य निषेधकत्वं सम्भवति विधायकसम्बद्धस्यैव नञः निषेधकत्वात्, निषेधकत्वस्य च विधायकत्वप्रतिक्षेपात्। नामधातुभ्यां योगे तु नञो न निषेधकत्वं युक्तं तयोरविधायकत्वात्। यथाहुः-

---

12. मनुसंहिता (४/१३)
13. मनुसंहिता
14. व्रतशब्दो हि कर्तव्यार्थे रूढः। अत्र व्रतशब्दार्थस्तु मानससङ्कल्परूपः। उक्तं च मेधातिथिभाष्ये- मानसः सङ्कल्पो व्रतमुच्यते इति।
15. अर्थसंग्रहः (कामेश्वरनाथमिश्र २०१९, पृ.१७४)

“नामधातुभ्यां योगे तु नैव नञ् प्रतिषेधकः।
वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनौ”।। इति।

एवं च धातुना सह नञः अन्वये पर्युदासरूपोऽर्थ एव नञः प्रतिभाति। उक्तं च –

“पर्युदासः स विज्ञेयो यत्र पूर्वपदेन नञ्”[16] इति।

एवं चात्र ईक्षधातुना सह नञो योगे ईक्षणविरोध्यनीक्षणसङ्कल्प एव लक्षणया प्रतिपद्यते। यद्यपि नञः अभाव एव शक्यार्थस्तथापि अभावस्याविधेयत्वात् पर्युदासाश्रयणेन धात्वर्थेक्षणविरोधी कश्चानात्र विधानयोग्योऽर्थो नञा लक्षणया प्रतिपद्यते, स च विधानयोग्यः पदार्थः अनीक्षणसङ्कल्प एव। उक्तं च कौमुद्यां-

“तथा च स्वसमभिव्याहृतपदार्थाभाव एव नञः स्वशक्यार्थो भवति, तथा च स्वसम्बन्ध्यमानधात्वर्थाभावं शक्त्या प्रतिपादयन् नञ् तदभावसम्बन्धिनं तदर्थविरोधिनं लक्षणया प्रतिपादयत्येव तदभावतद्विरोधिनोः सम्बन्धस्य सम्भवात्, दृश्यते हि तेजोऽभावतमसोः सम्बन्धः। तथा च उद्यन्तमस्तं यन्तं चादित्यं नेक्षिष्य इत्येवंरूपः सङ्कल्पः अत्रानुष्ठेयत्वेन विधीयमानो नञा लक्षणया प्रतिपाद्यते इति भावः”[17] इति।

- **विकल्पप्रसक्तिः**

नञर्थस्य प्रत्ययार्थभावनान्वये द्वितीयं बाधकं हि विकल्पप्रसक्तिः इति। तद्यथा- “यजतिषु ये यजामहं करोति नानुयाजेषु” इत्यत्र। यजतिषु सर्वेषु अपि यागेषु याज्यातः पूर्वं होत्रा “ये यजामह” इति पठनीयोऽनुयाजवर्जम् इति वाक्यार्थः। अत्र यजतिशब्दो यागवाचकः। अनुयाजव्यतिरिक्तेषु यजतिचोदनाचोदितेषु यागेषु याज्यातः पूर्वं “ये यजामह” इत्ययमंशः पठनीयः इति। एवं च याज्यातः पूर्वं ये यजामह इति पठित्वा ततो देवतावाचकं पदं द्वितीयान्तमुक्त्वा ततो याज्यापाठः। तदन्ते च वषट्कारप्रयोगः। यथा आग्नेययागे अध्वर्युणा प्रधानानुष्ठानाय याज्यापाठार्थम् “अग्निं यज” इति प्रैषे दत्ते अनन्तरं होता “ये यजामहेऽग्निं भुवो यज्ञस्य रजसश्च हव्यवाहॉ वौषट्” इति पठेत्। ततो अध्वर्युः जुह्वादौ स्थितं हविः पुरोडाशमाहवनीये प्रक्षिपेत् इति समुदितार्थः।

“यजतिषु ये यजामहं करोति नानुयाजेषु” इत्यस्य वाक्यस्यास्ति अंशद्वयम्। “यजतिषु ये यजामहं करोति” इत्यनेन प्रथमांशेन विधिरेव विहितः। द्वितीयं तु “नानुयाजेषु” इति वाक्यमसम्पूर्णम् अतः पूर्वस्मात् वाक्यात् “ये यजामहं करोति” इति अनुवर्तनीयम्। तेन च वाक्यशरीरं भवति इत्थं – नानुयाजेषु ये यजामहं करोति इति। अत्र यदि नञ् प्रत्ययार्थभावनायामन्वेति तर्हि अनुयाजेषु ये यजामहं न कुर्यादिति निवर्तना प्रतीयते। प्राप्तौ सत्येव निषेधो भवतीति न्यायात् सा

16. भट्टवार्तिकम्
17. मीमांसार्थसंग्रहकौमुदी (राजेश्वरशास्त्रि १९६१, पृ.३२०)

निवर्तना प्राप्तिपूर्वका एव। अत्र यागे ये यजामहकरणस्य च प्राप्तिः न रागतः अपि तु यजतिषु ये यजामहं करोति इति शास्त्रत एव। एवं च विधिप्रतिषेधयोरुभयोरेव शास्त्रगम्यत्वात् अनुयाजेषु ये यजामहकरणस्य विकल्प एव प्रसज्यते न तु बाधः। अत उक्तं भास्करेण- "शास्त्रप्राप्तस्य च प्रतिषेधे विकल्प एव न तु बाधः"[18] इति।

ननु यथा पदाधिकरणकहोमविधायकविशेषशास्त्रेणाहवनीयाधिकरणकहोमविधायकस्य सामान्यशास्त्रस्य बाधः क्रियते तद्वदत्रापि अनुयाजेषु ये यजामहमन्त्रप्रतिषेधरूपविशेषशास्त्रेण यागसामान्ये तन्मन्त्रविधायकस्य सामान्यशास्त्रस्य बाध एव युक्त इति चेदुच्यते- "परस्परनिरपेक्षयोरेव शास्त्रयोर्बाध्यबाधकभावात्। पदशास्त्रस्य हि स्वार्थविधानार्थमाहवनीयशास्त्रानपेक्षणान्निरपेक्षत्वम्। प्रकृते तु निषेधशास्त्रस्य प्रसक्त्यर्थं यजतिषु ये यजामहम् इत्यस्यापेक्षणान्न निरपेक्षत्वम्"[19] इति।

एवं च शास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे विकल्प एव। स चाष्टदोषदुष्टः। तथाहि श्रूयते-

"प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पना।
तदुज्जीवनहानाभ्यां विकल्पे चाष्टदोषता"।।[20] इति।

तथाहि यथा आग्नेयोऽष्टकपालः संस्कृतः पुरोडाशो यागाङ्गत्वेनावगतः। तत्र अपूपविशेषस्य पुरोडाशस्य प्रकृतिद्रव्याकाङ्क्षायामनियमेन यस्य कस्यचिद्द्रव्यस्य प्राप्तौ व्रीहिभिर्यजेत इति वाक्याद् व्रीहयो नियम्यन्ते, एवं यवैर्यजेत इति वाक्यात् यवा अपि नियम्यन्ते, तयोश्च एकार्थत्वाद् विकल्पः। अत्र अष्टौ दोषा हि-

"पूर्वं व्रीहिप्रयोगे यवशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणप्रामाण्यपरित्यागः, अननुष्ठापकत्वलक्षणाप्रामाण्यस्वीकारः, ततो द्वितीयप्रयोगे यवानुष्ठाने यवशास्त्रस्य पूर्वं त्यक्तं यत्प्रामाण्यं तत्स्वीकारः, स्वीकृतं यदप्रामाण्यं तत्परित्यागश्च इति चत्वारो दोषाः। एवं यवप्रयोगे व्रीहिशास्त्रस्य स्वार्थानुष्ठापकत्वलक्षणं यत् प्रामाण्यं तत्परित्यागः, अननुष्ठापकत्वलक्षणं यदप्रामाण्यं तत्स्वीकारः, पुनर्द्वितीयप्रयोगे व्रीह्यनुष्ठाने व्रीहिशास्त्रस्य त्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्च इति व्रीहिशास्त्रे चत्वारो दोषा इति अष्टदोषदुष्टविकल्पः"[21] इति।

एवं चात्र अष्टदोषदुष्टविकल्पभिया नञः प्रत्ययार्थे न अन्वयः किन्तु अनुयाजनाम्ना। किञ्च नञः नामसम्बन्धमाश्रित्य पर्युदासस्यैवाश्रयणं क्रियते। तथाहि अनुयाजे नञर्थाभावान्वये

18. अर्थसंग्रहः (कामेश्वरनाथमिश्र २०१९, पृ.१७९)
19. अर्थसंग्रहः (कामेश्वरनाथमिश्र २०१९, पृ.१७९)
20. मीमांसापरिभाषायाः पादटीका (नवनारायण वन्द्योपाध्याय २००६, पृ.८७)
21. मीमांसापरिभाषा (नवनारायण वन्द्योपाध्याय २००६, पृ.८६)

अनुयाजत्वाभावरूपोऽर्थः समायाति। तस्य च अनुयाजव्यतिरिक्ते अनुयाजाभावस्य सत्वाच्छक्यसम्बन्धसम्भवेन अनुयाजव्यतिरिक्ते लक्षणा क्रियते। इत्थं च- अनुयाजव्यतिरिक्तेषु यजतिषु ये यजामहम् इति मन्त्रं कुर्यादिति वाक्यार्थबोधो भवति। एवं च न विकल्पः। अत्र तु वाक्ये ये यजामहम् इति न विधीयते, यजतिषु ये यजामहम् इत्यनेनैव च प्राप्तत्वात्। किन्तु सामान्यशास्त्रप्राप्त-ये यजामह इत्यनुवादेन तस्यानुयाजव्यतिरिक्तविषयत्वं विधीयते, यद्यजतिषु ये यजामहं करोतीति तदनुयाजव्यतिरिक्तेषु इति।

इत्थं च विकल्पप्रसक्तिरूपबाधकसद्भावे नञर्थस्य प्रत्ययार्थान्वयं परित्यज्य नाम्ना अन्वये पर्युदासरूपोऽर्थ एवाङ्गीकर्तव्यः इति राद्धान्तः।

**सहायकग्रन्थमाला**


१. कृष्णयज्वः, २००६, मीमांसापरिभाषा, सम्पा. नवनारायणवन्द्योपाध्याय, कोलकाता. संस्कृत वुक डिपो

२. गदाधरः, २०११, व्युत्पत्तिवादः, सम्पा. हरेरामत्रिपाठी, नवदेहली. राष्ट्रिय संस्कृत संस्थान

३. झालकीकरः.भीमः तथा अभ्यङ्करः. वासुदेवः, १९२८, न्यायकोशः, वाराणसी.चौखम्बा सुरभारती प्रकाशन।

४. लौगाक्षिभास्करः, १९६१, अर्थसंग्रहः अर्थमीमांसा हिन्दीव्याख्योपेतश्च, सम्पा. राजेश्वरशास्त्रिमुसलगॉवकरः, वाराणसी. चौखम्बासंस्कृतसंस्थानम्।

५. लौगाक्षिभास्करः, २००८, अर्थसंग्रहः अर्थबोधिनीव्याख्यायुतः, सम्पा. व्याख्या. दयाशङ्करशास्त्री, वाराणसी. चौखम्बा विद्याभवनम्।

६. लौगाक्षिभास्करः, २०१९, अर्थसंग्रहः, सम्पा. कामेश्वरनाथमिश्रः, वाराणसी.चौखम्बा सुरभारती प्रकाशनः।

७. विश्वनाथः, २०१४, न्यायसिद्धान्तमुक्तावली, सम्पा. गजाननशास्त्रिमुसलगॉवकरतथालोकमणिदाहालः, वाराणसी.चौखम्बा सुरभारती प्रकाशनः।

८. विश्वनाथः, २०१६, भाषापरिच्छेदः, सम्पा. पञ्चाननभट्टाचार्यः, कोलकाता. महाबोधिवुकएजेन्सी ।

९. भट्टाचार्यः. सुखमयः,२००६, पूर्वमीमांसादर्शन, कोलकाता. पश्चिमबङ्गराज्यपुस्तकपर्षद्।

१०. Kapoor.Subodh.२००४. The Systems of Indian Philosophy, Delhi.Cosmo Publication.



Received on: 19/03/2020 Accepted on: 11/02/2021

# आथर्वणसाहित्यस्य अलंकारशास्त्रसम्मतं विश्लेषणम्

**मौसुमी-रायः***

**निर्यासः (Abstract) –**

अलंकारशास्त्रस्य ज्ञानं विना कथमपि वेदार्थावबोधो न सम्भवतीति राजशेखरो काव्यमीमांसायाम् प्रोवाच। तथाहि अलंकारशास्त्रं सप्तमम् अङ्गमिति। प्राचीनभाष्यकाराः सर्वेषां वेदानां यागदृष्ट्या दर्शनशास्त्रदृशा च व्याख्यानं विहितवन्तः। किन्तु ऋषीणाम् अन्तरानुभूतेः प्रकाशो हि वेद इति दृक्कोणतः प्राञ्चः भाष्यकृतो नोक्तवन्तः। तथाहि अर्वाचीनसमालोचकाः वेदानाम् अलंकारसम्मतं व्याख्यानं कर्तुं प्रयतन्ते। वैदिकसाहित्ये अलंकारशास्त्रस्य प्रथमं बीजं निहितमासीदित्यत्र नास्ति संशयलवः कश्चित्। तत्र अलंकारा न केवलं सूक्तगतसौन्दर्यं वर्धयन्ति, परञ्च कवीनाम् आन्तःभावना, रहस्यावृतं तत्त्वं तथा च स्वच्छं प्राकृतिकं चित्रं प्रकटीकर्तुं क्षमाः। तत्र न केवलम् ऋग्वेदे, परम् अथर्ववेदे बहुत्रैव शब्दार्थालंकाराणां विचित्रितो व्यवहारो लक्ष्यते। अथर्ववेदीयानां मन्त्राणां सावलीलता, छन्दोबद्धता, प्रसादगुणयुक्तता, शब्दार्थालंकारयोः आतिशय्यता च ध्रुपदीसंस्कृतसाहित्यस्य सौन्दर्यमपि म्लानीकुर्वन्ति। वेदिकर्षिकवीनां छन्दोविषयका उद्भावनशक्तिः अद्धा एव अस्माकं हृदि विस्मयं जनयति । तथाहि मया अथर्ववेदस्य विविधसूक्तेभ्यः मन्त्रान् उद्धृत्य प्रमाणीकर्तुम् इष्यते यत् अथर्ववेदीयाः ऋषयः स्वभावनां प्रकटीकर्तुम् अलंकारशास्त्रानुसारिणं प्रयोगं कर्तुं यतितवन्तः। तत्र तेषां स्वतोत्सारिताया भावनायाः प्रकाशो दृक्पथम् आयातीति संक्षेपः।

**कुञ्चिकाशब्दाः (Key Words)**

अलंकारशास्त्रम्, अथर्ववेदः, मन्त्रः, शब्दालंकारः, उपमाद्यर्थालंकाराः, सौन्दर्यम्, रसप्रतीतिः चेति।

## मूलप्रबन्धः (Full Paper)

भारतीयसाहित्यस्य प्राचीनतमं वाङ्मयं तावद्वैदिकसाहित्यमिति। वेदोऽयं यद्यपि अपौरुषेयस्तथापि अत्युत्तमसाहित्यस्य निर्दशनम्। वेदानाम् अर्थबोधाय यथा वेदाङ्गैः प्रयोजनम्, तथा अलंकारशास्त्रं बहुषु क्षेत्रेषु वेदानाम् अर्थबोधस्योपकारकम्। तस्मात् राजशेखरेण

**M.Phil Scholar, Sanskrit Department, Rabindra Bharati University.*

एकादशशताब्द्यां 'काव्यमीमांसा'याम् उक्तम् – "उपकारकत्वादलंकारः सप्तममङ्गम्। ऋते च तत्स्वरूपपरिज्ञानाद् वेदार्थानवगतेः"(1)। यायावरीयो राजशेखरः ततःपरमेव ऋग्वेदस्य प्रथमाध्यायस्य चतुःषष्ठ्युत्तरैकशततमस्य सूक्तस्य विंशतितमं मन्त्रम् उद्धृतवान् –

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति"(2) ।।

मन्त्रेऽस्मिन् रूपकव्यतिरेकयोरलंकारयोर्ज्ञानं विहाय कथमपि जीवात्म-परमात्मनोः स्वरूपव्याख्यानमसम्भवपरम्। श्वेताश्वतरोपनिषदः शङ्करभाष्ये आचार्येण शङ्करेण मन्त्रस्यास्यार्थ इत्थं विश्लेषितः रूपकालंकारमाश्रित्य – विज्ञानात्मा अविद्यां कामवासनाञ्च आश्रित्य विचित्रानि कर्मफलानि विस्मृत्य भोगं कुरुते। अपि च, शुद्ध-बुद्ध-मुक्त-स्वभावकः परमात्मा उदासीनदर्शकत्वेन तं केवलं पश्यति।

वेदव्याख्यायां यागमूलकप्रवृत्तेः दार्शनिकविचारस्य च प्राधान्यात् सायणवत् प्राञ्चः समालोचकाः वेदशास्त्रस्यालंकारस्वरूपं नाङ्गीकृतवन्तः। तथाहि अर्वाञ्चः समालोचका आमनन्ति यत् वैदिकसाहित्ये अलंकारशास्त्रस्य प्रथमं बीजं निहितमासीदित्यत्र नास्ति संशयलवः कश्चित्। तथाहि आचार्यविष्णुपदभट्टाचार्येण उक्तम् 'प्राचीन भारतीय अलंकारशास्त्रेर भूमिका' इति ग्रन्थादौ – "येदिन हइते भारतीय आर्यगण कवित्वशक्तिर प्रेरणा लाभ करियाछिलेन, सेइ हइतेइ अलंकारशास्त्रेर मूल रोपित हइयाछे – इहा वलिले किछुमात्र अत्युक्त हय ना" (3) इति। वक्तव्यस्यास्य संस्कृतानुवादस्तावत् – यस्माद्दिवसाद् भारतीयार्याः कवित्वशक्त्याः प्रेरणां लेभिरे, तस्मादेव अलंकारशास्त्रस्य मूलं रोपितं बभूव इत्युक्तेर्नास्ति कापि अत्युक्तिः इति।

वेदस्य 'इन्द्रसूक्ते' प्रथममेव अलंकारशब्दस्य प्रयोगो लक्षितः – 'वायवायाहि दर्शत इमे सोमा अलंकृताः'(4) इति। यास्केन 'निरुक्ते' अलंकृतशब्दस्यार्थो निगदितः – 'अलंकृता अलंकृताः'। अपि च, ऋग्वेदीयकौषीतक्युपनिषदि आम्नातम् – "तं ब्रह्म आह अभिधावत मम यशसा विजरां वा अयं नदीं प्रापत् ....। तं पञ्चशतानि अप्सरसां प्रतियन्ति शतं चूर्णहस्ताः, शतं वासोहस्ताः, शतं फलहस्ताः, शतम् आञ्जनहस्ताः, शतं माल्यहस्ताः तं ब्रह्मालंकारेण अलंकुर्वन्ति । स ब्रह्मालंकारेण अलंकृतो ब्रह्मविद्वान् ब्रह्म अभिप्रैति" इति (5)। ऋषीणां मनसि अपि सौन्दर्यभावना जागरितासीदिति अनुमीयते। अथर्ववेदे एव प्रथमं वैदिकसाहित्यस्य अलौकिकचमत्कारित्वस्य प्रसङ्ग उक्तः – 'अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति। देवस्य पश्य काव्यं न ममार न जीर्यति'(6) । द्वादशशताब्दीकेन मम्मटभट्टेन काव्यप्रकाशे वेदवाक्यं प्रभुसम्मितवाक्यत्वेन व्याख्यातम्। अपि च, वैदिकसाहित्यस्य प्रतिच्छत्रं काव्यतत्त्वस्य विभिन्नानि उपकरणानि (अलंकारः, गुणः, रसः, ध्वनिश्चेति) विलसन्ति। एतेन प्रमाणीभवति यत् वेदशास्त्रेऽपि अलंकारसम्मतं काव्यतत्त्वं विद्यमानमासीत्। परमेतदेव सत्यं यत् वैदिका क्रान्तप्रज्ञा ऋषयः अलंकारशास्त्रोक्तनियमान् आदाय वेदरचनायां न हि प्रवृत्ता

बभूवुः। तेषामन्तरस्य स्वाभाविकभावावेगादेव वयं वेदरत्नं लभामहे। वैदिकमन्त्रा देवतानां स्तुतिपरकाः। यद्यपि ऋषिकवयः प्रतिपादितवन्तो मुख्योपजीव्यत्वेन देवानां माहात्म्यख्यापनम् आत्मतत्त्वञ्च, तथापि एतेषु सर्वेषु मन्त्रेषु ऋषीणां हृदयानुभूतेः स्वतःस्फूर्तः प्रकाशः परिलक्ष्यते। किन्तु एतदपि सत्यं यत् ते सर्वे मन्त्राः न ह्युत्कृष्टसाहित्यस्य प्रकाशकाः। परं केचिन्मन्त्राः अद्धा उत्कृष्टसाहित्यस्य दृष्टान्ताः। कानिचित् सूक्तानि मन्त्राश्च गीतिकाव्यस्य सदृशत्वेन प्रतिभान्ति। विशेषेण, संवादसूक्तानि नाट्यसाहित्यसृष्टेः बीजरूपाणीति साहित्यसमालोचकानामभिमतम्। मन्त्राणामेतेषां सावलीलता, छन्दोबद्धता प्रसादगुणयुक्तता, शब्दार्थालंकारयोः आतिशय्यता च ध्रुपदीसंस्कृतसाहित्यस्य सौन्दर्यमपि म्लानीकुर्वन्ति। वेदिकर्षिकवीनां छन्दोविषयका उद्भावनशक्तिः अद्धा एव अस्माकं हृदि विस्मयं जनयति। प्रसङ्गतः, दिङ्मात्रमुदाहरणं प्रस्तूयते - ऋग्वेदस्य प्रथमाध्यायस्य प्रथमसूक्तस्य अग्निसूक्तस्य नवमो मन्त्रः – 'स न पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये'(7) इति । सायणेन उक्तं – 'नः अस्माकं स्वस्तये विनाशराहित्यार्थं सचस्व समवेतो भव। तत्रोभयत्र दृष्टान्तः – यथा सूनवे पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति तद्वत्' (8) इति। मन्त्रेऽस्मिन् पितृ-पुत्रयोः शाश्वतः सम्पर्कः उपमालंकारेणोपस्थाप्यते। अपि च, सूर्यसूक्तस्य मन्त्रः – 'सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्' (9) इति। अर्थात् 'सूर्यो देवीम् दानादिगुणयुक्तां रोचमानाम् दीप्यमानाम् उषसं पश्चादभ्येति प्रादुर्भावानन्तरं तामभिलक्ष्य गच्छति। तत्र दृष्टान्तः – मर्यो न योषाम्। यथा कश्चिन्मनुष्यः शोभनावयवां गच्छन्तीं युवतिं स्त्रियं सततमुगच्छति तद्वदि'ति सायणः। अत्रापि उपमालंकारेणैव उषा-सूर्ययोः स्वाभाविकः सम्बन्धः स्फुट्यते। अथवा, ऋग्वेदस्य अरण्यानिसूक्तानां प्रतिच्छत्रं स्वभावोक्त्यलंकारस्य प्रयोगो लक्ष्यते। अपि च, ऋग्वेदस्य दशममण्डलान्तर्गतस्य अक्षसूक्तम् अवश्यमेव काव्यगुणेनातुलनीयम्। अत्र अक्षक्रीडासक्तस्य हृतसर्वस्वस्य द्यूतकस्य मनःकष्टं करुणरसेन अभिषिच्य कविकर्मत्वेनाभिव्यज्यते। भाषायाः सावलीलत्वं, प्रकाशभङ्ग्याः स्वः छन्दत्वं करुणरसाश्रितत्वञ्चेति साहित्यरसिकान् विमोहयन्ति। तथाहि आम्नातम् –

"द्वेष्टि श्वश्रुरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम्।
अश्वस्येव जरतो वस्नस्य नाहं विन्दामि कितवस्य भोगम्"(10) ।।

वृद्धस्याश्वस्योपमया ऋषिरत्र द्यूतकस्य दुरवस्थां विषयीकरोति। पुनः द्यूतकस्य अक्षान् प्रति या दुर्निवारासक्तिस्तामपि कवयिता ऋषिः उपमालंकारेण स्फुटीकरोति – 'न्युप्ताश्च वभ्रवो वाचमक्रतँ त्रमीदेषां निष्कृतं जारिणीव' इति।

वैदिककवयः मूलतो मन्त्रद्रष्टार ऋषयः। कविप्रतिभा ब्रह्मदेवेन प्रदत्ता इति श्रुतिः। सहृदयस्य हृदयमेव कविकर्मणो मूलमधिष्ठानम्। तदुच्यते यत् सोमपानेनैव ऋषीणां काव्यरचनायाः शक्तिर्विवर्धते। क्रान्तप्रज्ञो हि वेदविहितः कविशब्दार्थः। अतः क्रान्तप्रज्ञस्य कवेः कर्म काव्यमिति।

कवेः कर्म सर्वदैव दोषरहितम्, अलंकारयुतम्, रससिक्तञ्चेति। अपरतः, काव्यशोभाधायको धर्मो ह्यलंकारः। वामननये, 'सौन्दर्यमलंकारः'(11)। वामनाचार्येण अलंकारशब्दस्य व्युत्पत्तिद्वयमेव निर्दिष्टम्। तयोः एकस्तावत् भाववाच्यनिष्पन्नोऽलंकारशब्दः सौन्दर्यपरकम् अलंकारं बोधयति – 'अलंकृतिरलंकारः'। अतः, सौन्दर्यवृद्धये काव्ये अलंकाराणां शोभाधायकत्वं निर्विवादसिद्धम्। हारकेयूराद्यलंकारा यथा शरीरस्य शोभां वर्धयित्वा परम्परासम्बन्धेन अङ्गिनः उत्कर्षमपि साधयन्ति, तथैव काव्यालंकाराः अङ्गभूतौ शब्दार्थौ मण्डयित्वा अङ्गिनो रसस्योपकारकाः भवन्ति। अपरतः, करणवाच्यनिष्पन्नः अलंकारशब्दः शब्दार्थालंकारान् बोधयन्ति – 'अलंक्रियते अनेनेति अलंकारः'। वस्तुतः, काव्यस्य प्राणभूतेन रसेनैव अलंकारा शोभान्विता भवन्ति। वैदिककालम् आरभ्य अलंकाराणां विचित्रिताः प्रयोगा अस्माकं नयनयोः आपतन्ति। शब्दार्थालंकाराणाम् एतेषां निरवच्छिन्ना परम्परा लौकिके साहित्येऽपि भवत्यनुवर्तिता। वैदिकर्षीणाम् अलंकाराणां प्रयोगनैपुण्यं पर्यालोच्य प्रतीयते यत् मन्त्रद्रष्टारः ऋषयो न केवलं शोभाधायकत्वरूपेण अलंकारान् प्रयुञ्जन्ति, चापि गूढतत्त्वानि परिष्कर्तुम्। तथाहि उपनिषदामपि जगन्मूलकारणं ब्रह्मतत्त्वम् अलंकृतवाक्यैः प्रतिपादितम् अनायासेनैव। दिङ्मात्रंमुदाहरणं तावत् -

"आत्मानं रथिनं विद्धि शरीरं रथमेव तु।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च" (12) ।।

कठोपनिषदो मन्त्रोऽयम् अवश्यमेव रूपकालंकारस्य विशिष्टः प्रयोगः। अत्र आत्मा रथी, शरीरं रथः, बुद्धिः सारथिस्तथा च मनः प्रग्रहम् इत्युच्यते। अतः, आत्म-शरीर-बुद्धि-मनसां मिथः सम्पर्को रूपकालंकारेण बोध्यः।

अहन्तु वर्तमाने प्रबन्धे न समस्तस्य ऋग्वेदस्य, परम् अथर्ववेदस्य अलंकारतत्त्वं नाम स्पष्टतः शब्दार्थालंकारान् दर्शयितुम् इष्यते। सायणादिवैदिका व्याख्याकारा अलंकाराणां दृक्कोणतो वेदस्यास्य अर्थावबोधं कर्तुं नेष्टवन्तः। परं भाविसमालोचकाः व्याख्यातारश्च अथर्ववेदस्यालंकारप्रयोगान् आदाय बहुधा आलोचितवन्तः। प्रसङ्गतः, अत्र वेदेषु अलंकाराणां प्रयोगविषये केचित् उल्लेखयोग्यानि प्रबन्धशीर्षकाणि उल्लिख्यन्ते –

क. T. G. Mainkar-कृतं 'The Rgvedic Foundations of classical poetics'
ख. Sarada Naranga-कृतं 'Figures of speech in the Atharvaveda'
ग. H D Velankar-कृतं 'Similes in the Atharvaveda'
घ. Usha Chowdhuri-कृतं 'Myth, Magic and Poetry in the Atharvaveda'

अस्माभिर्ज्ञायते यत् शब्दार्थालंकारभेदात् साधारणतया अलंकारा द्विधा विभज्यन्ते । उभयालंकारो नाम कश्चनालंकारभेदः काव्यतत्त्वे उल्लिख्यते। अथर्ववेदीयसूक्तानां विच्छित्तिः स्वतोत्सारिता। ऋषिकवीनां चेतःसु काव्यसौन्दर्यं स्वाभाविकगत्या आगच्छति, परं कथमपि

सचेतनतया मन्त्राः न परिदृश्यन्ते ऋषिभिः। अलंकारा न केवलं सूक्तगतसौन्दर्यं वर्धयन्ति, परञ्च कवीनाम् आन्तःभावना, रहस्यावृतं तत्त्वं तथा च स्वच्छं प्राकृतिकं चित्रं प्रकटीकुर्वन्ति। तत्र अथर्ववेदे अस्माभिः बहुत्रैव शब्दालंकाराणां व्यवहारो लक्ष्यते। परमत्र मया 'बिन्दौ सिन्धुदर्शनमिव' अथवा स्थालिपुलाकन्यायेन शब्दालंकारेषु श्लेष-यमक-अनुप्रासानां केचिद्दृष्टान्ताः उल्लिख्यन्ते ।

**क. शब्दालंकाराः -**

शब्दपरिवृत्तिं यो न सहते, स शब्दालंकारः। शब्दाः चार्थाः अथर्ववेदीयसूक्तेषु मिथो गुरुत्ववहाः। ऋषयः स्वतोत्सारितान् भावावेगान् उपायनीकर्तुं शब्दानां केवलं चमत्कृतिपूर्णं विचित्रितं ज्ञानवहञ्च प्रयोगं विहितवन्तः।

साहित्यदर्पणाद्यलंकारग्रन्थेषु शब्दालंकारत्वेन अनुप्रासः परिगण्यते । अनुप्रासलक्षणं तावत् 'अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्'(13) इति। अर्थात् स्वरवर्णानां वैसादृश्ये अपि सदृशोच्चारितानां व्यञ्जनवर्णानां प्रयोगात् अनुप्रासः। रसाद्यनुगमः प्रकृष्टो न्यासः अनुप्रासः इति काव्यप्रकाशकृत्। पञ्चविधोऽयम् अनुप्रासः – छेक-वृत्त-लाट-श्रुति-अन्त्यानुप्रासभेदेन। दिङ्मात्रम् उदाहरणं प्रस्तूयते। अनेकस्य अर्थात् व्यञ्जनस्य सकृत् सादृश्यं छेकानुप्रासः। क-म-त-वकाराणां सकृत् सादृश्यात् छेकानुप्रासः। छेकानुप्रासस्य उदाहरणं तावत् 'क्रमान् को अस्याः कतिधा विदुग्धान् को अस्या धाम कतिधा व्युष्टीः'(14)। अपि च, 'च्युता चेयं बृहत्यच्युता च विद्युद् विभर्त्ति स्तनयित्नूंश्च सर्वान्' (15) इति मन्त्रः छेकानुप्रासस्य दृष्टान्तः। ततश्च 'एकस्य अपिशब्देन अनेकस्य व्यञ्जनस्य द्विर्बहुकृतो वा सादृश्यं वृत्त्यनुप्रासः'। 'एकस्याप्यसकृत्पर' इति मम्मटः काव्यप्रकाशे। अथर्ववेदे वृत्यनुप्रासस्य बहवो दृष्टान्ताः परिप्राप्यन्ते। तद्यथा - 'स ह द्यामधिरोहति रुहो रुरोह रोहितः'(16) इति मन्त्रे र-हवर्णयोः बहुकृत्वः सादृश्यात् वृत्त्यनुप्रासः। ततः परं व्याधिविषयको रक्तस्रावमूलकः कश्चन मन्त्रः – 'तिष्ठावरे तिष्ठ पर उत त्वं तिष्ठ नध्यमे कनिष्ठिका च तिष्ठति तिष्ठादिद्धमनिर्मही' (17) इति। अत्र तकार-ष्ठकारयोः भूय आवृत्तये श्रुत्यनुप्रासः। अपि च, 'हतो हतोमाता क्रिमिर्हतभ्राता हतस्वसा हतासोऽस्य हतासः परिवेशसः' (18) इति। अस्मिन् क्रिमिनाशके मन्त्रे ह-त-श-षकाराद्यनेकपदानां पुनरुक्तये लाटानुप्रासः। लाटानुप्रासलक्षणं तावत् साहित्यदर्पणे – 'शाब्दस्तु लाटानुप्रासो भेदे तात्पर्यमात्रतः'(19)। अर्थात् शब्दगतोऽनुप्रासः शब्दार्थयोरभेदे अन्वयमात्रभेदात्। लाटजनवल्लभत्वाच्च लाटानुप्रासः। एष पदानुप्रासः इत्यन्ये। अथर्ववेदस्य रोहितसूक्ते आम्नायते – 'योगे योगे तवस्तरं वाजे वाजे हवामहे' इति। मन्त्रोऽयं लाटानुप्रासस्य दृष्टान्तः। साहित्यदर्पणानुसारम् अन्त्यानुप्रासस्य दृष्टान्तः अस्माकं श्रवणगोचरम् एति । पदान्तस्य केवलं सादृश्यात् अन्त्यानुप्रासो भवति। तद्यथा – 'इदं सवितार्वि जानीहि षड् यमा एक एकजः। तस्मिन् हापित्वमिच्छन्ति य एषामेक एकजः' (20) इत्यत्र एकजशब्दबन्धोऽयं

मन्त्रस्यास्य उभयोः चरणयोः अन्त्ये प्रयुक्त इति हेतोः अन्त्यानुप्रासः। एवम् अथर्ववेदस्य प्रतिमन्त्रम् अस्माकं नयनयोः आपतति अनुप्रासानां झनत्कारः।

यमकमपि प्रसिद्धशब्दालंकारत्वेन कीर्तितम्। तच्च लक्षणं तावत् – 'अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः' (21) इति। शब्दस्यैकस्य एकाधिकव्यवहारात् एकाधिकार्थानां बोधे सति यमकालंकारो भवति। अथर्ववेदस्य सप्तमे मण्डले सूर्यदेवमुद्दिश्य विहितोऽयं मन्त्रः – 'दर्शो असि दर्शतोऽसि' (22) इति। अत्र प्रथमः दर्शशब्दः दर्शनयोग्यार्थे, द्वितीयश्च दर्शतः दर्शनीयार्थे व्यवह्रियेते । पुनश्च, 'ब्रह्म देवाँ अनुक्षियति ब्रह्म दैवजनीर्विशः। ब्रह्मेदमन्यत्रन्नक्षत्रं ब्रह्म सत् क्षत्रमुच्यते' (23) इति। मन्त्रेऽस्मिन् प्रतिब्रह्मशब्दम् अर्थान्तरसूचकम्। प्रथम-द्वितीयौ ब्रह्मशब्दौ देववाचकौ। तृतीयो ब्रह्मशब्दः ब्रह्मचर्यार्थं तथा चान्तिमो ब्रह्मशब्दो ब्रह्मविद्यां द्योतयतः। अथर्ववेदस्य इन्द्रसूक्तेऽपि यमकालंकारस्य विचित्रितः प्रयोगोऽस्माभिः आलक्ष्यते। प्रसङ्गत उल्लेख्यः कश्चन अथर्ववेदीयो मन्त्रस्तावत् 'त्वं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो' (24)। शब्दस्यैकस्य एकाधिकव्यवहारात् नैकार्थबोधनात् यमकालंकारः। अस्य मन्त्रस्य 'वाजेषु'' इति शब्दार्थः 'युद्धेषु', 'वाजिनम्' नाम 'अन्नम्', 'वाजयामः' 'इच्छामः' चेत्यर्थः।

शब्दालंकारत्वेन श्लेषो गुरुत्वोपेतः। काव्यप्रकाशे श्लेषस्य लक्षणं तावत् –

> वाच्यभेदेन भिन्ना यद् युगपद् भाषणस्पृशः।
> श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा (25)।।

श्लेषालंकारस्य दिङ्मात्रम् उदाहरणं प्रस्तूयते अथर्ववेदस्य त्रयोदशकाण्डात् –

> "वि रोहितो अमृशद् विश्वरूपं समाकुर्वाणः प्ररुहो रुहश्च।
> दिवं रुड्हवा महता महिम्ना सं ते राष्ट्रमहक्तु पयसा घृतेन" (26)।।

शब्दानां व्यवहारात् भिन्नार्थद्योतनात् श्लेषालंकारः।

**अर्थालंकाराः -**

योऽलंकारः अर्थपरिवृत्तिं न सहते, सोऽर्थालंकारः। अर्थालंकारेषु शब्दाद् अर्थानां वैचित्र्यम् अधिकम्। असाधारणवर्णनशक्या ऋषयः अर्थालंकाराणां व्यवहारात् स्वभावान् प्रकाशितवन्तः। प्रायः अधिका अर्थालंकाराः दृश्यन्ते अथर्ववेदीयसूक्तेषु।

तत्र अर्थालंकारेषु उपमालंकारोऽद्वितीयः सादृश्यमूलकालंकाराणाम् उपजीव्यभूतश्चेति। अर्थालंकारेषु 'उपमैव माता'। विश्वनाथस्य नये, 'साम्यं वाच्यमवैधर्म्यं वाक्यैके उपमा द्वयोः' (साहित्यदर्पणः, दशमाध्यायः)। अर्थात् उपमानम्, उपमेयम्, साधारणधर्मः,

इवादिवाचकशब्दश्चेति मुख्यानि उपादानानि भवन्ति। तत्र उपमालंकारार्थम् अत्यावश्यकम् उपमानस्वरूपम् निरुक्तस्य तृतीयाध्याये प्राप्यते – "तदासां कर्म ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वा प्रख्यातं वोपमिमीते"। अथर्ववेदे उपमालंकारस्य व्यवहारः सर्वाधिकतया परिलक्ष्यते। वयं जानीमो यत् प्रथमः कोषग्रन्थस्तावत् यास्कप्रणीतं निरुक्तमिति। यास्केन निरुक्ते पूर्वाचार्यस्य गार्ग्यस्य उपमालक्षणम् उद्धृतम् – 'यदतत् तत्सदृशमिति गार्ग्यः' (27)।

निरुक्ते चत्वारि पदजातानि उक्तानि – 'तद्यान्येतानि पदजातानि नामाख्याते उपसर्गनिपाताश्च तानीमानि भवन्ति' (28)। चतुर्षु पदेषु निपातम् अन्यतमम्। 'उच्चावचेष्वर्थेषु निपतन्ति' (29) इति निपाताः। इमे निपातार्थाः उपमार्थे कर्मोपसंग्रहार्थे, पादपूरणार्थे च प्रयुज्यन्ते। एतेषु निपातेषु इव, न, चित्, नु चेति चत्वारो निपाताः प्रायेण उपमार्थे प्रयुक्ता भवन्ति – 'तेषामेते चत्वार उपमार्थे प्रयुज्यन्ते' (30)। अत्र न इति निपातः लौकिके निषेधार्थे प्रयुक्तो भवति, परं वैदिकभाषायां न केवलं निषेधार्थे परञ्च सादृश्यार्थे अपि प्रयुज्यते। इव तु सर्वत्रैव उपमार्थकः। उदाहरणं तावत् – 'अग्निरिव' (31), 'दुर्मदासो न सुरायाम्' (32), 'दधिचित्', 'वृक्षस्य नु ते पुरुहूतो वयाः' (33)। स्तुति-निन्दा-आशीर्वचनार्थेष्वपि सादृश्यमूलकस्य उपमालंकारस्य प्रयोगो दृश्यते। आशीर्वचनार्थे इवनिपातस्य उदाहरणम् – 'आशूनिव सूयमानह्व ऊतये ते नो मुञ्चन्त्वं हसः'। अत्र ऋषिः मृगारः मरुद्गणानां सकाशे प्रार्थना विहिता। 'आशूनिव' इति पदे इवनिपातस्य व्यवहारात् 'सुशिक्षितान् अश्वान् इव' इत्यर्थो बोध्यः। इह मन्त्रे उपमान-उपमेय-साधारणधर्म-इवादिवाचकानां शब्दानां प्रयोगात् पूर्णोपमालंकारः। पूर्णोपमाया अपरो दृष्टान्तस्तावत् – 'मातेवास्मा अदिते शर्म यच्छ' (34)। अदितिः अस्मिन् सूक्ते मातृरूपेण प्रपूजिता। मातृशब्देन समम् इवशब्दस्य सन्धौ मातेव इति शब्दो निष्पन्नः। अर्थात् माता पुत्राय यथा सुखं ददाति, तथैव अदितिः इत्यर्थो बोध्यः इति कृत्वा उपमान-उपमेय-साधारणधर्म-इवशब्दानाम् एकत्र प्रयोगात् पूर्णोपमा।

पुनः, भूमिसूक्तस्य बहुत्रैव मन्त्रेषु काव्यसौन्दर्यं प्राच्य-पाश्चात्त्ययोः आलंकारिकान् विमोहयति। मन्त्रेषु उपमा-रूपक-उत्प्रेक्षा-स्वभावोक्त्यलंकाराणां विचित्राणि उदाहरणानि परिदृष्टानि भवन्ति। 'शुद्धा न आपस्तन्वे क्षरन्तु' (35) इत्यत्र शुद्धा इव इत्यर्थो लभ्यः। अपि च, भूमिसूक्तस्य 'सा नो भूमिर्विसृजतां माता पुत्राय मे पयः' (36) इति मन्त्रे लुप्तोपमालंकारो विहितः इवादिवाचकशब्दाप्रयोगात्। ऋषिभिः उपमागर्भा विषयाः संगृहीताः मानवजीवनात् मनुष्येतरप्राणिनां जीवनाच्च। तथा च वृक्ष-नदी-पर्वतादयः अपि उपमागर्भविषयत्वेन अथर्ववेदीयैः ऋषिभिः व्यवह्रियन्ते। अथर्ववेदे व्यवहृता उपमाः क्वचित् आशीर्वचनार्थे, क्वचिद्वा अभिशापार्थे निरामयार्थश्चापि दृश्यन्ते। तत्र अभिशापार्थं द्योतयितुम् अथर्ववेदीयेन ऋषिणा उपमालंकारः समाश्रितः-

'तेऽधराञ्चः प्र प्लवन्तां छिन्ना नौरिव बन्धनात्।
न सायकप्रणुत्तानां पुनरस्ति निवर्तनम्' (37) ।।

सादृश्यमूलकेष्वलंकारेषु रूपकम् अन्यतमम्। अथर्ववेदीयानाम् ऋषीणां मनोराज्ये रूपकालंकारस्य प्रभावो महान्। सोत्साहं चारुत्वेन च ते ऋषिकवयः काव्यरूपवाङ्माध्यमेन इममलंकारं व्यवहरन्ति । कालसूक्तस्य विशिष्टे मन्त्रे 'कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेता। तमा रहोन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वाः'(38) रूपकालंकारस्य व्यवहारोऽतिप्रसिद्धः। पुनश्च, रूपकालंकारस्य अपरो दृष्टान्तः समुद्ध्रियते –

'पञ्चवाही वहत्यग्रमेषां प्रष्टयो युक्ता अनुसंवहन्ति।
अयातमस्य ददृशेन यातं परं नेदीयोऽवरं दवीयः' (39) ।।

द्रुततरगत्या उड्डीयमानो हंसः सूर्यद्वारदेशम् उपरि समारोप्य ऋषिणा रूपकालंकारेण वर्णितः पक्षाणि विस्तीर्य स्वर्गं प्रतिगच्छन् हरितवर्णीयो राजहंसः' (40)। रूपकालंकारस्यायं प्रयोगः सत्यमेव पाठकानां चित्तेषु अलौकिकम् आनन्दं जनयति। लौकिकसाहित्ये कवीनाम् ईदृशभावनायाः कादाचित्को व्यवहारो लक्ष्यते।

अर्थालंकारेष्वन्यतमस्य उल्लेखालंकारस्य प्रयोगो लक्ष्यते अस्माभिः अथर्ववेदस्य दशमकाण्डस्य अष्टमसूक्तस्य अष्टादशतमे सूक्ते। परं को नाम उल्लेख इति चेदुच्यते – ग्रहीतॄणां ज्ञातॄणां भेदाद् बाहुल्येन तथा विषयाणां हेतूनां च बाहुल्येन एकस्य वस्तुनो यत्र बहुप्रकारक उल्लेखो भवति, तत्र उल्लेखालंकारः। ब्रह्मणः सर्वोच्चम् अस्तित्वं प्रचारयितुं स्वरूपञ्च व्याख्यातुम् ऋषिः उल्लेखालंकारमाश्रयति। अपि च, तस्यैव सूक्तस्य अष्टाविंशतितमे मन्त्रे उल्लेखालंकारेण वर्ण्यते यत् ब्रह्म कस्यापि पिता, उत कस्यापि पुत्रः, अथवा कनिष्ठो ज्येष्ठो वेति –

'उतैषां पितोत वा पुत्र एषामुतैषां ज्येष्ठ उत वा कनिष्ठः।
एको ह देवो मनसि प्रविष्टः प्रथमो जातः स उ गर्भे अन्तः' (41) ।।

संस्कृतार्थालंकारेषु उर्द्धगामिनी प्रेक्षा नाम उत्प्रेक्षा अन्यतमा। तल्लक्षणम् 'सम्भावनोत्प्रेक्षा प्रकृतस्य समेन यत्' इति काव्यप्रकाशः। प्रकृतस्य उपमेयस्य परात्मना उपमानात्मना सम्भावना उत्प्रेक्षा। उपमेयस्य उपमानतादात्म्यसम्भावनम् उत्प्रेक्षा इति भावः। अथर्ववेदस्य सूक्ते उत्प्रेक्षालंकारा ऋषिणा प्रयुक्ताः। अथर्ववेदीया ऋषयः प्रकाशयन्ति ऋषधीनां कल्पितकथनशक्तिम्, यथा ते वर्षर्तौ तस्मै स्वकृतज्ञतां प्रकटीकर्तुं प्राणिवत् कथयन्ति । तथाहि आम्नातम् –

'अग्नीषोमावदधुर्या तुरीयासीद् यज्ञस्य पक्षावृषयः कल्पयन्तः।
गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कीं यजमानाय स्वराभरन्तीम्' (42) ।।

मन्त्रस्यास्यार्थस्तावत् अग्नीषोमौ यज्ञस्य पक्षद्वितयम्। तौ गायत्रीं त्रिष्टुभं जगतीम् अनुष्टुभं

बृहतीञ्च यजमानाय स्वर्गम् आनयतः। अपि च, अथर्ववेदस्य ओदनसूक्ते ऋषिः अथर्वा कथयति –

'ततश्चैनमन्यैर्दन्तैः प्राशीर्यैश्चैतं पूर्व ऋषयः प्राश्नन्। दन्तास्ते शत्स्यन्तीत्येनमाह।
तं वा अहं नार्वाञ्चं न पराञ्चं न प्रत्यञ्चम्। ऋतुभिर्दन्तैः। तैरेनं प्राशिषं तैरेनमजीगमम्
एष वा ओदनः सर्वाङ्गः सर्वपरुः सर्वतनूः। सर्वाङ्ग एव सर्वपरुः स भवति य एवं वेद' (43)।

अपरतः, उपयुक्तविशेषणानां व्यवहारेणैव कस्यचिद् वस्तुनः गुणकीर्तनं हि परिकरः। अथर्ववेदीयस्य ब्रह्मचारिसूक्तस्य चतुर्दशतमे मन्त्रे परिकरालंकारस्य प्रयोगो दृश्यते। तत्रोच्यते यत् आचार्यः अध्येतृभ्यो ज्ञानं प्रददाति, प्ररोचयति च ऋषिम् आह्वयितुम् मृत्यु-वरुण-सोम-ओषधि-पयांसि (44)। एतेषां शब्दानां प्रयोगात् प्रमाणीभवति छात्राणां बौद्धिकविकाशो हि गुरोः प्रधानं कर्तव्यम्। विषयोऽयं स्पष्टीकर्तुम् ऋषिणा परिकरालंकारो व्यवहृतः अनन्यनैपुण्येन।

उपसंहृतौ वक्तुमलं यत् अथर्ववेदे 'यो नो रसं दिस्पति पित्वो अग्ने ...' (45) इति मन्त्रः समुपलभ्यते यस्मात् प्रमाणीभवति अथर्ववेदस्य ऋषयो रसशब्दं सचेतनतया प्रयुक्तवन्तः। अपि च, अथर्ववेदस्य सूक्तानां बहुत्रैव ऋणीणाम् अन्तरानुभूत्या निविड़ता, सावलीलता च लक्षणीये। उपमा-रूपकाद्यलंकारा आर्षकवीनां वास्तवाभिज्ञताया भूमितः समुद्भूताः। ऋषयः स्वकीयया प्रतिभया प्रकृतिं मानवजीवनञ्च यथा प्रत्यक्षीकुर्वन्ति, तथैव वर्णयन्ति। न केवलम् अलंकारस्य प्रयोगे, अथर्ववेदस्य मन्त्रेषु ओजः-प्रसादगुणयोः विचित्रितो व्यवहारः अस्माकं नयनयोः आपतति। स्वाभाविकतया तेषां सृष्टावपि अलंकारैः समं काव्ये नित्यधर्मस्वरूपयोः रस-वक्रोक्त्योः प्रयोगः परिलक्ष्यते। भाषामाधुर्येण, अलंकारझङ्कारेण, रससिञ्चनेन चाथर्ववेदस्य मन्त्राश्चमत्कृतिं लभन्ते। वैदिकर्षीणां स्वतोत्सारिता हृदयानुभूतेः प्रकाशो हि वेदः। तेषां मन्त्रेषु बहुत्रैव निश्चप्रचं रसात्मकानां वाक्यानाम् आधिक्यं वर्तते। पूर्वमेव उक्तं यत् अलंकारज्ञानं विना कथमपि वेदार्थावगतिः नैव सम्भवति। तत्तु अथर्ववेदस्य काव्यशोभाधायकमन्त्रदृष्ट्या प्रमाणीकर्तुं शक्यते इति शम्।

अन्त्यटीकाः -

1. आचार्यस्तथा च दासः, 2009, पृ.- 30.
2. तत्रैव (पृ.-30)
3. भट्टाचार्य, 2004, पृ.-1
4. ऋग्वेदः (1.1.3)
5. कौषीतक्युपनिषत् (1.3-4)
6. अथर्ववेदः (10.8.32)
7. ऋग्वेदः (1.1.9)
8. भट्टाचार्यस्तथा च अधिकारी, 2010, पृ.- 48

9. सूर्यसूक्तम् (1.115.2)
10. अक्षसूक्तम् (10.34.3)
11. काव्यालंकारसूत्रवृत्तिः (1.1.2)
12. कठोपनिषद् ( प्रथमाध्यायस्य तृतीयवल्ल्याः तृतीयमन्त्रः)
13. साहित्यदर्पणः (दशमाध्यायः)
14. अथर्ववेदः (8.9.10)
15. तत्रैव (9.2.15)
16. तत्रैव (13.3.26)
17. तत्रैव (1.17.2)
18. तत्रैव (2.32.45)
19. काव्यप्रकाशः (दशमोल्लासः)
20. अथर्ववेदः (10.8.5)
21. काव्यप्रकाशः (दशमोल्लासः)
22. अथर्ववेदः (7.81.4)
23. तत्रैव (10.2.23)
24. तत्रैव (20.68.9)
25. काव्यप्रकाशः (दशमोल्लासः)
26. अथर्ववेदः (13.1.8)
27. निरुक्तम् (3.13.24)
28. मेधाचैतन्यः, 1987, पृ.- 1
29. तत्रैव, पृ.- 76
30. तत्रैव, पृ.- 76
31. ऋग्वेदः (10.84.2)
32. तत्रैव (8.2.12)
33. तत्रैव (6.24.3)
34. अथर्ववेदः (2.28.5)
35. तत्रैव (12.1.30)
36. तत्रैव (12.1.10)
37. तत्रैव (9.2.12)
38. तत्रैव ( 19.53.1 )
39. तत्रैव (10.8.8)
40. तत्रैव (10.8.18)
41. तत्रैव (10.8.28)
42. तत्रैव (8.9.14)
43. तत्रैव (8.9.14)
44. तत्रैव (11.5.14)
45. तत्रैव (8.2.4.10)

## परिशीलिता ग्रन्थपञ्जी (Selected Bibliography)


क. मुख्योत्साः

- ✓ अथर्ववेद संहिता (सरल हिन्दी भावार्थ सहित) (भाग -1). 2002. श्रीराम शर्मा आचार्य (सम्पा.), हरिद्वार : ब्रह्मवर्चम्।
- ✓ अथर्ववेद संहिता (सरल हिन्दी भावार्थ सहित) (भाग -2). 2002. श्रीराम शर्मा आचार्य (सम्पा.), हरिद्वार : ब्रह्मवर्चम्।
- ✓ अथर्ववेदः. 2000. दिल्ली: चौखाम्बा संस्कृत प्रतिष्ठान, पुनर्मुद्रण।
- ✓ ऋग्वेदः. 2000. दिल्ली: चौखाम्बा संस्कृत प्रतिष्ठान, पुनर्मुद्रण।
- ✓ काव्यप्रकाशः (मम्मटः) (सविमर्शशशिकलाहिन्दीव्याख्योपेतः). 2014. सत्यव्रत सिंह (सम्पा.), वाराणसीः, चौखाम्बा विद्याभवन, पुनर्मुद्रणम्।
- ✓ काव्यमीमांसा. 2009. सीतानाथ आचार्य ओ देवकुमार दास (सम्पा.). कलकाता : संस्कृत पुस्तक भाण्डार।
- ✓ निरुक्तम् (यास्कः). 1987. मेधाचैतन्यम् (सम्पा.), कलिकाताः, दक्षिणेश्वर रामकृष्ण संघ, आद्यापीठ बालकाश्रमः, प्रथमसंस्करणम्।
- ✓ निरुक्तम् (यास्कः). 2013. तारकनाथ अधिकारी (सम्पा.), कोलकाता : संस्कृत वुक् डिपो।
- ✓ वैदिक संकलन (प्रथम भाग). 2010. भवानीप्रसाद भट्टाचार्य ओ तारकनाथ अधिकारी (सम्पा.), कलकाताः, संस्कृत वुक डिपो।
- ✓ वैदिक साहित्य : वेदमीमांसा (प्रथम खण्ड). 2006. अनिर्वाण (सम्पा.), कोलकाता : संस्कृत वुक् डिपो, प्रथम प्रकाश।
- ✓ साहित्यदर्पणः (विश्वनाथः) ( कुसुमप्रतिमाटीकोपेतः). 1967. हरिदाससिद्धान्तवागीशः (सम्पा.), कलकाताः, चतुर्थसंस्करणम्।

ख. गौणोत्साः

- ✓ दासगुप्त, सुरेन्द्रनाथ. 1992. सौन्दर्यतत्त्व. कलकाता : चिरायत प्रकाशनी।
- ✓ भट्टाचार्य, विष्णुपद. 2004. प्राचीन भारतीय अलंकार शास्त्रेर भूमिका, कलकाता : संस्कृत वुक डिपो।
- ✓ वसु, योगीराज. 2018. वेदेर परिचय, कलकाता : फार्मा के.एल.एम. प्राइभेट लिमिटेड, द्वादश मुद्रण।
- ✓ Narang, Saroj. 2000. Figures of Speech in the Atharvaveda, New Delhi : Vidyanidhi Prakashan.

ग. प्रबन्धाः ____

- ✓ अधिकारी, तारकनाथ. 2009-10. आलंकारिकतत्त्वदृष्ट्या आथर्वणसाहित्यपुननिर्माणप्रयासः, कलकाता : रवीन्द्रभारती पत्रिका.


Received on: 06/03/2020 Accepted on: 11/02/2021

# न्यायनये सङ्गतिस्वरूपचिन्तनम्

अभि-पालः

**विषयसारः**

दृष्टादृष्टसकलसदुपायदर्शने समर्थानि शास्त्राणि शास्त्रकृद्भिः नियमनिचयैः भृशमेव निगडितानि। तेषु च नियमसमूहेषु आन्यतम्यं भजते 'नासङ्गतं प्रयुञ्जीत' इति। असङ्गतं वचनं शास्त्रेषु न प्रयोगार्हमिति विधिसारः। तत्र न सङ्गतमसङ्गतम्। सङ्गतं नाम सङ्गतिविशिष्टम्। विशिष्टज्ञाने सामान्यज्ञानस्य हेतुत्वात् सङ्गतिस्वरूपविषये अत्र आलोचनं विहितम्। पूर्वापरग्रन्थयोरेकवाक्यताप्रतिपत्त ये सङ्गतिप्रदर्शनमत्यावश्यकम्। किञ्च, असम्बद्धं शास्त्रं श्रोतुं श्रोतारो न प्रवृत्ता भवन्तीति कृत्वा शास्त्रं सदैव सुसम्बद्धेन भाव्यम्। शास्त्रं च तदैव सुसम्बद्धं जायते यदा एकवाक्यतापन्नं भवति। एकवाक्यताप्रतिपत्तौ च वर्तते सङ्गतेरावश्यकता। अतः परम्परया सङ्गतिः प्रेक्षावतां शास्त्रप्रवृत्त्यङ्गत्वमपि भजते इति वक्तुं शक्यते। ततश्च अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयरूपं सङ्गतिलक्षणम् अव्याप्त्यतिव्याप्तिप्रदर्शनपूर्वकमालोचितम्। तदनन्तरं सङ्गतिविभाजनं कृतम्। प्रसङ्गः, उपोद्घातः, हेतुत्वम्, अवसरः, निर्वाहकैक्यं, कार्यैक्यं चेति सङ्गतेः षोढात्वं प्रतिपादितम्। ततश्च तेषामपि सङ्गतिभेदानां सोदाहरणं लक्षणोपस्थापनपूर्वकं यथामति आलोचनमस्मिन् प्रबन्धे विहितम्।

**शब्दसंकेतः** सङ्गतम्, प्रसङ्गः, उपोद्घातः, हेतुत्वम्, अवसरः, निर्वाहकैक्यम्, कार्यैक्यम्।

# न्यायनये सङ्गतिस्वरूपचिन्तनम्

## अवतरणिका

दुःखजालविततेऽस्मिन् दुस्तरे संसारे सन्ति केचन महर्षयः, ये जीवन्मुक्ता अपि संसारिणां मादृशानां पामराणामपि आत्यन्तिकदुःखोच्छेदरूपां मुक्तिं कामयमानाः प्रणीतवन्तः प्रभूतशास्त्राणि। तानि च शास्त्राणि दृष्टादृष्टसकलसदुपायदर्शनेऽस्माकं चक्षुःस्वरूपाणि। अतस्तेषु चक्षुःस्वरूपभूतेषु शास्त्रेषु यथासम्भवं वैमल्यं रक्षणीयमिति कृत्वा शास्त्रकारैः बहुभिर्नियमैर्निगडितं शास्त्रसकलम्। तत्र नियमनिचयेषु आन्यतम्यमस्ति "नासङ्गतं प्रयुञ्जीत" इति। असङ्गतं वचनं

*Ph.D Scholar ,Sanskrit Department, Ramakrishna Mission Vidyamandira.

शास्त्रेषु न प्रयोगार्हमिति विधिसारः। तत्र न सङ्गतमसङ्गतम्। सङ्गतं नाम सङ्गतिविशिष्टम्। विशिष्टज्ञानात् पूर्वं सामान्यज्ञानमावश्यकमिति धिया सङ्गतिस्वरूपमादौ जिज्ञासितव्यम्। अत एव जिज्ञासितं सङ्गतिस्वरूपमधिकृत्य सविचारं प्रबन्धोऽयं यथामति तायते।

## 1. सङ्गतिप्रयोजनम्

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति का कथा धीमताम्? इत्यतः सङ्गतिनिरूपणेन किं प्रयोजनमिति चेदुच्यते – पूर्वापरग्रन्थयोरेकवाक्यताप्रतिपत्तये सङ्गतिप्रदर्शनमत्यावश्यकम्। तथाह्युक्तं दीधितिव्याख्यायां - "पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तिः एकप्रयोजनवत्ताफलिका प्रयोजनम्" इति।[1] उक्तं च भवानन्दीग्रन्थे - "असङ्गतत्वज्ञानेन हि ग्रन्थादेरुन्मत्तप्रलपितत्व शङ्का उत्पद्यते। सङ्गतत्वज्ञानेन तु तन्निवृत्तिः। तत एकवाक्यताप्रतिपत्तिः। तदेव सङ्गतेः प्रयोजनम्"[2] इति। ननु का नाम एकवाक्यता? उच्यते, एकवाक्यस्य भाव इति। एकवाक्यं च वाक्यार्थाकांक्षिताकांक्षापूरणेन विशिष्टैकार्थबोधकम्। तथाहि सूत्रितं जैमिनिना –"अर्थैकत्वादेकं वाक्यं साकांक्षं चेद् विभागे स्यात्"[3] इति। तच्च एकवाक्यं द्विविधं – पदैकवाक्यं वाक्यैकवाक्यं चेति। तत्र प्रशंसारूपाणामर्थवादवाक्यानां प्राशस्त्ये लक्षणाङ्गीक्रियते। एवं सोऽरोदीदि त्यादिनिन्दार्थवाक्यानां निन्दितत्वे लक्षणा। अर्थवादगतपदानां प्राशस्त्ये लक्षणाभ्युपगमे एकेन पदेन लक्षणया तदुपस्थितिसम्भवे पदान्तरवैयर्थ्यं स्यात्। एवञ्च विध्यपेक्षितप्राशस् त्यरूपपदार्थप्रत्यायकतया अर्थवादपदसमुदायस्य पदस्थानीयतया विधिपदेनैकवाक्यत्वं भवतीत्यर्थवादवाक्यानां पदैकवाक्यता गम्यते।यत्र तु प्रत्येकं भिन्नसंसर्गप्रतिपादकवाक्ययोराकां क्षावशेन महावाक्यार्थबोधकत्वं तत्र वाक्यैकवाक्यं ज्ञेयम्। यथा - "दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिवाक्यानां च परस्पराङ्गाङ्गिभावबोधकतया एकवाक्यता इति बोध्यम्। तदुच्यते कुमारिलभट्टेन –

> स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
> वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते।।[4] इति।

किञ्च, एकवाक्यताप्रतिपत्तौ च सङ्गतिप्रदर्शनं लिङ्गज्ञानविधया हेतुर्भवति। तथाहि यद्यत्सङ्गतिमत्प्रतिपादकवाक्यं भवति तत्तत्प्रतिपादकग्रन्थेन एकवाक्यं भवति। अत एव

---

1. दीधितिः
2. दीधितिव्याख्या भवानन्दी
3. मीमांसासूत्रम्–२\१\४६(भूतनाथसप्ततीर्थः १४१६ बङ्गाब्दः, पृ.- १७३)
4. मीमांसाश्लोकवार्तिकम्

सङ्गतिलक्षणं कृतं दीधितिकृता - "एकवाक्यतापन्नत्वे सति अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोऽर्थः"[5] इति।

किञ्च, "सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते"[6] इत्यतोऽसम्बद्धं शास्त्रं श्रोतुं श्रोतारो न प्रवृत्ता भवन्तीति कृत्वा शास्त्रं सुसम्बद्धेनैव भाव्यम्। शास्त्रं च तदैव सुसम्बद्धं जायते यदा एकवाक्यतापन्नं भवति। एकवाक्यताप्रतिपत्तौ च वर्तते सङ्गतेरावश्यकता। अतः परम्परया सङ्गतिः प्रेक्षावतां शास्त्रप्रवृत्त्यङ्गत्वमपि भजते इति वक्तुं शक्यते।

## 2. सङ्गतिलक्षणम्

सम्पूर्वकात् 'गम्लृ गतौ' इति गत्यर्थकाद् गम्-धातोः भावे क्तिन्प्रत्ययेन सङ्गतिशब्दो निष्पन्नः। सङ्गतिलक्षणं लक्षितं विपश्चिद्भिः –"अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयोऽर्थः सङ्गतिः" इति। यन्निरूपणाव्यवहितोत्तरनिरूपणप्रयोजिका या जिज्ञासा तज्जनकज्ञानविषयो यो धर्मः स तन्निरूपितसङ्गितिरित्यर्थः। वस्तुतस्तु यो यन्निरूपणानन्तरं निरूपणीयः, स तन्निरूपितसङ्गतिमान् भवति इति बोध्यम्। यथा अनुमानचिन्तामणिग्रन्थे अनुमानप्रामाण्यनिरूपणात् परं व्याप्तिस्वरूपं प्रपञ्चितम्। तत्र च अनुमानप्रामाण्यनिरूपणात्परं व्याप्त्यभिधानप्रयोजिका या जिज्ञासा "अनुमानप्रामाण्योपपादकज्ञानं जायताम्" इत्याकारिका, तज्जनकं यज्ज्ञानं, तच्च उपपादकज्ञानं मदिष्टसाधनमिति ज्ञानं, तज्ज्ञानविषयत्वं च उपपादकत्वेऽस्तीति उपपादकत्वञ्चात्र सङ्गतिरिति लक्षणसमन्वयः। इदानीं सङ्गतिलक्षणस्य व्यावृत्तिः प्रदर्श्यते –

ननु जिज्ञासाया अभिधानप्रयोजकत्वे मानाभाव इति चेन्न, प्रथमतः अनुमानप्रामाण्यं कस्यचिदुपपाद्यमित्याकारकम्अनुमानप्रामाण्यस्य उपपाद्यज्ञानं भवति, ततोऽनुमानप्रामाण्योपपादकत्वेन सामान्यतस्तदुपपादकज्ञानं, ततः सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाजनकत्वाद् विशेषतोऽनुमानप्रामाण्योपपादकज्ञानं भवत्वितीच्छा भवति। वस्तुतस्तु सैव इच्छा किमस्योपपादकमित्याकारिका भवति। ततः शिष्यस्य किमस्योपपादकमिति शब्दप्रयोगो भवति। ततः शिष्यजिज्ञासाज्ञानं, ततश्च इष्टसाधनत्वेन विशेषतो व्याप्त्यादिरूपानुमानप्रामाण्योपपादकबोधकानां शब्दानां ज्ञानात् तत्रेच्छा, ततः कण्ठक्रियानुकूला प्रवृत्तिः, ततोऽभिधानमिति क्रमेण जिज्ञासाया अभिधानप्रयोजकत्वं सूपपन्नम्। अत्रेदमवधेयं यत्, जिज्ञासुं पुरुषं प्रति यदभिधानं सङ्गतम्, अजिज्ञासुं प्रति तदभिधानमसङ्गतमेवेति। अतो यं प्रतिपादयितुमनन्तराभिधानं तादृशाभिधानप्रयोजकतत्पुरुषीयजिज्ञासाजनकज्ञानविषयोऽर्थ इति सङ्गतिलक्षणशरीरे तत्पुरुषीयत्वनिवेश आवश्यकः। ननु प्रयोजकान्तं पदं व्यर्थमिति चेन्न, प्रयोजकान्तानुपादाने यस्य पुंसो यन्निरूपणानन्तरमन्याभिधानानन्तरमेव

5. दीधितिः
6. मीमांसाश्लोकवार्तिकम् (शाम्बशिवशास्त्री १९९०, पृ. - ७)

यद्धर्मावच्छिन्नस्य विशेषजिज्ञासा, तादृशजिज्ञासाजनकज्ञानविषयस्य प्रथमनिरूपितसङ्गतित्वापत्तेः।न नु अनन्तराभिधानप्रयोजकज्ञानविषयत्वमित्येव लक्षणमस्तु इति चेदुच्यते, पटादिकं निरूप्य प्रतिपाद्यस्य जिज्ञासामन्तरेणैव यत्राजिज्ञासितासम्बन्धघटाभिधानं केनचित्कृतं, तत्रास्य "घटज्ञानं भवतु" इत्याकार केच्छाजनकीभूतवक्तृज्ञानविषयघटत्वादावतिप्रसङ्गः, तादृशज्ञानस्यापि पटाभिधानानन्तरघटाभिधा नप्रयोजकत्वाद्, अतः अनन्तराभिधानप्रयोजकजिज्ञासाजनकेत्युक्तम्। तत्र ज्ञातुमिच्छा जिज्ञासा इति व्युत्पत्त्या स्वीयज्ञानगोचरेच्छा एव जिज्ञासा, न तु परकीयज्ञानगोचरेच्छा जिज्ञासा, "धातोः कर्मणः समानकर्तृकादिच्छायां वा"[7] इति सूत्राद् धात्वर्थेन समानकर्तृकायां स्वविषयिकायां च इच्छायां सनो विधानात्। तथा च ज्ञानविशिष्टेच्छा जिज्ञासा।

अनुमानप्रामाण्योपपादकज्ञानस्य यत्फलं सुखादि तद्गोचरज्ञानस्यापि तादृशजिज्ञासाप्रयोजकत्वात् तद्विषयसुखादौ अतिव्याप्तिः, अतो जिज्ञासाप्रयोजकत्वमुपेक्ष्य जिज्ञासाजनकत्वमुक्तम्। एवं च फलज्ञानस्य फलेच्छां प्रति कारणत्वादुपायेच्छां प्रति अन्यथासिद्धत्वेन जनकत्वाभावात् फलेच्छाया उपायेच्छां प्रति कारणत्वात् तादृशजिज्ञासाजनिकायाः फलेच्छाया विषये फलेऽव्याप्तितादवस्थ्यम्, अतो ज्ञानपदं लक्षणे प्रदत्तम्।

अत्रेदमवधेयं यत्, प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे किमनुमानमिति जिज्ञासा प्रयोजिका न तु प्रत्यक्षोपजीवकं किमिति जिज्ञासा भवति। तथा च उपजीवकत्वादौ सङ्गतित्वसङ्गमनार्थम् अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयस्मरणप्रयोजकनिरूप्यनिष्ठसम्बन्धः सङ्गतिरिति सङ्गतिलक्षणं वक्तव्यम्। तथाहि परिष्कृतं रामरुद्रीयटीकायाम् - "अनन्तराभिधानप्रयोजकजिज्ञासाजन कज्ञानविषयस्मरणानुकूलसम्बन्धो निरूपणीयनिष्ठा सङ्गतिः" इति।

तथाहि प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे प्रयोजकजिज्ञासा "अनुमानज्ञानं मे भवतु" इत्याकारिका, तज्जनकज्ञानम् "अनुमानज्ञानं मदिष्टसाधनम्" इत्याकारकं तद्विषयोऽनुमानं तत्स्मरणानुकूलसम्बन्धः अनुमाननिष्ठप्रत्यक्षकार्यत्वं सङ्गतिरिति ज्ञेयम्।

## 3. सङ्गतिविभाजनम्

सङ्गतेर्लक्षणं प्रयोजनं च निरूपितम्। अतोऽधुना सा सङ्गतिः कतिधा इत्यपि खलु विचार्यम्। सा च सङ्गतिर्भवति षड्विधा। ताश्च यथा – प्रसङ्गः, उपोद्घातः, हेतुत्वम्, अवसरः, निर्वाहकैक्यं निर्वाहकत्वं वा, कार्यैक्यम् एककार्यत्वं वेति। तदुच्यते –

सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा ।<br>
निर्वाहकैक्यकार्यैक्ये षोढा सङ्गतिरिष्यते।। इति।

7. अष्टाध्यायी –३/१/७(दीक्षितः २००९, पृ.- २१)

इदानीमेतेषां सङ्गतिभेदानां समासेनालोचनं विधीयते –

• **प्रसङ्गसङ्गतिः** -

प्रकृष्टः सङ्गः प्रसङ्गः। स च षड्विधासु सङ्गतिषु आद्यत्वं भजते। प्रसङ्गलक्षणं कृतं रामरुद्रीयकारेण –"उपोद्धातादिभिन्नः स्मरणप्रयोजकसम्बन्धः सङ्गतिः"[8] इति। अत उपोद्धातादिभिन्नत्वे सति स्मरणप्रयोजकसम्बन्धत्वमेव प्रसङ्गत्वम्। तदुच्यते जगदीशेन– "प्रसङ्गत्वं तु सङ्गतित्वे सत्युपोद्धातादिभिन्नत्वम्" इति। वस्तुगत्या प्रसङ्गलक्षणज्ञानस्य उपोद्धातादिसङ्गतिपञ्चकलक्षणज्ञानाधीनत्वात् प्रसङ्गस्य लक्षणान्तरं कृतं विपश्चिद्भिः –"स्मृतस्योपेक्षानर्हत्वं प्रसङ्गत्वम्" इति। तदुक्तमनुमितिवादे गदाधरेण –"प्रसङ्गत्वं स्मृतत्वे सत्युपेक्षानर्हत्वम्" इति। स्मृतस्योपेक्षानर्हत्वं नाम स्मृतिकालावच्छेदेनोपेक्षानर्हत्वमिति। किञ्च, स्मृतिकालावच्छेदकावच्छिन्नधर्मोऽपि द्वेषविषयतावच्छिन्नश्चेत्, निरूपणीयो न भवतीति कृत्वा प्रसङ्गलक्षणं परिष्कृतं गदाधरेण –"तच्च स्मृतिविषयतापन्नत्वे सति द्वेषविषयतानापन्नत्वम्" इति। अतः स्मृतिविषयतावच्छेदकद्वेषविषयतानवच्छिन्नधर्मवत्त्वं प्रसङ्गत्वमिति पर्यवसितम्।

यथा तर्कसंग्रहे यथार्थानुभवरूपप्रमाविभजनानन्तरं प्रमाकरणविभजने प्रसङ्गः सङ्गतिर्बोध्या।किञ्च, अनुमानचिन्तामणिप्रकरणे व्याप्तिपक्षधर्मताविशिष्टसद्धेतुनिरुपणानन्तरं तत्र प्रसङ्गसङ्गत्या हेत्वाभासनिरूपणं विहितमिति बोध्यम्। तदुच्यते गादाधर्यां –"हेत्वाभासनिरूपणे प्रसङ्गस्यापि सङ्गतित्वं सम्भवति, व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणे सति व्याप्तिपक्षधर्मताविरोधितद्विरहवतो दुष्टहेतोः स्मरणात्"[9] इति। तथाहि एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति न्यायेन व्याप्तिपक्षधर्मताविशिष्टहेतुनिरूपणे व्याप्तिपक्षधर्मताविरोधिव्याप्तिपक्षधर्मत्वाभावविशिष्टहेतोरपि स्मरणसम्भवे स्मृतिविषयतावच्छेदकत्वं हेत्वाभासपदार्थत्वे, अपि च हेत्वाभासनिरूपणं मा भवत्विति द्वेषासत्त्वेन द्वेषविषयतानवच्छेदकत्वमपीति स्मृतिविषयतावच्छेदकत्वे सति द्वेषविषयतानवच्छेदकत्वरूपप्रसङ्गसङ्गतेः हेत्वाभासनिरूपणे सङ्गतित्वं सूपपन्नम्।

• **उपोद्धातसङ्गतिः** -

सङ्गतिषट्केषु द्वितीया सङ्गतिस्तावद् उपोद्धात इति। उपोदुपसृष्टाद् गत्यर्थकाद् हन्-धातोः घञि उपोद्धातशब्दो निष्पद्यते। ये ये गत्यर्थकास्ते च ज्ञानार्थका अपीति न्यायेनात्र हन्-धातोः ज्ञानार्थकत्वमेव ग्राह्यम्। दिनकरीव्याख्यायामुपोद्धातलक्षणं प्रदत्तं –"प्रकृतोपपाकत्वमुपोद्धातः"[10]

---

8. रामरुद्रीयटीकायामनुमानखण्डम् (शर्मा २००२, पृ. - २८५)
9. हेत्वाभाससामान्यनिरुक्तौ गादाधरी (भट्टाचार्यः २०१०, पृ. - ३)
10. रामरुद्रीयटीकायामनुमानखण्डम् (शर्मा २००२, पृ. - २८५)

इति। प्रकृतोपपादकं नाम प्रकृतोपसाधकं प्रकृतसिद्ध्यर्थमालोचना इति यावत्। सर्वदर्शनसंग्रहे चोपोद्घातलक्षणं कृतं –"चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः"[11] इति। प्रकृतसिद्ध्यर्थां प्रकृतोपपादकविषयिणींकिमस्योपपादकमित्याकारिकां, चिन्तां जिज्ञासामुपोद्घातसङ्गति निर्वाहिकां विदुरित्यर्थः। अथवा "कृदभिहितो भावो द्रव्यवत्प्रकाशते" इति न्यायेन चिन्तापदं चिन्तनीयपरम्। प्रकृतसिद्ध्युपपादकतया चिन्तनीयत्वमित्यर्थः। तथा च अर्थद्वयेऽपि प्रकृतसिद्ध्युपपादकत्वमुपोद्घात इति फलितम्।

तथाहि अनुमितिप्रकरणे अनुमानप्रामाण्यनिरूपणानन्तरं तदुपपादकरूपेणोपोद्घातसङ्गत्या व्याप्तिस्वरूपनिरूपणमारब्धम्। उपपादकत्वं चात्र क्वचिद् ज्ञापकत्वरूपं, क्वचिद् घटकत्वरूपं, क्वचिच्च उपस्थापकत्वरूपमिति ध्येयम्। तत्र ज्ञापकत्वं नाम तद्विषयकज्ञानजनकज्ञानविषयत्वमिति। तथाहि अनुमानं प्रमाणं प्रमितिकरणतावच्छेदकवत्त्वाद् इन्द्रियवदित्यनुमाननिष्ठप्रामाण्यानुमितिरूपज्ञानस्य जनकं यद् व्याप्तिज्ञानं, तज्ज्ञानविषयत्वं व्याप्तौ वर्तते इति ज्ञापकत्वरूपस्य उपपादकस्य सत्त्वादुपोद्घातलक्षणं सङ्गतमिति बोध्यम्। किञ्च, अनुमितिः इतरभिन्ना व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वादित्यनुमितौ यो हेतुः व्याप्तिप्रकारकपक्षधर्मताज्ञानजन्यज्ञानत्वरूपमिति, तत्र अज्ञातव्याप्तिकस्य सामान्यतो व्याप्तिपदवाच्यत्वेन हेतुघटकीभूता का व्याप्तिरित्याकारिकायां जिज्ञासायां व्याप्तिनिरूपणमारब्धमिति व्याप्तिस्वरूपनिरूपणे घटकत्वरूपोपपादकत्वसत्त्वात् उपोद्घातसङ्गतिः सूचितेति बोध्यम्।

• **हेतुतासङ्गतिः** -

हेतुर्नाम कारणम्। हेतोर्भावो हेतुता कारणत्वमिति यावत्। सा च हेतुता षट्सु सङ्गतिषु तृतीया। अत्र यद्यपि कार्याव्यवहितपूर्वक्षणे नियतकार्याधिकरणवृत्तित्वरूपे कारणत्वे हेतुत्वशब्दः प्रसिद्धस्तथापि अत्र अजहत्स्वार्थलक्षणया हेतुत्वशब्देन कारणता कार्यता चेत्युभयमेव ग्राह्यम्। तेन च कारणे कार्ये वा ज्ञाते किमस्य कार्यं कारणं वेति जिज्ञासोदयेन उपजीवकत्वरूपमुपजीव्यत्वरूपं वा हेतुत्वं निष्पद्यते। अत उपजीव्योपजीवकभावोऽपि हेतुत्वसङ्गत्यामन्तर्याति। किञ्च, हेतुतायाः केनचित् सम्बन्धेन सङ्गतित्वं वक्तव्यम्। तादृशसम्बन्धश्चात्र निरूपकता आश्रयता चेति। कारणतानिरूपकत्वस्यैव कार्यतारूपत्वात् कार्यत्वस्यापिहेतुतायामेवान्तर्भावः। एवं कार्यत्वकारणत्वयोः हेतुतायामन्तर्भावात् सङ्गतेः षोढात्वं न व्याहन्यते।

यथा प्रत्यक्षप्रमानिरूपणानन्तरं प्रत्यक्षप्रमाणनिरूपणे हेतुतासङ्गतिर्बोध्या। तथाहि प्रत्यक्षप्रमारूपे कार्ये ज्ञाते किमस्य कारणमिति जिज्ञासोदयेन उपजीवकत्वरूपेण हेतुतासङ्गत्या

---

11. सर्वदर्शनसंग्रहे जैमिनीयदर्शनम् (माधवाचार्यः २००२, पृ. - ४२०)

प्रत्यक्षप्रमाणनिरूपणं कृतमिति बोध्यम्। अत्र च कारणतायाः स्वाश्रयत्वसम्बन्धेन हेतुतासङ्गतित्वं ज्ञेयम्। अपि च, प्रत्यक्षप्रमाणनिरूपणानन्तरमुपजीव्योपजीवकभावसङ्गत्या अनुमानप्रमाणं निरूपितम्। तथाहि चक्षुरादिना अनुमानस्य व्याप्तिज्ञानस्य जननादनुमाने प्रत्यक्षप्रमाणकार्यत्वरूपोपजीवकत्वंवर्तते। एवमनुमितावपि परामर्शरूपप्रत्यक्षप्रमितिजन्यत्वमस्तीति प्रत्यक्षप्रमानिरूपणोत्तरमनुमितिनिरूपणं विहितमिति भावः। प्रभाटीकाकृतस्तु उपजीव्योपजीवकभावसङ्गत्या प्रत्यक्षनिरूपणानन्तरमनुमितिनिरूपणमसङ्गतममित्याहुः, अनुमितौ प्रत्यक्षोपजीवकत्वस्येव प्रत्यक्षेऽनुमित्युपजीवकत्वस्यापि सत्त्वेन प्रकृते तस्यानन्तर्याभिधाननियामकत्वासम्भवात्। तन्मते तु प्रत्यक्षनिरूपणानन्तरमनुमितिनिरूपणमवसरसङ्गत्या भवतीति बोध्यम्। तद्विचारस्तु अवसरसङ्गतिनिरूपणावसरे वक्ष्यते।

- **अवसरसङ्गतिः -**

चतुर्थी सङ्गतिस्तावदवसरः। अवपूर्वकात् सृधातोरचि अवसरशब्दो निष्पद्यते। अनन्तरवक्तव्यत्वं भवति अवसरसङ्गतिः। अवसरसङ्गतिलक्षणं कृतमुपमानखण्डे रामरुद्रीयटीकाकारेण –"प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्त्या अनन्तरवक्तव्यत्वमवसरः"[12] इति। तथाहि कस्यचिद् विषयस्य निरूपणादनन्तरं जिज्ञासानिवृत्तौ सत्यां तदनन्तरं यत् खलु अवश्यमेव वक्तव्यं, तदवश्यवक्तव्यत्वमेव अवसरसङ्गतिरिति ज्ञेयम्।

यथा अनुमानोपमानयोः द्वयोरपि प्रत्यक्षोपजीवकत्वेऽपि अनुमानस्य बहुवादिसम्मतत्वेन निरसनीसाल्पवादिविप्रतिपत्तिकत्वेन सुगमतया अनुमाने एव प्रायशो व्युत्पित्सोः प्रथमतो जिज्ञासा जायत इत्यनुमाननिरूपणेन प्रतिवन्धकीभूतशिष्यजिज्ञासानिवृत्त्या अवश्यवक्तव्यत्वमुपमानस्य इत्यवसरसङ्गत्या अनुमाननिरूपणानन्तरमुपमाननिरूपणं विहितमिति बोध्यम्। प्रभाटीकाकारस्तु प्रत्यक्षनिरूपणानन्तरमनुमितिनिरूपणेऽपि अवसरसङ्गतिं प्रदर्शितवान्। तथाहि "प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे"[13] इति विभागवाक्यात् प्रथमतः प्रत्यक्षस्योपस्थितौ तत्रैवानुमितिनिरूपणप्रतिबन्धिका किं प्रत्यक्षमित्याकारिका जिज्ञासा जायते अनन्तरं प्रत्यक्षनिरूपणेन तादृशजिज्ञासानिवृत्तौ अनन्तरोपस्थितानुमितेरेव वक्तव्यतया अवसरसङ्गतित्वलाभो भवतीति टीकाकृन्मतम्।

- **निर्वाहकैक्यसङ्गतिः -**

निर्वाहकैक्यं तावत् पञ्चमी सङ्गतिः। "निर्वाहकैक्यम् एकप्रयोजकप्रयोज्यत्वम्" इति

---

12. रामरुद्रीयटीकायामुपमानखण्डम् (शर्मा २००२, पृ. - ३५१)
13. कारिकावली (शास्त्री २०१६, पृ. - ४१९)

रामरुद्रीयकृत्कृतं निर्वाहकैक्यसङ्गतिलक्षणम्। यत्र एकेन कारणेन कार्यद्वयं तदधिकसंख्याकं वा कार्यमुत्पाद्यते तत्रेयं सङ्गतिर्बोध्या। इदं तु निर्वाहकत्वमित्यप्युच्यन्ते। एकप्रयोजकप्रयोज्यत्वं च एककार्यनिर्वाहकत्वम्। एककार्यनिर्वाहकत्वं पुनः कारणकारणतावच्छेदक-एतदुभयसाधारणं प्रयोजकत्वमिति।

यथा व्याप्तिपक्षधर्मतयोरनुमित्यात्मककार्याजनकत्वेऽपि तज्जनकीभूतज्ञानविषयतावच्छेद कत्वेनैककार्यानुकूलत्वम्। तत्र सामान्यतः अनुमितिलक्षणैककार्यानुकूलत्वज्ञाने किं तदनुकूलमिति जिज्ञासायामनन्तरं निर्वाहकैक्यसङ्गत्या पक्षधर्मतानिरूपणं विहितमिति बोध्यम्।

• **कार्यैक्यसङ्गतिः** –

सङ्गतिषट्केषु अन्तिमं तावत् कार्यैक्यमिति। इदं तु एककार्यत्वमित्यप्युच्यते। एकं समानं कार्यं ययोः, तयोर्भावः इतिएककार्यत्वमिति बहुव्रीह्युत्तरं त्वप्रत्ययः। कार्यैक्यम् एककार्यानुकूलत्वमिति एककार्यत्वसङ्गतिलक्षणम्। निरूपितनिरूपणीययोरुभयोः एककार्यानुकूलत्वमेव एककार्यत्वम्। एककार्यानुकूलत्वं च एककार्यप्रयोजकत्वं, तदर्थश्च स्वभिन्नत्वे सति स्वप्रयोज्यकार्यप्रयोजकत्वम्। यथा भाषापरिच्छेदस्यानुमानखण्डे पक्षधर्मतानिरूपणे अनुमितिलक्षणैककार्यानुकूलत्वसङ्गतिर्भवतीति बोध्यम्। किञ्च, अनुमानचिन्तामणिग्रन्थे हेत्वाभासनिरूपणेऽपि एककार्यकारित्वरूपस्य कार्यैक्यस्य सङ्गतित्वं प्रदर्शितम्। तथाहि स्वं व्याप्तिपक्षधर्मताविशिष्टहेतुः, तद्भिन्नत्वं हेत्वाभासे, एवं व्याप्तिपक्षधर्मताविशिष्टहेतुप्रयोज्यं यत् तत्त्वनिर्णयविजयरूपं कार्यं, तत्प्रयोजकत्वमपि हेत्वाभासे इति तत्र एककार्यानुकूलत्वरूपसङ्गति लक्षणसङ्गतिः। न च हेत्वाभासज्ञानकार्यं प्रति हेत्वाभासस्य जनकताविरहेण प्रयोजकत्वाभावात् कुतो लक्षणसङ्गतिरिति वाच्यम्, प्रयोजकत्वं जनकजनकतावच्छेदकसाधारणं तन्निष्ठान् यथासिद्धिभिन्नान्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वरूपम्। तथा च हेत्वाभासे जनकत्वरूपप्रयोजकताविरहेऽपि हेत्वाभासज्ञाननिष्ठा या तत्त्वनिर्णयादिजनकता, विषयतया तदवच्छेदकताया हेत्वाभासे वर्तमानतया, उभयसाधारणप्रयोजकताया हेत्वाभासेऽप्यक्षतत्वान्न कोऽपि दोष इति बोध्यम्।

किञ्च, एककार्यात् एककर्तुर्दर्शनात् कर्त्रन्तरस्य स्मृतिर्भवतीति स्मारकगणमध्येऽपि एककार्यत्वं परिगणितम्। तथाहि गौतमसूत्रं –"प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणादृश्यपरिग्र हाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्व क्रियारागधर्माधर्मनिमित्तेभ्यः"[14] इति शम्।

14. न्यायसूत्रम् –३\२\४३ (गुप्तः २०१२, पृ. -१६३)

**सहायकग्रन्थाः**


- कुमारिलभट्टः, १९९०, मीमांसाश्लोकवार्तिकम्, सम्पा. शाम्बशिवशास्त्री, त्रिवान्द्रामः,सि.वि.एइच् पाब्लिकेशनस्
- गङ्गेशोपाध्यायः, २०१०, सामान्यनिरुक्तिप्रकरणम्, सम्पा. वामाचरण-भट्टाचार्यः, वाराणसी, श्री-साधुबेला-आश्रमः
- गङ्गेशोपाध्यायः, २०११, व्याप्तिपञ्चकम्, सम्पा. राजेन्द्रनाथघोषः, कोलकाता,पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्
- जे.एल्. गुप्तः, २०१२, षड्दर्शनसूत्रसंग्रहः, दिल्ली, चौखम्बा-संस्कृतप्रतिष्ठानम्
- विश्वनाथपञ्चाननः, २००२, कारिकावली, सम्पा. आत्मारामशर्मा, दिल्ली, राष्ट्रिय-संस्कृत-संस्थानम्
- विश्वनाथपञ्चाननः,२०१४, न्यायसिद्धान्तमुक्तावली, सम्पा. गजाननशास्त्री तथा आचार्यलोकमणिदाहालः, वाराणसी,चौखम्बा-सुरभारती-प्रकाशनम्
- विश्वनाथपञ्चाननः,२०१६, न्यायसिद्धान्तमुक्तावली, सम्पा. श्री सी. शङ्कररामशास्त्री, दिल्ली, चौखम्बा-संस्कृतप्रतिष्ठानम्
- भीमाचार्य-झल्कीकारः, २०१५, न्यायकोशः, सम्पा. वासुदेवशास्त्रि-अभ्यङ्करः, वाराणसी,चौखम्बा-सुरभारती-प्रकाशनम्
- Sayan-Madhava. 2008. Sarva-Darshana-Samgraha. Ed. & Trans. E. B. Cowell & A. E. Gough. Delhi: Bharatiya Kala Prakashan.


Received on: 19/03/2020 Accepted on: 11/02/2021

# वैदिकोक्तसंस्कारत्वेन देह-रूपसज्जयोः साम्प्रतिककालदृष्ट्याद्य मूल्याङ्कनम्

अनुरिमा-गुप्ता*

**सारसंक्षेपः**

सौन्दर्यप्रिया हि मानवाः। स्वकं रूपं वर्धयितुकामेन तेन सदा प्रयत्यते। यस्य नैसर्गिकं रूपं विद्यमानम्, सोऽपि यथा चेष्टते, यस्य नास्ति न्यूनं वेति, सोऽपि यथासाध्यं प्रयत्नं करोति। वर्तमाने काले बहुत्रैव दरीदृश्यन्ते रूपचर्चाकेन्द्रानि। तत्र स्त्रीपुंसां च नियतमवाधञ्च विचरणं वर्तते। किन्तु वैदिकयुगात् प्रभृत्येव निरवच्छिन्नत्वेन मानवीयरूपचर्चायाः देहालंकृतिकरणस्य चासक्तिर्बभूव। वर्तमानकालवत् तदानीमपि मानवाः विविधानि मण्डनद्रव्यानि व्यवहरन्ति। तैः व्यवहृतानि रूपसज्जायाः सहायकद्रव्याणि सत्यमेव विस्मयं जनयन्ति अस्मान्। विविधेषु गृह्यसूत्रेषु संस्काराणां मध्ये यस्योल्लेखः अस्माभिरुपलभ्यते। अतः वर्तमानयुगवत्तदानीं रूपचर्चायाः देहसज्जायाश्चोपादानानि अवश्यमेव आदरणीयानि।

**पारिभाषिकशब्दाः**

पात्रीलक्षणम्, कन्यासमण्डनम्, ज्ञातिकर्मानुष्ठानम्, कन्याकेशेषु ऊर्णाबन्धनम्, सीमन्तोन्नयनम्, उदुम्बरशलाटुबन्धनम्, जातकर्म, चूडाकरणम्, कपुष्णिकाच्छेदनम्, अजिन-रुरु-छागचर्मपरिधानम्, पलाश-उदुम्बर-विल्वकाष्ठदण्डधारणम्, मेखलाधारणम्, मृतसज्जासंस्कारः।

## पूर्णपत्रम्

मण्डनप्रियाः हि मनुष्याः। स्वकीयं रूपं वर्धयितुं स नियतं चेष्टते। यस्य नैसर्गिकं रूपं विद्यते सोऽपि यतते, यस्य रूपं म्लानं स्वल्पं वेति तस्यापि चेष्टान्तो नास्ति। वर्तमानकाले रूपचर्चाकेन्द्राणि (Beauty Parlour) इति सर्वत्र विद्यन्ते। किन्तु सुप्राचीनवैदिकयुगे वर्तमानयुग इव रूपचर्चाकेन्द्राणि नासन्, तथापि नारीपुरुषाः विविधप्रकारेण स्वरूपचर्चां देहसज्जाञ्च कृतवन्तः। येषामुल्लेखः विविधगृह्यसूत्रान्तर्गतसंस्काराणां मध्ये आप्यते। विविधवर्णमयाः वस्त्र-मेखला-उत्तरीय-औज्ज्वल्यसम्पादकप्रसाधनद्रव्यपुष्परेणवः वृक्षरसादयश्च तावत् तेषां रूपचर्चायाः देहसज्जायाश्च उपकरणानि।

वेदे गृह्यसूत्रस्य संख्या बह्वी। प्रतिवेदम् एकाधिक-गृह्यसूत्राणामुल्लेखः अस्ति। तेषां मध्ये उल्लेखयोग्यानि तावत् ऋग्वेदस्य आश्वलायनशाङ्खायनगृह्यसूत्रद्वयम्, सामवेदस्य

*M.Phil Scholar , Sanskrit Department, University of Gour Banga.*

गोभिलगृह्यसूत्रम्, शुक्लयजुर्वेदस्य पारस्करगृह्यसूत्रम्, कृष्णयजुर्वेदस्य बौधायनगृह्यसूत्रम्, अथर्ववेदस्य कौशिकगृह्यसूत्रञ्चेति। गृह्यसूत्राणां मध्ये आश्वलायन-शाङ्खायन-गोभिल-पारस्करगृह्यसूत्रेषु उल्लिखितसंस्कारेषु वैदिकयुगस्य रूपचर्चा-देहसज्जादिविषये मया प्रबन्धेऽस्मिन् पर्यालोच्यते।

संस्कारेषु अन्यतमस्तावद् विवाहसंस्कारः। विवाहविषये आश्वलायनस्तस्य गृह्यसूत्रे कथयति स्म – कन्या भविष्यति रूपवती नीरोगवती चेति – "बुद्धिरूपशीललक्षणसम्पन्नाम् अरोगाम् उपयच्छेता"। शाङ्खायनेन अपि तस्य गृह्यसूत्रे सूत्रितम् – यस्याः रमण्या अङ्गानि सुन्दराणि, मस्तकस्थकेशविन्यासः समदैर्घ्ययुतस्तथा च केशगुच्छं दक्षिनस्कन्धान्तं यावत् प्रलम्बितं, तादृशी रमणी विवाहार्हा – "यस्या अभ्यत्ममङ्गानि स्युः। समाः केशान्ताः आवर्तावपि यस्यै स्यातां प्रदक्षिनौ ग्रीवायाम्"इति। गोभिलाचार्येणापि तस्य गृह्यसूत्रे पात्रीनिर्वाचनप्रसङ्गे उक्तम् – "लक्षणप्रशस्तान् कुशलेन"इति। लक्षणप्रशस्तशब्दार्थः प्रोक्तः मृदुलाटीकायां श्रीमुकुन्दझावक्सीमहाभागेन– "लक्षणानि च शुभाशुभसूचकानि तनुलोमकेशदशनत्वादीनि प्रत्यक्षगम्यानि वाह्यानि । तथा च मनुः (३।१०) –

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्।<br>तनुलोमकेशदशनां मृद्वङ्गीमुद्वह्ये स्त्रियम्"।।

पारस्करगृह्यसूत्रे किन्तु वरवधूनां योग्यताविषये कापि चर्चा न विद्यते।

विवाहदिवसस्य मण्डनविषये शाङ्खायनो व्याख्याति यत्- विवाहदिनस्य रात्रौ विविधानाम् ओषधियुक्तफलसुगन्धिद्रव्याणाञ्च मिश्रितजलेन कन्यायाः पुण्यस्नानकर्म विधेयम् - "अथैतां रात्रीं श्वस्तृतीयां वा कन्यां वक्ष्यन्तीति। तस्या रात्रिमतीत्य निशायां सर्वौषधिभिः फलोत्तमैः सुरभिमिश्रितैः सशिरस्कां कन्याम् अप्लाव्य"। दिवसेऽस्मिन् वरः कन्यकायै अहतवासमञ्जनं, तैलं, दक्षिणहस्ते शललीं त्रिविधसूत्रञ्च, वामहस्ते दर्पणञ्च ददाति। परिजनाः कन्यायाः देहेषु त्रिविधरत्नं रक्तकृष्णवर्णीयं सूत्रञ्च वध्नाति। विविधपुष्पेण तस्याः सज्जा सम्पूर्णा भवति – "ताभिः अनुज्ञातो थास्यै वासः प्रयच्छति 'रैभ्यासीदि'ति। चित्तिरा उपवर्हणमि'ति आञ्जनकोश आदत्ते। समञ्जन्तु विश्वे देवा' इति समञ्जनीया। यथेयं शचीं वावातां सुपुत्रां च यथादितिम्। अविधवां चापालामेवं त्वामिह रक्षतादिममि'ति। दक्षिणे पाणौ शललीं त्रिवृतं ददाति। 'रूपं रूपमि'ति आदर्शं सव्ये। रक्तकृष्णमाविकं क्षौमं वा त्रिमणिं प्रतिसरं ज्ञातयो स्या वध्नन्ति नीललोहितमि'ति। मधुमतीरोषधीरिति मधूकानि वध्नाति" इति।

विवाहस्य मण्डनविषये गोभिलाचार्येण 'ज्ञातिकर्म' नाम अनुष्ठानस्य उल्लेखः कृतः। उक्तेऽनुष्ठाने कन्यायाः सखीजनः यवचूर्णेन माषचूर्णेन वा सर्वाङ्गमर्दनं कृत्वा स्नानं कारयिष्यति – "क्लीतकैर्यवैर्म्माषैर्व्वा प्लुता सुहृत् सुरोत्तमेन सशरीरां त्रिर्मूर्ध्वन्यभिषिञ्चेत् कमिवेद ते

नाम मदोनामासीति समानयामुमिति पतिनाम गृह्वीयात् स्वाहाकारान्ताभिरूपस्थमुत्तराभ्यां प्लावयेत् ज्ञातिकर्मैतत्"। अतःपरम् पाणिग्रहणानुष्ठाने वरः कन्यायाः स्नानं कारयित्वा अहतवासस्य परिधानं कारयिष्यति। अनेन वस्त्रावृतायज्ञोपवीतिनीञ्च कन्यां पत्युरभिमुखम् आनेतुं निर्दिशति गोभिलाचार्यः – "अथ यस्याः पाणि ग्रहीष्यन् भवति सशिरस्काप्लुता भवति। अहतेन वसनेन पतिः परिदध्याद् या अकृन्तन्नित्येतयर्च्चा परिधत्त धत्त वाससेति च। प्रावृतां यज्ञोपवीतिनीमभ्युदानयञ्जपेत् सोमो ददद्गन्धर्वायेति"। पारस्करेण तस्य गृह्यसूत्रे विवाहकाले कन्यायाः सज्जाविषये कोऽपि मन्तव्यो न कृतः। केवलं विवाहे वरो वध्वै वसनमुत्तरीयञ्च प्रददाति । अत उक्तम् – "अथैनां वासः परिधापयति – जरां गच्छ परिधित्स्व वासो ... .युष्मतीदं परिधत्स्व वास इति। अथोत्तरीयम् – या अकृन्तन्नवयं या अतन्वत। याश्च ...युष्मतीदं परिधत्स्व वास इति"। अपरञ्च, आश्वलायनो विविधालंकारैः सुसज्जितस्य कन्यादानस्य उल्लेखं विदधाति – "अलंकृत्य कन्याम् उदकपूर्वां दद्यात्"। विवाहकाले कन्यायाः केशमुर्णया बद्धं भवतीति रीतिः। अतः आश्वलायनेनोक्तम् – "उर्णास्तुके केशपक्षयोर् बद्धे भवतः"।

ततः 'सीमन्तोन्नयनम्' नाम संस्कारः। विवाहात् परं कन्यायाः गर्भधारणस्य चतुर्थे षष्ठे च अष्टमे मासि वा 'सीमन्तोन्नयनम्' नाम अनुष्ठानं भवति। 'सीमन्तोन्नयनम्' पदस्यार्थः सीमन्तस्योन्नयनमुत्तोलनं वेति। अस्मिननुष्ठाने भार्यायाः स्नानकर्मणः सम्पादनान्ते निश्छिद्रस्य नववसनस्य परिधानं कारयित्वा अग्नेः पश्चात् आनयनाय निर्देशो वर्तते शांखायनस्य गृह्यसूत्रे – "स्नाताम् अहतवाससं पश्चादग्नेरुपवेश्य"। न केवलं शांखायनः, गोभिलाचार्योऽपि वध्वाः आमस्तकं स्नानस्योल्लेखं करोति – "प्रातः सशिरस्का प्लुतोदगग्रेषु दर्भेषु पश्चादग्नेरूदगग्रेषु दर्भेषु प्राच्युपविशति"। अतःपरम्, शलल्या त्रिविधेन दर्भेण च पत्न्याः सीमन्तमुर्द्धमुन्नयति मतमिदं प्रत्येकेषु गृह्यसूत्रेषु स्वीकृतम्। किन्तु गोभिलाचार्यः प्रवदति – प्रथमे शुष्कदर्भेण निर्मितेन पिञ्जल्या वध्वाः त्रिवारं केशविन्यासं कृत्वा ततः शरेण सीमन्तस्य मध्यभागस्य केशस्योन्नयनं करणीयम्। ततः सूत्रपूर्णतर्कुणा सीमन्तस्य उर्द्धमुन्नयनं कृत्वा त्रिश्वेतया शलल्या केशविन्यासः करणीयः - "अथ सीमन्तमूर्द्धमुन्नयति भूरिति दर्भपिञ्जलीभिरेव प्रथमम् भुवरिति द्वितीय स्वरिति तृतीयमथ वीरतरेण येनादितेरित्येतयर्च्चा थ पूर्णचात्रेणराकामहमित्येतयर्च्चा त्रिश्वेतया च शलल्या यास्तेराके सुमतय इति"। शांखायनस्तस्य गृह्यसूत्रे भणति स्म – अस्मिन्ननुष्ठाने सौन्दर्यसम्पादनाय उदुम्बरफलानि सूत्रेण वद्ध्वा पत्न्याः कण्ठदेशं बध्नाति– "त्रिवृति प्रतिमुच्य कण्ठे बध्नाति 'अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेदि'ति"। किन्तु गोभिलाचार्यमते– पत्न्याः वस्त्राञ्चलं शरीरभागो वा उदुम्बरगुच्छेन शलाटुगुच्छेन च बन्धनीयौ। तथाहि उक्तम्– "पश्चात् पतिरवस्थाययुग्मन्तमौदुम्वर शलाटुग्रथ्नमाबध्नाति अयमूर्ज्जावतो वृक्ष इति"।

अतःपरम्, नवजातकस्य जन्मग्रहणात् परमेकमनुष्ठानं भवति, यस्य नाम 'जातकर्म'। अस्मिन्ननुष्ठाने सौन्दर्यसम्पादनाय सुवर्णेन अलंकृतो भवति नवजातकः। शांखायनस्तस्य गृह्यसूत्रे

प्रवदति – नवजातकस्य दक्षिणे हस्ते सूत्रेण सुवर्णखण्डो बन्धनीयः – "शणसूत्रेण विग्रन्थ्य जातरूपम्"। पारस्करः कथयति – सुवर्णाच्छादितेन अनामिकाङ्गुल्या पिता पुत्रं मधु घृतं वा प्राशयति– "अनामिका सुवर्णन्तिर्हितया मधुघृते प्राशयति घृतं वा भूस्त्वयि दधाति"।

जन्मनः परं वर्णभेदेन एक-त्रि-पञ्च-सप्ततमेषु वयःसु वा नवजातकस्य केशकर्तनस्य विधानं वर्तते। अस्य संस्कारस्य नाम 'चूडाकरणम्'। आश्वलायनेन सूत्रितम् – अस्मिन्ननुष्ठाने घृतदधिमिश्रिते शीतोष्णोदके मस्तकं प्रक्षालयित्वा नवजातकस्य केशच्छेदनं करणीयम् – "पश्चात् कारयिष्यमाणस्यावस्थाय शीतोष्णा अपः समानीयोष्णेन वाय उदकेनेहीति।। तासां गृहीत्वा नवनीतं दधिद्रप्सान् वा प्रदक्षिणं शिरस् त्रिः उन्दति। अदितिः केशान् वपत्वाप उन्दन्तु वर्चस इति"। अस्मिन्ननुष्ठाने नवजातकस्य सज्जाविषये आश्वलायनेन शांखायनेन च कोऽपि मन्तव्यो न कृतः। किन्तु पारस्करगृह्यसूत्रे उच्यते– अस्मिन्ननुष्ठाने बालको नववस्त्रेण अलंकरणीयः– "... वाससी परिधाप्याङ्क आधाय पश्चादग्नेरुपविशति"। गोभिलाचार्येणापि उदितम् – शुद्धवस्त्रेण बालको आच्छादनीयः – "अथ माता शुचिना वस्त्रेण कुमारमाच्छाद्य पश्चादग्नेरुदग्रेषु दर्भेषु प्राच्युपविशति।।" पुनः गोभिलाचार्यो वदति – चूडाकरणानुष्ठाने उदुम्बरकाष्ठस्य क्षुरदर्पणेन बालकस्य कपुष्णिकाच्छेदनं करणीयम्। कपुष्णिकाच्छेदनान्ते कपुच्छलच्छेदनं कार्य्यम् – "ऐतयैवो ओरा कपुष्णिकाम्।ऐतयैवो वृण कपुच्छलम्"। अनेन पञ्चचूडेन त्रिचूडेन वा सशिखं शिखाशून्येन वा च मण्डनं कर्तव्यम् इत्युक्तं गोभिलाचार्येण - "उदगग्नेरुत्सृप्य कुशलीकारयन्ति यथागोत्र कुलकल्पम्"। किन्तु चूडाकरणकाले शलल्या केशविन्यासं लौहेन निर्मितेन क्षुरेण केशच्छेदनं च करणीयम् इत्युक्तं पारस्करेण शांखायनेन च गृह्यसूत्रयोः। पारस्करः पुनः अवदत् – प्रयोजनानुसारं बालकः शिखीधारणं कर्तुं शक्नोति। किन्तु केशकर्तनात् परं बालकस्य संवत्सरपर्यन्तं केशच्छेदनं न विधेयम् – "संवत्सरं ब्रह्मचर्यमवपन्नं च केशान्ते द्वादशरात्र षडात्रं त्रिरात्रमन्ततः"।

जन्मग्रहणात् परम् अष्टमे दशमे वत्सरे वा वयसि ब्राह्मणस्य एकादशवत्सरे क्षत्रियस्य द्वादशतमवत्सरे वैश्यस्य च उपनयनसंस्कारः कर्तव्यः। प्रतिगृह्यसूत्रं हि उपनयनस्य वयःसीमाविषये द्विमतं नास्ति। किन्तु उपनयनस्य सज्जाविषये गृह्यसूत्राणि किञ्चित् भिन्नमतं प्रकाशयन्ति। गोभिलाचार्यः पारस्करश्च व्याकुरुतः– उपनयनकाले बालकस्य मस्तकमण्डनं स्नानं च कारयित्वा अखण्डवसनस्य परिधानं कारयितव्यम्। द्वौ आचार्यौ आश्वलायन-शांखायनौ उपनयनकाले सज्जाविषये कमपि मन्तव्यं न विहितवन्तौ। किन्तु उपनयनकाले वस्त्रधारणप्रसङ्गे आश्वलायनः अवदत् – ब्राह्मणाः अजिनेन, क्षत्रियाः रुरुचर्मणा, वैश्याः छागचर्मेणावृताः तिष्ठन्ति – "ऐणेयेन वाजिनेन ब्राह्मणं रौरवेन क्षत्रियम् आजेन वैश्यम्।।"वर्णीलवस्त्रपरिधानेच्छुकः ब्राह्मणः गैरिकवर्णयुक्तवस्त्रेण, क्षत्रियः इषत्-रक्तवर्णयुक्तवस्त्रेण, वैश्यः पीतवर्णयुक्तवस्त्रेणावृताः भविष्यन्ति – "यदि वासांसि वसीरन् रक्तानि वसीरन् काषायं ब्राह्मणो माञ्जिष्ठं क्षत्रियो हारिद्रं वैश्यः।।"किन्तु शांखायनेन प्रोक्तम्– ब्राह्मणादिवर्णक्रमेण कृष्णाजिनेन चित्रमृगचर्मणा

गाभीचर्मणा च वस्त्रपरिधानं करिष्यति – ''ऐणेयेनाजिनेन। गर्भदशमेषु वा। गर्भैकादशेषु क्षत्रियं रौरवेन। गर्भद्वादशेषु वैश्यं गवेन''। वर्णानुक्रमेण क्षौमेन शनेन वा, कार्पासेन, और्णेन च वसनपरिधानं कार्य्यम्, इत्युक्तं गोभिलाचार्येण – ''क्षौमशणकार्पासौर्णान्येषां वसनानि''। उपनयनकाले दण्डधारणसम्पर्के आश्वलायनः प्रोक्तवान् – ब्राह्मणः पलाशकाष्ठेन, क्षत्रियः उदुम्बरकाष्ठेन, वैश्यः विल्वकाष्ठेन च दण्डधारणं करिष्यन्ति – ''पालाशो ब्राह्मणस्य औदुम्बरः क्षत्रियस्य वैल्वो वैश्यस्य''। शांखायनमते – ब्राह्मणादिवर्णक्रमेण पलाशेन विल्वेन वा नाग्रोधेन उदुम्बरकाष्ठेन च दण्डधारणं कुर्यात्। तदुक्तम्– ''पालाशो वैल्वो वा दण्डो ब्राह्मणस्य। नैयग्रोधः क्षत्रियस्य। औदुम्बरो वैश्यस्य''इति। गोभिलाचार्यमते – ब्राह्मणादिवर्णक्रमेण पार्णेन, विल्वेन, अश्वत्थेन काष्ठेन च दण्डधारणं करिष्यति – ''पार्णवैल्वाश्वथ्थादण्डाः''इति। उपनयनकाले गोभिलाचार्येण उत्तरीयपरिधानस्यापि निर्देशः प्रदत्तः। ब्राह्मणादित्रिवर्णक्रमेण कृष्णसारमृगचर्मणा, रुरुमृगचर्मणा, अजचर्मणा च निर्मितमुत्तरीयं धारयिष्यति– ''ऐणेयरौरवाजान्यजिनानि''। आश्वलायनेन शांखायनेन च उपनयनकाले मेखलाधारणस्य निर्देशो विहितः। आश्वलायनमते – ब्राह्मणादिवर्णक्रमेण मुञ्जतृणेन, धनुर्ज्यया, मेषलोमेन च मेखलाधारणं करिष्यति – ''मौञ्जी ब्राह्मणस्य धनुर् ज्या क्षत्रियस्य आवी वैश्यस्य''। शांखायनः मेखलाधारणसम्पर्के आश्वलायनेन सह सहमतं पोषयति। केवलं वैश्यस्य पशमीसूत्रेण मेखलाधारणस्य निर्देशः प्राप्यते– ''मौञ्जी मेखला ब्राह्मणस्य, धनुर्ज्या क्षत्रियस्य उर्णासूत्री वैश्यस्य''। किन्तु पारस्करस्तस्य गृह्यसूत्रे वस्त्र-दण्ड-मेखला-उत्तरीयधारणविषये किमपि नोवाच।

अतःपरम्, 'समावर्तनम्' नाम संस्कारः। समावर्तनानुष्ठाने ब्रह्मचारिणः सज्जासम्पर्के आश्वलायनस्तस्य गृह्यसूत्रे भणति यत् समावर्तनानुष्ठाने ब्रह्मचारी स्वस्य आचार्याय च पृथक्तया मणिं, कर्णकुण्डलद्वयं, वस्त्रद्वयं, छत्रं, पादुकाद्वयं, दण्डं, स्रक्, गात्रमर्दनद्रव्यं, प्रसाधनद्रव्यं, कज्जलं, उष्णीषञ्चेति द्रव्याणि आनयिष्यति। एकक्लीतकवीजचूर्णेन गात्रमर्दनं कृत्वा ईषदुष्णजलेन स्नानान्ते समावर्तनकारी शिष्यो नववस्त्रं परिदधाति। चक्षुद्वये कज्जलं, कर्णद्वये कुण्डलं च धारयित्वा अङ्गेषु अनुलेपनं करिष्यति। हस्तद्वये कुङ्कुमस्य अनुलेपनं कृत्वा वर्णभेदेन प्रथमे मुखे ततः हस्ते उदरे च अनुलेपनद्रव्यैः मण्डनं कर्तव्यम्। ततः स्रक्-पादुकाद्वयं च धारयित्वा हस्ते छत्रं वेणुदण्डं च नीत्वा कण्ठे मणिं मस्तके उष्णीषञ्च धारयित्वा अग्नौ समिधस्थापनं करिष्यति – ''अथैतान्युपकल्पयीत समावर्तमानो मणिं कुण्डले वस्त्रयुगं छत्रम् उपानदयुगं दण्डं स्रजम् उन्मर्दनम् अनुलेपनम् आञ्जनम् उष्णीषम् इत्यात्मने चाचार्याय च।। एकक्लीतकेन।। शीतोष्णाभिः अद्भिः स्नात्वा युवं वस्त्राणि पीवसा वसाथे इत्यहते वाससी आच्छाद्याश्मनस्तेजो सि चक्षुर्मे पाहीति चक्षुषी आञ्जयीत।। अश्मनस्तेजो सि श्रोत्रं मे पाहीति कुण्डले आवध्नीत।। अनुलेपनेन पाणी प्रलिप्य मुखम् अग्रे ब्राक्षणो नुलिम्पेद् वाहू राजन्य उदरं वैश्य उपस्थं स्त्र्यूरू सरणजीविनः।। अनार्तास्यनार्तो ह भूयासम् इति स्रजम् अपि वध्नीत न मालोक्ताम् मालेति चेद्

ब्रूयुः स्रग् इत्यभिधापयीत।। देवानां प्रतिष्ठे स्थः सर्वतो मा पातम् इत्युपानहाव् आस्थाय दिवश् छद्मासीति छत्रम् आदत्ते।। रेणुरसि वानस्पत्यो सि सर्वतो मा पाहीति वैणवं दण्डम्।। आयुष्यम् इति सूक्तेन मणिं कण्ठे प्रतिमुच्योष्णीषं कृत्वा तिष्ठन्त् समिधम् आदध्यात्।।''। शांखायनस्तस्य गृह्यसूत्रे कथयति – समावर्तनकारी शिष्यः स्नात्वा केशश्मश्रूनखादीनां कर्तनान्ते चात्मानम् अलंकरोति अभिषिक्तञ्च विदधाति। अतःपरम्, शिष्यः नववसनं परिधाय अलंकृत्य च मस्तके उष्णीषं, हस्ते छत्रं, दण्डञ्च, पादद्वये पादुकाद्वयञ्च धारयिष्यति इति विधिर्वर्तते। तदुक्तम् – ''स्नानं समावर्त्स्यमानस्य।। आनडुहमित्युक्तं तस्मिन्नुपवेश्य केशश्मश्रूणि वापयति लोमनखानि च।। व्रीहियवैस्तिलसर्षपैरपामार्गैः सदापुष्पीभिरित्युद्वाप्य।। आपोहिष्ठीयेनाभिषिच्य।। अलंकृत्य।। युवं वस्त्राणीति वाससी परिधाय।। अथास्मै निष्कं बध्नाति 'आयुष्यं वर्चस्यम्'।। 'ममाग्ने वर्च' इति वेष्टनम्। 'गृहं गृहमहने'ति छत्रम्।। 'आ रोहते'ति उपानहौ।। 'दीर्घस्ते अस्त्वङ्कुश' इति वैष्णवं दण्डम् आदत्ते।।'' पारस्करगृह्यसूत्रे उच्यते – समावर्तनकारी शिष्यो गुरोः चरणस्पर्शं कृत्वा यज्ञाग्नौ समिधं दत्त्वा जलपूर्णकलशेन स्वाभिषेकं करिष्यति। मेखलादण्डञ्च त्यक्त्वा नववसनं धारयिष्यति। अतःपरम् दधि, तिलञ्च भक्षयित्वा केशनखयोश्च कर्तनान्ते गुलर-उदुम्बरकाष्ठेन वा दन्तमार्जनं विधास्यति। सुगन्धिद्रव्येण स्नानं कृत्वा, नासिकामुखयोश्च चन्दनलेपनं करिष्यति। नवपरिच्छन्नवसनं च धारयित्वा गात्रे प्रावारकं दास्यति। ततः उष्णीषं पुष्पमाल्यञ्च धारयिष्यति सः। कर्णयोः कुण्डलं, नेत्रे कज्जलं छत्रं पादुकाञ्च तेन धारयितव्यानि। गोभिलमते, समावर्तनसंस्कारो हि 'गोदानम्' नाम संस्कारः – ''समावर्त्तनापरपर्य्यायं गोदानं विधत्ते- अथातः षोडशे वर्षे गोदानम्।''। ब्रह्मचारिणः सज्जाविषये गोभिलाचार्यस्तुष्णीं स्थित इति।

न केवलं विविधेषु आनन्दानुष्ठानेषु मृतस्य अन्त्येष्टिक्रियाकालेऽपि शोकपूरितचेतसा वयम् आत्मानं भिन्नतया सज्जीकुर्मः। दाहकाले मृतस्य केशश्मश्रूलोमनखादीनां कर्तनं हि रीतिः। तथाहि आश्वलायनेन तस्य गृह्यसूत्रे भणितम् – ''केशश्मश्रूलोमनखानीत्युक्तं''। अनेन शुद्धाचारेण शुद्धवस्त्रेण च मण्डितो भूत्वा मृतो न केवलं वैदिकयुगे, साम्प्रतमपि चिताग्निं गच्छति।

उपसंहृतौ वक्तुमलं यत् सौन्दर्यप्रियाः हि मनुष्याः। अतः सर्वेभ्यः रूपश्रीः रोचते। चौरोऽपि तद्व्यतिक्रमो नेति। उक्तञ्च आङ्गलकविना शेक्सपीयरेण – ''Beauty tempts thieves sooner than gold''. बहुमूल्यात् स्वर्णात् रूपमेव चौरम् अनायासेन समाकर्षति। अतो मानवः आत्मनः रूपवर्धनाय सदा तत्परः। आधुनिकयुगे समयाभावः प्रकटः अपि कर्मव्यस्ते जीवने विविधालंकारैः प्रसाधनद्रव्यैः(Cosmetics) वसनैश्च वयमात्मानं शोभामहे । सौन्दर्यबोधस्य प्रवृत्तिर्न हि केवलं वर्तमानयुगे, वैदिकयुगे अपि समासीत्। तदानीं वैभवपूर्णं जीवनयापनं नासीत् सुलभम्। तदा रूपवर्धनस्योपकरणानि (Cosmetics) सहजलभ्यानि नासन्। तथा चोपकरणानां वैचित्र्यमपि सुदुर्लभम्। तथापि ते रूपचर्चायां न विमुखाः। परमायासेन सौन्दर्यसाधकानि द्रव्याणि ते संगृह्णन्ति। तैः वृक्षरसाः चन्दनं कुसुमरतनादि-प्रसाधनद्रव्याणि व्यवहृतानि।

विभिन्नगृह्यसूत्रेषु गार्हस्थ्यजीवनस्य शास्त्रविधानसम्मतेषु नानानुष्ठानेषु (संस्कारेषु) अस्य प्रमाणं प्राप्यते। गृह्यसूत्रस्य पद्धतिगतविभिन्नत्वम् उपकरणानां नानाविधत्वञ्च आलोक्य वयम् अधुना विस्मिताः। वैदिकयुगे मानवानां रूपचर्चायै या प्रचेष्टा सा निःसन्देहं प्रशंसनीया। प्रत्येकं मानवानां रुचिर्भिन्नैव। स्वस्य स्वस्याः वा अनिन्द्यसुन्दरं मनोरमं रूपं च प्रकाशयितुम् अस्माकं प्रचेष्टा सहजाता इति मन्येऽहम्। सा प्रचेष्टा साधना वेति वक्तुमलम्। सा धारा निरवच्छिन्नत्वेन वैदिककालात् प्रभृति अद्यावधि शतधारासु प्रवाहिता इत्यत्र नास्ति संशयः।

**अन्त्यटीकाः -**

1. आश्वलायनगृह्यसूत्रम्- (१\५\३)
2. शाङ्खायनगृह्यसूत्रम्- (१\५\७-९)
3. गोभिलगृह्यसूत्रम् - (२\१\२)
4. शाङ्खायनगृह्यसूत्रम्- (१\११\१-२)
5. तत्रैव- (१\१२\३-९)
6. गोभिलगृह्यसूत्रम् - (२\१\१०-११)
7. तत्रैव - (२\१\१७-१९)
8. पारस्करगृह्यसूत्रम् - (१\४\१२-१३)
9. आश्वलायनगृह्यसूत्रम्- (१\६\१)
10. तत्रैव- (१\७\१८)
11. शाङ्खायनगृह्यसूत्रम्- (१\२२\२)
12. गोभिलगृह्यसूत्रम् -(२\७\३)
13. तत्रैव -(२\७\५-८)
14. शाङ्खायनगृह्यसूत्रम्- (१\२२\१०)
15. गोभिलगृह्यसूत्रम् - (२\७\४)
16. शाङ्खायनगृह्यसूत्रम्- (१\२४\११)
17. पारस्करगृह्यसूत्रम् - (१\१६\४)
18. आश्वलायनगृह्यसूत्रम्- (१\१७\६-७)
19. पारस्करगृह्यसूत्रम् -(२\१\५)
20. गोभिलगृह्यसूत्रम् -(२\९\८)
21. तत्रैव- (२\९\१९,१८)
22. गोभिलगृह्यसूत्रम् -(२\९\२५)

23. पारस्करगृह्यसूत्रम् -(२\१\२४)
24. 'यदहरूपैष्यन्मानवकोभवति प्रगत्रवैनं तदहर्भोजयन्ति कुशलीकारयन्त्याप्लावयन्त्यलङ्कुर्वन्त्यहतेन
25. वाससाऽऽच्छादयन्ति।' गोभिलगृह्यसूत्रम् -(२\१०\७)
26. 'ब्राह्मणान् भोजयेत्तं च पर्युप्तशिरसमलङ्कृतमानयन्ति॥' पारस्करगृह्यसूत्रम् -(२\२\५)
27. आश्वलायनगृह्यसूत्रम् -(१\१९\८)
28. तत्रैव - (१\१९\९)
29. शाङ्खायनगृह्यसूत्रम्- (२\१\२-५)
30. गोभिलगृह्यसूत्रम् - (२\१०\८)
31. आश्वलायनगृह्यसूत्रम्- (१\१९\१३)
32. शाङ्खायनगृह्यसूत्रम् -(२\१\१८-२०)
33. गोभिलगृह्यसूत्रम् -(२\१०\११)
34. तत्रैव -(२\१०\९)
35. आश्वलायनगृह्यसूत्रम्- (१\१९\११)
36. शाङ्खायनगृह्यसूत्रम्- (२\१\१५-१७)
37. आश्वलायनगृह्यसूत्रम् - (३\८\१,८-१६)
38. शाङ्खायनगृह्यसूत्रम् -(३\१\१-११)
39. पारस्करगृह्यसूत्रम् -(२\६\९-११)
40. तत्रैव -(२\६\१५-१६)
41. तत्रैव -(२\६\१७)
42. तत्रैव -(२\६\१८-३०)
43. गोभिलगृह्यसूत्रम् -(३\१\१)
44. आश्वलायनगृह्यसूत्रम् - (४\१\१५)

## ग्रन्थपञ्जी

**मुख्योत्साः**


- आश्वलायनगृह्यसूत्रम्. २०१३. दिनकर शर्मा (सम्पा.), वाराणसी : चौखम्वा संस्कृत सीरीज अफिस. पुनर्मुद्रित संस्करण।
- ऋग्वेदीय गृह्यसूत्र. १४०८. अमरकुमार चट्टोपाध्याय (सम्पा.), कलकाता : संस्कृत पुस्तक भाण्डार. प्रथम संस्करण।
- गोभिल-गृह्यसूत्रम्. २०१३. अमियकुमार भट्टाचार्य्य(सम्पा.), सत्यव्रत सामश्रमी (अनूदित), कलकाता : संस्कृत पुस्तक भाण्डार. प्रथम प्रकाश।

- गोभिल-गृह्यसूत्रम्. २०७३. डॅ. सुधाकर मालवीय(सम्पा.), वाराणसी : चौखम्वा संस्कृत संस्थान. पुनर्मुद्रण संस्करण।
- पारस्कर गृह्यसूत्रम्. २०१५. डॅ. ब्रह्मानन्द त्रिपाठी(सम्पा.), डॅ. जगदीशचन्द्र मिश्र (हिन्दी-व्याख्याकार), वाराणसी : चौखम्वा सुरभारती प्रकाशन।
- पारस्कर गृह्यसूत्र. १४०६. श्रीअशोककुमार वन्द्योपाध्याय(सम्पादक), कलकाता : संस्कृत पुस्तक भाण्डार ।
- मनुसंहिता (द्वितीय अध्याय). २०१०. ड. अन्नदाशङ्कर पाहाडी (सम्पा.), कलकाता : संस्कृत वुक डिपो. पुनर्मुद्रण।
- संस्कारप्रकाश. २००९. डॅ. मण्डन मिश्र (सम्पा.), डॅ. भवानीशंकर त्रिवेदी (रचयिता), नवदेहली : श्री लाल वाहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठ ।

**गौणोत्साः**

- अरुणानन्द, स्वामी . १४१९. हिन्दुशास्त्र परिचय, कलकाता : भारत सेवाश्रम सङ्घ, तृतीय संस्करण।
- आप्टे, वामन शिवराम . २०१६. संस्कृत-हिन्दी शब्दकोश, दिल्ली : अशोक प्रकाशन . नव संस्करण।
- चट्टोपाध्याय, प्रवीरकुमार. २०११. सामवेदीय संस्कारधर्म, कलकाता : पारुल प्रकाशनी. प्रथम संस्करण।
- पाण्डेय, राजवली. २०१४. हिन्दु संस्कार, वाराणसी : चौखम्वा विद्याभवन ।
- वसु, योगीराज. २०१८. वेदेर परिचय, कलकाता : फार्मा केएलएम प्राइभेट लिमिटेड, द्वादश मुद्रण।
- भादुडी, नृसिंहप्रसाद. २०१३. आचार विचार संस्कार, कलकाता : अभियान पावलिशार्स, द्वितीय संस्करण।
- मुखोपाध्याय, गोविन्दगोपाल. २०१०. ए निउ ट्रि-ल्याङ्गुयाल डिकशनारी, कलकाता : संस्कृत वुक डिपो, पुनर्मुद्रण।
- मिश्रः, शङ्करकुमारः . २०१८. षोडशसंस्कारविमर्शः, वाराणसी : चौखम्वा सुरभारती प्रकाशन ।
- शतपथी, हरेराम (सम्पा.). २०१०. धर्मशास्त्रे षोडशसंस्काराः, डा. सितांशुभूषणपण्डा (रचयिता), तिरुपतिः : राष्ट्रियसंस्कृतविद्यापीठम् ।
- श्रीमधुसूदन. २०१६ . हिन्दु संस्कार दर्पण, कलकाता : अक्षय लाइब्रेरी, प्रथम संस्करण।


Received on: 03/03/2020 Accepted on: 11/02/2021

# जगन्नाथनये काव्यभेदविमर्शः

सुजित-दे*

**सारः**

ध्वन्युत्तरकाले काव्यस्यान्तरङ्गव्यङ्ग्यस्य प्राधान्यात् गद्यपद्यादिबहिरङ्गभेदाः किञ्चिद्गौणतामासादितवन्तः। व्यञ्जनायाः तारतम्यमेवासीत् काव्यभेदकरणे मुख्योपकरणभूतम्। मुण्डे मुण्डे मतिर्भिन्नेति न्यायेन आनन्दवर्धनादिजगन्नाथान्ताचार्याणामप्यत्र मतवैभिन्न्यं परिलक्ष्यते एव। तेषाञ्च सहृदयधुरीणामाचार्याणां ध्वन्यालोकादिरचनाजनितक्लेशात् स्वक्लेशस्य वैफल्यममन्यमानेन स्वायत्तीकृतनव्यन्यायेन पण्डितराजजगन्नाथेन तदीये रसगङ्गाधरे काव्यलक्षणानन्तरं नव्यन्यायशैल्या काव्यभेदाः अपि चर्चिताः। प्रायः सर्वैरेवालङ्कारिकैः काव्यस्य त्रैविध्यमेव प्रतिपादितम्। किन्तु, पण्डितराजजगन्नाथेन रसगङ्गाधरे ध्वनिसिद्धान्तं नापहायापि अतिसूक्ष्मेक्षिकया नवीनशैल्या च काव्यस्य चत्वारो भेदाः समालोचिताः। तथाहि – 'तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा'[1] इति। शब्दचित्रार्थचित्रयोः काव्ययोश्चमत्कारस्य तारतम्यात् न्यूनाधिकभावस्य स्पष्टोपलब्धाद्द्वयोः पृथक्करणमौचित्यमेव प्रकाशितं भवति। तत्राविवक्षितव्यङ्ग्यापेक्षया शब्दालङ्कारयुत-शब्दचित्रापेक्षया अविवक्षितव्यङ्ग्यार्थालङ्कारप्रधाने अर्थचित्रे चमत्कारस्याधिक्यं स्फुटमेव। अपि च चमत्कारस्य तारतम्यादपि एकत्रैव द्वयोः काव्ययोः सन्निवेशः क्रियते चेत्तर्हि व्यङ्ग्यप्राधान्ये ध्वनिः, अप्राधान्ये गुणीभूतव्यङ्ग्यकाव्यमिति प्राधान्याप्राधान्यमात्रयोः अल्पहेतुकयोः ध्वनिगुणीभूतव्यङ्ग्ययोः पृथक्करणे दुराग्रहः कथम् ? तयोरप्येकत्रैव सन्निवेशः स्यादेव। तन्मा भूदिति विवक्षया शब्दचित्रार्थचित्रयोरपि पृथक्तया परिगणनमेव श्रेयास्पदमिति।

अतो दृश्यते व्यङ्ग्यस्य वाच्यस्य च चमत्कृतिमाश्रित्य काव्यस्य चातुर्विध्यं स्वीकृतं जगन्नाथेन इति अन्येभ्यः आलङ्कारिकेभ्यः वैलक्षण्यमस्य सुतरां समस्तीति मनसि निधायैव निबन्धोऽयं निबद्धो मया।

1. रसगङ्गाधरः, प्रथमाननम्

*Ph.D Scholar, Sanskrit Department, Bankura University.*

**मूलम्**

'उपकारकत्वादलङ्कारः सप्तममङ्गम् इति यायावरीयः ऋते च तत्स्वरूपपरिज्ञानाद्वेदार्थानवगतिः'[2] – वेदाङ्गपरिज्ञानान्तरेण वेदाध्ययनं यथा वैफल्यं वृणुते तथैव समालोचनामूलकमलङ्कारशास्त्रं विना काव्यवेदस्य यथार्थरसास्वादः पाठकमनसि मृगतृष्णेव भाति। अतः अलङ्कारशास्त्रमपि वेदस्य सप्तमाङ्गतया गण्यते। न हि काव्यगतान् दोषगुणादीन् अजानन्तः सहृदयाः काव्यवैशिष्ट्यपरिज्ञाने, काव्यमर्मज्ञाने कवेर्भावज्ञाने वा समर्थाः स्युः। क्वचिच्चालङ्कारिकाः कविकर्मण एवं व्याख्यानं प्रस्तुवन्ति यत् खलु कवेर्दृष्टिपथमपि अतीयाय नवीनानन्दपथं नयति सहृदयान्। यथा –

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।।'[3]

इति मन्त्रे रूपकातिशयोक्त्याद्यलङ्कारान् आश्रित्य ईश्वरस्य जीवस्य च द्वाभ्यां पक्षिभ्यां तथा प्रकृतेरेकेन पिप्पलवृक्षेण वर्णनं विहितम्। अत्र प्रकृतिरूपे विशाले पिप्पलवृक्षे जीवात्मा परमात्मा च द्वौ विहगौ वसतः। जीवात्मरूपो विहगस्तस्य वृक्षस्य फलानि अत्ति। अर्थात् जीवात्मा स्वकर्मानुसारं संसारेऽस्मिन् सुखदुःखरूपफलभाग् भवति। अपरश्च परमात्मरूपो विहगः किञ्चिदपि फलं नात्त्वा स्वकान्तिं तेजो वा प्रकाशयतीति मन्त्रस्यास्याशयः। मन्त्रेऽस्मिन् सुपर्णा, सयुजा, सखाया, समानं, परिसष्वजाते इत्येतेषु पदेषु अनुप्रासाख्यशब्दालङ्कारस्यावकाशः। अनश्नन्नन्य अभिचाकशीति इत्यत्र नकाराश्चानुप्रासेन श्रवणमाधुर्यमभिव्यञ्जयति। पुनः परमात्मस्वरूपो विहगः फलानि न भुक्त्वापि स्वकान्तिं स्वकीयतेजो वा प्रकाशयतीति विभावना। सयुजा सखाया चेति विशेषणद्वयं जीवात्मनस्तथा परमात्मनो नित्यता सच्चिद्रूपता चेति ध्वनिमभिव्यञ्जयति। अतोऽस्मिन् मन्त्रे विविधमौलिकतत्त्वानां सन्निवेशः अस्मद्दृक्पथमायाति। अलङ्कारशास्त्रं विना एतादृशानां तत्त्वानामुद्घाटनं नैव सम्भवतीति आवैदिककालादिदानीमपि वेदान्तन्यायादिदर्शनशास्त्राणीव इदं शास्त्रमपि प्रामुख्यं भजते। नन्वस्य शास्त्रस्याख्यानादनुप्रासादिशब्दालङ्काराः उपमारूपकाद्यर्थालङ्कारा एवास्य शास्त्रस्य प्रतिपाद्यविषया इति चेन्न, काव्यलक्षण-हेतु-भेद-ध्वनि-रस-गुण-दोषादीनां प्रतिपाद्यत्वेऽपि 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायेन अलङ्काराणां प्रतिपाद्यत्वाधिक्ये अलङ्कारशास्त्रमित्यस्य व्यपदेशात्।

प्रायो मम्मटविश्वनाथादिभिः सर्वैरेवालङ्कारिकैस्तेषां ग्रन्थेषु काव्यस्य प्रयोजनं लक्षणं च विधाय काव्यभेदविषयिणी आलोचना प्रस्तुता। किन्तु काव्यतत्त्वज्ञानां खलु काव्यस्य वर्गीकरणे विद्यते मतवैभिन्न्यम्। अस्माभिः ध्वनिसिद्धान्तस्य कालमाश्रित्य काव्यभेदान् सामान्यतो द्विधा विभक्तुं शक्यते-

---

2. काव्यमीमांसा, द्वितीयोऽध्यायः
3. ऋग्वेदः, १/१६४/२०

1. ध्वनिपूर्वकालिककाव्यभेदाः
2. ध्वन्युत्तरकालिककाव्यभेदाः

ध्वनिपूर्वकाले आलङ्कारिकाणां काव्यस्य भाषा-शैली-छन्दो-गद्यादिबहिरङ्गा एवासन् काव्यभेदविधाने मुख्योपकरणभूताः। यथा – भाषामाश्रित्य काव्यं त्रिविधं – संस्कृतं, प्राकृतम् अपभ्रंशञ्च।

छन्दसमाश्रित्य गद्य-पद्यचम्पूभेदेन त्रिविधं काव्यम्। स्वरूपमाश्रित्य काव्यस्य पञ्चभेदाः – महाकाव्यं, खण्डकाव्यं, रूपकम्, आख्यायिका मुक्तकञ्चेति। विषयमाश्रित्य चत्वारः – ख्यातवृत्तं, कल्पितवृत्तं, कलावृत्तं शास्त्राश्रितञ्च।

ध्वन्युत्तरकाले काव्यस्यान्तरङ्गव्यङ्ग्यस्य प्राधान्यात् पूर्वोक्तभेदाः किञ्चिद्गौणतामासादितवन्तः। व्यञ्जनायाः तारतम्यमेवासीत् काव्यभेदकरणे मुख्योपकरणभूतम्। मुण्डे मुण्डे मतिर्भिन्नेति न्यायेन आनन्दवर्धनादिजगन्नाथान्ताचार्याणामप्यत्र मतवैभिन्न्यं परिलक्ष्यते एव। तेषाञ्च सहृदयधुरीणामाचार्याणां ध्वन्यालोकादिरचनाजनितक्लेशात् स्वक्लेशस्य वैफल्यममन्यमानेन स्वायत्तीकृतनव्यन्यायेन पण्डितराजजगन्नाथेन तदीये रसगङ्गाधरे काव्यलक्षणानन्तरं नव्यन्यायशैल्या काव्यभेदाः अपि चर्चिताः। तदिदानीमतिसमासेन पूर्वसूरिणां मतान्युपस्थाप्य आलोचयिष्यतेऽस्माभिः।

### केषाञ्चन पूर्वाचार्याणां मतानि

- **आनन्दवर्धनस्य**

आनन्दवर्धनाचार्येण ध्वन्यालोके ध्वनिकाव्यं गुणीभूतव्यङ्ग्यकाव्यं चित्रकाव्यञ्चेति काव्यस्य त्रैविध्यं प्रदर्शितम्। व्यङ्ग्यस्य प्राधान्ये सति ध्वनिकाव्यम्, अप्राधान्ये च गुणीभूतव्यङ्ग्यकाव्यम्। एतौ व्यतिरिच्य रसभावादितात्पर्यशून्यं व्यङ्ग्यार्थविशेषप्रकाशनरहितं केवलवाच्यवाचक-वैचित्र्यमात्राश्रयेणोपनिबद्धमालेख्यवद्भासमानं तच्चित्रकाव्यमिति। शब्दार्थालङ्कारानाश्रित्य शब्दचित्रमर्थचित्रञ्चेति चित्रस्य द्विविधो भेदः। तथाहि ध्वन्यालोके –

गुणप्रधानाभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।
काव्ये उभे ततोऽन्यद्यत् तच्चित्रमभिधीयते।।
चित्रं शब्दार्थभेदेन द्विविधञ्च व्यवस्थितम्।
तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम्।।[4] इति।

4. ध्वन्यालोकस्य ३/४६ वृत्तौ

वस्तुतः चित्रकाव्यमिदमानन्दवर्धनाचार्येण मुख्यकाव्यतया न गण्यते। तद्धि काव्यानुकरणमिति। उक्तञ्च वृत्तौ तेन – 'न तन्मुख्यं काव्यम्। काव्यानुकरो ह्यसौ।'[5] इति।

**• मम्मटनये**

मम्मटाचार्येणापि व्यङ्ग्यस्य प्राधान्यं गौणताञ्चाश्रित्य काव्यस्य उत्तममध्यमाधमाः भेदाः प्रदर्शिताः। वस्तुतः काव्यभेदकरणे मम्मटार्येण आनन्दवर्धनाचार्यमतमेवानुसृतम्। तत्रोत्तमकाव्यस्य लक्षणं कृतं मम्मटाचार्येण – 'इदमुत्तममतिशयिनि व्यङ्ग्य वाच्याद्ध्वनिर्बुधैः कथितः'[6] इति। अभिधावृत्तिप्रतिपाद्येऽर्थे अधिकचमत्कारजनके सति उत्तमकाव्यमित्यर्थः। इदमेव ध्वनितत्त्वज्ञैः ध्वनिकाव्यरूपेण व्यपदिश्यते। मध्यमकाव्यस्य लक्षणं तावत् 'अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्'[7] इति। वाच्यापेक्षयातिशयितचमत्कारजनके व्यङ्ग्यार्थे सति मध्यमं काव्यं गुणीभूतव्यङ्ग्यं वा। अधमकाव्यं तावल्लक्षयति मम्मटाचार्येण 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्'[8] इति। यत्र व्यङ्ग्यार्थः स्पष्टतया प्रतीतिगोचरो न भवति तत्र अवरकाव्यम् अधमकाव्यं वा। लक्षणे अव्यङ्ग्यमित्यत्र नञः षट्स्वर्थेषु[9] ईषदर्थे प्रयोगाद्व्यङ्ग्यार्थाभावो न ग्राह्यः। तत्र काव्ये कवेर्मुख्या विवक्षा भवति गुणालङ्कारचमत्कारस्योपस्थापनमेव। अतस्तत्र व्यङ्ग्ये सत्यपि तस्यास्फुटत्वादवरकाव्यमित्यर्थः। गुणस्य रसाभिव्यञ्जकतयापि व्यङ्ग्यस्य अस्फुटतया स्थितिस्तत्र दृश्यते एव। तथाहि काव्यप्रकाशस्य बालबोधिनीटीकायाम् –

'यत्र तयोरेव प्राधान्येन चमत्कारकारित्वमित्यर्थ इति सारबोधिन्यां स्पष्टम्। अत्र गुणपदं तद्व्यञ्जकपरम्। अन्यथा तस्य रसधर्मता तन्निबन्धनचमत्कारत्वे चित्रत्वानुपपत्तेः।' इति।

**• रुय्यकनये**

अलङ्कारसर्वस्वकारेण राजानकरुय्यकेनापि काव्यस्य भेदत्रयं स्वीकृत्य मम्मटाचार्यमेवानुसृतम्। अलङ्कारसर्वस्वे उक्तं तेन – 'तत्र व्यङ्ग्यस्य प्राधान्याप्राधान्याभ्यां ध्वनिगुणीभूतव्यङ्ग्याख्यौ द्वौ काव्यभेदौ। व्यङ्ग्यस्यास्फुटत्वेऽलङ्कारत्वेन चित्राख्यः काव्यभेदस्तृतीयः, तत्रोत्तमो ध्वनिः' इति।

**• अप्ययदीक्षितनये**

चित्रमीमांसायामप्ययदीक्षितेन काव्यस्य त्रैविध्यं स्वीकृतम्, किन्तु उत्तममध्यमकाव्ययोः अन्यत्रालोचनाधिक्यात् सुविस्तरमालोचनमत्राकृत्वा शब्दचित्रार्थचित्रद्वयात्मकतृतीय

---

5. ध्वन्यालोकस्य ३/४६ वृत्तौ
6. काव्यप्रकाशस्य १/४
7. काव्यप्रकाशस्य १/५
8. काव्यप्रकाशस्य १/६
9. तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
   अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः।।

काव्ये शब्दचित्रे सहृदयानदृते सति तदपि वर्जयित्वार्थचित्रमेव समालोचितम्। तथाहि चित्रमीमांसायाम् – 'तदेवं त्रिविधे गुणीभूतव्यङ्ग्ययोरन्यत्रास्माभिः प्रपञ्चः कृतः। शब्दचित्रस्य प्रायो नीरसत्वान्नात्यन्तं तदद्रयन्ते कवयः, न वा तत्र विचारणीयमतीवोपलभ्यत इति शब्दचित् रांशमपहायार्थचित्रमीमांसा प्रसन्नविस्तीर्णा प्रस्तूयते।' इति।

- **विश्वनाथनये**

विश्वनाथकविराजेन तु मम्मटकृतं काव्यभेदं सम्पूर्णं न गृहीत्वा खण्डांशञ्च खण्डित्वा साहित्यदर्पणे काव्यस्य द्वौ भेदौ स्वीकृतौ – ध्वनिकाव्यं गुणीभूतव्यङ्ग्यकाव्यञ्चेति। अधमकाव्यं चित्रकाव्यं वा स्वीकृत्य द्वयोर्भेदयोः संज्ञां विदधता विश्वनाथेन मम्मटसमं मतमेवोपन्यस्तम् –

'काव्यध्वनिर्गुणीभूतव्यङ्ग्यं चेति द्विधा मतम्।
वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्।।
अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये।।'[10] इति।

चित्रकाव्यास्वीकारे विश्वनाथेन एवमासादितं यत् – नैव व्यङ्ग्यार्थविशेषप्रकारशून् यचित्रकाव्यस्य काव्यतास्वीकार्या अव्यङ्ग्यत्वात्। तत्र पुनः शब्दचित्रं वाच्यचित्रं च चित्रस्य भेदद्वयमपि नैव ग्राह्यम्। ननु 'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्'इति मम्मटकृते अवरकाव्यलक्षणे अव्यङ्गयमित्यत्र नञः षट्ष्वर्थेषु ईषदर्थे स्वीकृते ईषद्व्यङ्ग्यमवरकाव्यमिति चेन्न ईषद्व्यङ्ग्यस्यास्वाद्यत्वम् अनास्वद्यत्वं वेति जिज्ञासोपपन्नत्वात्। यदि प्रथमः पक्षः स्वीक्रियेत तर्हि तस्य ध्वनिकाव्ये गुणीभूतव्यङ्ग्यकाव्ये वान्तर्भावः स्यात्, द्वितीये स्वीकृते तु अकाव्यमेव। तथाहि दर्पणे उक्तम् – 'केचिच्चित्राख्यं तृतीयं काव्यभेदमिच्छन्ति। तदहुः। शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्। इति। तन्न हि अव्यङ्ग्यत्वमिति चेत्, किं नामेषद्व्यङ्ग्यत्वम्। आस्वाद्यव्यङ्ग्यत्वम् अनास्वाद्यव्यङ्ग्यत्वं वा। आद्ये प्राचीनभेदयोरेवान्तःपातः। द्वितीये त्वकाव्यम्।'[11] इति।

विश्वनाथेन मम्मटकृतं चित्रकाव्यं खण्डितमिति सत्यं, परन्तु तस्य मतमपि समीचीनमिति न वयं मन्यामहे। यतो हि –

**प्रथमतः** – व्यङ्ग्यरहितकाव्यस्य असम्भवत्वात् चित्रकाव्यं न काव्यमित्यत्र वदतोव्याघातदोषः समुपपन्नः। किञ्च, अलङ्कारप्रधानं चित्रकाव्यं न स्वीकृत्यापि दशमपरिच्छेदे अलङ्काराणां विस्तरेण आलोचनं विहितमित्यतः परोक्षेण तेनापि चित्रकाव्यं स्वीकृतमति निर्बाधमेव।

10. साहित्यदर्पणे ४/१६
11. साहित्यदर्पणम्

**द्वितीयतः** – तस्य चित्रकाव्यस्य अकाव्यत्वे स्वीकृते काव्यगतचारुत्वस्य तारतम्यविचारे काव्यशास्त्रानुशीलनकर्तारो न क्षमाः भवेयुः। वस्तुतः ध्वनिकाव्ये व्यङ्ग्यस्य सर्वातिशायि प्राधान्यं विद्यते, गुणीभूतव्यङ्ग्ये व्यङ्ग्यप्राधान्यस्य ध्वनिकाव्यापेक्षया किञ्चिन्न्यूनतायां सत्यामपि गुणालङ्कारास्तु तत्र प्रधानतां न यान्ति। किन्तु, चित्रकाव्ये व्यङ्ग्यस्या अप्राधान्ये सति गुणालङ्काराणां प्राधान्यमस्तीति ध्वनि-गुणीभूतव्यङ्ग्य-चित्रेषु परस्परभेदसत्त्वात् चित्रकाव्यमपि स्वीकार्यम्। वस्तुतः चित्रकाव्ये कवेरभिप्रायस्तावत् शब्दार्थालङ्काराणां प्रयोगः एव। उक्तञ्च ध्वन्यालोके – 'सत्यं न ... व्यवस्थाप्यते।'[12] इति।

अतो दृश्यते प्रायः सर्वैरेवालङ्कारिकैः काव्यस्य त्रैविध्यमेव प्रतिपादितम्। किन्तु, पण्डितराजजगन्नाथेन रसगङ्गाधरे ध्वनिसिद्धान्तं नापहायापि अतिसूक्ष्मेक्षिकया नवीनशैल्या च काव्यस्य चत्वारो भेदाः समालोचिताः। तथाहि – 'तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा' इति। अधुना तद्भेदाः यथामति समासेनालोच्यन्ते –

1. **उत्तमोत्तमकाव्यविमर्शः**

यत्र शब्दाः अर्थाश्च आत्मनः अप्रधानीकृत्यान्यं कमपि व्यङ्ग्यार्थविशेषमभिव्यञ्जयन्ति तत्र उत्तमोत्तमकाव्यम्। तल्लक्षणमुक्तं – 'शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदाद्यम्।।' इति। यस्मिन् काव्ये वाच्यवाचकौ व्यङ्ग्यार्थापेक्षयाप्रधानीकृतस्वरूपौ कमपि चमत्कारातिशयाधानेनानिर्वचनीयं प्रधानमर्थं व्यञ्जनया बोधयतः तत् काव्यम् उत्तमोत्तमकाव्यं भवतीति लक्षणार्थः।

लक्षणे कमपीति विशेषणं चमत्कृतेराश्रयरूपेण ग्राह्यम्, अन्यथा अतिगूढव्यङ्ग्ये अतिस्फुटव्यङ्ग्ये चातिव्याप्तिः स्यात्। अपराङ्गव्यङ्ग्ये वाच्यसिद्ध्यव्यङ्ग्ये चमत्कारसत्त्वात् तत्रातिव्याप्तिवारणमेव गुणीभावितात्मानाविति विशेषणस्य तात्पर्यम्। तथाहि – 'कमपीति चमत्कृतिभूमिम् तेनातिगूढ-स्फुटव्यङ्ग्ययोर्निरासः। अपराङ्गवाच्यसिद्धव्यङ्ग्यस्यापि चमत्कारितया तद्वारणाय गुणीभावितात्मानाविति स्वापेक्षया व्यङ्ग्यप्राधान्याभिप्रायकम्।'[13] इति।

इदञ्चोत्तमोत्तमकाव्यमन्यैर्ध्वनिकाव्यमित्यभिहितम्। उक्तञ्च ध्वनिकारेण –

'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।'[14] इति।

---

12. ध्वन्यालोकः ३/४३ वृत्तौ
13. रसगङ्गाधरः, प्रथमाननम्
14. ध्वन्यालोकः

'निर्माय नूतनमुदाहरणानुरूपम्' इति प्रतिज्ञावचोऽनुसारणुदाहरणानुरूपाणि स्वरचितपद्यान्युपस्थापितानि। तेषु पद्येषु उत्तमोत्तमकाव्यमुदाहृतं जगन्नाथेन –

'शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते।।'[15] इति।

नववधु दयितस्य सन्निधौ शयितापि त्रपाभयादिवशात् मनोगतान् नानाकारकक्रीडाविषयकाभिलाषान् चरितार्थयितुं तदनुरूपमाचरितुं वा असमर्था भवति। किन्तु त्रपौत्सुक्यसाङ्कर्येण अर्धोन्मीलितनयनाभ्यां किञ्चित् प्रणयोदञ्चनात् प्रियस्य मुखकमलं केवलं विलोकते। न तु चुम्बितुमालिङ्गितुमाघ्रातुं वोपक्रमते, नापि नयने निमीलयति, न वा तादृङ्नीक्षणात् विरमतीत्यर्थः।

अत्र नायको हि आलम्बनविभावः, 'दयितस्य सविधे शयिता' इत्यनेन आक्षिप्तं निर्जनस्थानमुद्दीपनविभावः, सङ्कुचितवनादिभिः संयोगे रत्याख्यस्य स्थायिभावस्याभिव्यक्तिः। रतिश्चात्र नायकालम्बिता नायिकाश्रिता, तस्याश्चात्र परिपोषिते सति सम्भोगशृङ्गाररसस्योत्पत्तिः। अत्र रतिरेव केवलं व्यङ्ग्यं, न हि नायिकेच्छा। तमेवात्यन्तचमत्कारव्यङ्ग्यं शब्दार्थौ गुणीभावितौ सन्तौ अभिव्यञ्जयतः। तत्कथमिति विविधयुक्तिभिः विचारयति जगन्नाथः।

**प्रथमतः** निद्रिते दयिते सति नायिकायाः इच्छास्तीति व्यङ्ग्यं नानुमीयते। यतो हि 'मनोरथान् सफलीकर्तुमनीश्वरा' इति वाक्येनैव नायिकामनोरथस्य सद्भावः प्रतीयते। अतः मनोरथपदेन सामान्याकारेणैव तथाविधेच्छा प्रतीता। अत उक्तं तेन – 'न च यद्ययं शयितः स्यात्, तदास्याननं चुम्बेयम् इति नायिकेच्छाया एव व्यङ्ग्यत्वमत्रेति वाच्यम्, मनोरथान् सफलीकर्तुमसमर्था इत्यनेन मनोरथाः सर्वेऽस्या हृदि तिष्ठन्तीति प्रतीतेः स्वशब्देन मनोरथपदेन मनोरथत्वाकारेण तादृशेच्छाया अपि निवेदनात्।'[16] इति।

**द्वितीयतः** ननु मनोरथपदेन मनोरथत्वरूपस्य सामान्यस्य प्रतीतिसत्त्वेऽपि चुम्बेयमिति विशेषार्थविशिष्टेच्छायाम् अभिव्यक्तायां सत्यां व्यङ्ग्यार्थः स्यादेव, इति चेन्न, अत्र चुम्बेयमिति विशेषार्थस्य चमत्कारजनने प्रतिबन्धकत्वात्। योऽर्थो विशेषणाकारेण व्यङ्ग्यः, सामान्याकारेण च वाच्यस्तद्धि सहृदयानामानन्दसम्भवेऽसमर्थः स्यात्। यो खलु व्यङ्ग्यार्थः कथञ्चिदपि वाच्यवृत्त्या न सम्बन्धः तमेव सहृदयानां चमत्कारं जनयति। तथाह्युक्तं – 'न हि विशेषाकारेण व्यङ्ग्योऽपि सामान्याकारेणाभिहितार्थः सहृदयानां चमत्कारमुत्पादयितुमाष्टे, कथमपि वाच्यवृत्त्यनालिङ्गितस्यैव व्यङ्ग्यस्य चमत्कारित्वेनालङ्कारिकैः स्वीकारात्' इति।

15. रसगङ्गाधरः, प्रथमाननम्
16. रसगङ्गाधरः, प्रथमाननम्

**तृतीयतः** ननु दरमीलन्नयना इति विशेषणात् नयनसङ्कोचः त्रपाया एव कार्यम्। तदेव त्रपारूपव्यभिचारिभावो व्यङ्ग्यो, न तु रतिरिति चेन्न, दरमीलन्नयनेति अनुवाद्यस्येव (नायिकायाः) विशेषणत्वात् त्रपायाश्च प्रधानवाक्यार्थाभावत्वात्। नयनगतस्य ईषन्निमीलनस्य त्रपायाः कार्यत्वेऽपि निमीलितनयनत्वविशिष्टनिरीक्षणस्य अप्रयोजनीयत्वमेवानुमीयते। अतः रतिरेव प्रधानव्यङ्ग्यार्थः, त्रपा तु गौणा एव। अत उक्तं – 'एवं त्रपाया अपि न प्राधान्येन व्यङ्ग्यत्वम्, अनुवाद्यतावच्छेदकतया प्रतीतायां तस्यां मुख्यवाक्यार्थायोगात्।'[17] इति।

अत्र पुनः त्रपायाः गौणत्वे स्वीकृते औचित्यमपि रक्षितं स्यात्। तदेवं – रतेः कार्यं हि निरीक्षणम्, त्रपायाः कार्यमीषन्निमीलनम्। यत्र रतेः कार्यस्य प्राधान्यं वर्तते अर्थात् निरीक्षणस्य प्राधान्यं, त्रपायाश्च गौणत्वं तत्र कारणपरायाः रतेः प्राधान्ये सति कारणरूपायाः त्रपायाः गौणत्वं स्वीकार्यमेव। अर्थात् वाच्यकोटौ यदा कार्यरूपं निरीक्षणं प्रधानं तदा व्यङ्ग्यकोटौ तत्कार्यस्य कारणरूपा रतिरपि प्रधाना एव स्यात्। पुनः वाच्यकोटौ यदा ईषन्निमीलनरूपं कार्यं गौणं तदा तस्य कारणरूपा त्रपापि गौणा स्यादेव। अत उक्तं – 'वाच्यवृत्त्या रतेरनुभावे निरीक्षणे त्रपाया अनुभावस्य दरमीलनस्येव व्यञ्जनया तस्यां तस्या अपि गुणीभावप्रत्ययौचित्यात्।'[18] इति। अन्यथा 'भावप्रधानमाख्यातं, सत्त्वप्रधानानि नामानि' इति यास्कसिद्धान्तविरोधो दुरवरोधो भवेदिति तात्पर्यम्।

अत एव रतेरेव प्राधान्येनाभिव्यक्तत्वात्, तस्या एव प्रधानव्यङ्ग्यत्वेन स्वीकारे च आलोच्यश्लोकस्य उत्तमोत्तमकाव्यस्योदाहरणत्वेन स्वीकारो निर्बाध एव।

## 2. उत्तमकाव्यविमर्शः

उत्तमकाव्यस्य लक्षणं निगदितं- 'यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद्द्वितीयम्'[19] इति। यस्मिन् काव्ये व्यङ्ग्यं व्यङ्ग्यार्थान्तरापेक्षया वाच्यार्थापेक्षया च गुणीभूतं, न कथमपि प्रधानं सत् स्वज्ञानद्वारा चमत्कारकारणं भवतीत्यतः यत्र वाच्यार्थापेक्षया व्यङ्ग्यप्राधान्यं मुख्यव्यङ्ग्यापेक्षया च व्यङ्ग्यगौणता तत्रातिव्याप्तिर्दुर्वारैव। यथा-

'अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीविविस्रंसवः करः।।'[20]

इत्यत्रअपराङ्गव्यङ्ग्योदाहरणेशृङ्गारकरुणौद्वावेवव्यङ्ग्यौ।किन्तुआलम्बनरूपनायकस्य

---

17. रसगङ्गाधरे पृ. ४२
18. रसगङ्गाधरे पृ. ४२
19. रसगङ्गाधरे, प्रथमाननम्
20. काव्यप्रकाशः, पञ्चमोल्लासः

मरणात् करुणरसो मुख्यतामेति शृङ्गारश्च गौणताम्।[21] इह शृङ्गाररूपव्यङ्ग्यस्य वाच्यापेक्षया प्राधान्येऽपि मुख्यकरुणरसापेक्षया गौणतामेव प्रतिभाति। अतः उक्तोदाहरणं उत्तमकाव्यतया गण्यते। तदविवक्षितमिति कृत्वा एवकारेणात्रावधार्यते 'व्यङ्ग्यमप्रधानमेवे'ति। तथा सति यत्र व्यङ्ग्यः सर्वतः सर्वथैव गुणीभूतः स्यात्तत्र द्वितीयकाव्यलक्षणसङ्गतिरित्यर्थो लभ्यते।

लक्षणे एवकारस्यावश्यकता इतरथापि प्रतिपादयितुं शक्यते। यथा – रसानुभूतौ पार्यन्तिकव्यङ्ग्यस्य ध्वनित्वेऽपि वाच्यपार्यन्तिकयोर्मध्यगतस्य व्यङ्ग्यस्य प्राधान्ये ध्वनिकाव्यम्, अप्राधान्ये गुणीभूतव्यङ्ग्यकाव्यम्। वाच्यपार्यन्तिकयोरान्तरालिकव्यङ्ग्यः सर्वथैव पार्यन्तिकव्यङ्ग्यापेक्षया स्वतोऽप्राधान्यं भजते। किन्तु वाच्यापेक्षया प्राधान्यमेव। अतः आन्तरालिकव्यङ्ग्यः क्वचित् प्रधानतया क्वचिच्चाप्रधानतया गण्यते। किन्तु अत्र विवक्षिते द्वितीयकाव्ये तादृशव्यङ्ग्यः सर्वथा अप्रधान एव स्यादिति एवकारेण प्रधानाभावे सूचिते ध्वनिकाव्येऽतिव्याप्तेर्निरासः।

पार्यन्तिकव्यङ्ग्यस्य प्राधान्ये हेतुर्हि चरमास्वादविषयत्वम्। आन्तरालिकव्यङ्ग्यस्य वाच्यापेक्षया अप्राधान्ये हेतवो हि व्यङ्ग्यस्य अप्राकृतत्वम्, उपपादकत्वम्, असुन्दरत्वं, स्वतोऽनिष्पन्नत्वमित्यादयः। व्यङ्ग्यचमत्कारस्य अस्फुटत्वात् गुणीभूतत्वाद्वा लीनव्यङ्ग्ये तृतीये काव्ये, उपमारूपकाद्यलङ्कारचमत्कृतौ लीनत्वाद्वा वाच्यचित्राख्ये तुरीये काव्ये व्यङ्ग्यस्य सदैव अप्राधान्यादतिव्याप्तिनिरास एव चमत्कारकारणमिति विशेषणस्य तात्पर्यम्। अतोऽत्र द्वितीयकाव्ये अप्रधानीभूतव्यङ्ग्ये चमत्कारस्य सत्ता इतरकाव्यपरिच्छेदकभूता। उक्तञ्च चन्द्रिकाटीकायाम् – 'लीनव्यङ्ग्यमस्फुटव्यङ्ग्यं गुणीभूतव्यङ्ग्यस्य काव्यतृतीयभेदस्य प्रभेदः। वाच्यचित्रमर्थालङ्कारोपस्कृतमविवक्षितव्यङ्ग्यं चित्राख्यं चतुर्थमधमकाव्यम्। तत्र व्यङ्ग्यस्य सर्वथाप्राधान्याद् द्वितीयकाव्यलक्षणातिव्याप्तिः स्यादतश्चमत्कारकारणमिति निवेशितम्।'[22] इति।

द्वितीयकाव्यस्योदाहरणमुपन्यस्तं जगन्नाथेन –

'राघवविरहज्वलनज्वाला सन्तापितसह्यशैलशिखरेषु।
शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय।।'[23] इति।

श्रीरामचन्द्रस्य वैदेहिवियोगज्वालाजनितसन्तापेन सह्याख्यदाक्षिणात्यपर्वतशृङ्गेषु शीततर्ावपि शैत्याभावे वस्त्राद्यभावेऽपि सुग्रीवस्य वानराः सुखमेव स्वपन्त आसन्, किन्तु सहसैव पवनतनयाय हनुमते क्रुध्यन्तीत्यर्थः। पद्यस्यास्य व्यङ्ग्यार्थो हि – हनुमता जानक्याः सीतायाः

21. इह शृङ्गारकरुणशब्दाभ्यां रतिशोकाख्यौ स्थायिभावौ ग्राह्यौ, इतरथा अपरिच्छिन्नपूर्णघनानन्दस्वरूपतया गौणप्रधानाभावौ असङ्गतौ स्याताम्।
22. रसगङ्गाधरस्य चन्द्रिकाटीका, पृ. ६७
23. रसगङ्गाधरः, प्रथमाननम्

कुशलवार्ताज्ञापने वीततद्विरहसन्तापो रामचन्द्रः शीतलो जात इति। वाच्यार्थस्तावत् – हनुमते वानराणां सहसोत्पन्नकोपः इति। पद्येऽस्मिन् वाच्यव्यङ्ग्यौ मिथः पोष्यपोषकभावेनान्वितौ। व्यङ्ग्यः पोषकः वाच्यश्च पोष्यः। हेतुरत्र अनुसन्धेयं यत् – हनुमान् रामचन्द्रस्य तथा सुग्रीवस्य स्नेहभाग्, वानराणाञ्च हितविधायको बभूव। परन्तु अकस्मादेव हनुमान् वानराणां क्रोधास्पदं सञ्जातः। वानराणां हनुमति क्रोधरूपवाच्यार्थस्तावदेव सङ्गतिं न याति यावन्न वैदेहीकुशलवार्ता ज्ञापनजनितवीतविरहतापात् तप्तसह्यशिखरे पुनः शीतले सति वानराणां सुखशयने बाधोत्पन्नेति व्यङ्ग्यार्थावबोधो जायते। एवं पोष्यपोषकभावेन व्यङ्ग्यार्थस्य वाच्यार्थसाधकत्वात् गुणीभावत्वेऽपि यथा दुर्भाग्यवशाद् दासीभावमापन्नापि राजमहिषी काञ्चन विलक्षणां नैसर्गिकीं कमनीयतामावहती तथैव विलक्षणचमत्कारित उत्कर्षत्वम् इत्यतः द्वितीयकाव्योदाहरणत्वं सुतरां सङ्गतम्।

3. **मध्यमकाव्यविमर्शः**

पण्डितराजेन जगन्नाथेन तृतीयकाव्यं लक्षितं – 'यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तत्तृतीयम्' इति। यस्मिन् काव्ये वाच्यार्थचमत्कारः व्यङ्ग्यार्थचमत्कारश्च समान एवाधिकरणे न स्यात् तत्र तृतीयकाव्यमिति लक्षणार्थः। अस्यार्थस्तावदेवं ग्राह्यं – यत्र व्यङ्ग्यचमत्कारस्य लघ्वंशे विद्यमानत्वेऽपि वाच्यचमत्कारे तस्य लीनत्वात् स्पष्टतया नानुभवगोचरत्वं तत्र तृतीयकाव्यस्यावकाशः। उक्तञ्च चन्द्रिकायां – 'यत्र काव्ये व्यङ्ग्यप्रतीतिजन्यश्चमत्कारो लेशतः प्रादुर्भवन्नपि वाच्यप्रतीतिजन्यचमत्कारस्य सर्वतोमुखीनस्यान्तर्निगीर्णः स्पष्टतयानुभवगोचरतां नाचमति तत्तृतीयं मध्यमकाव्यमित्यर्थः'[24] इति।

न ह्यत्र तृतीये काव्ये व्यङ्ग्यस्य सर्वथा परित्यागः क्रियेत। व्यङ्ग्यसम्बन्धं विना न कोऽपि वाच्यार्थः स्वयं चमत्कारजनको भवति। इह खलु वाच्यार्थो व्यङ्ग्यार्थमभिभावयत्यर्थः।

तृतीयकाव्यस्योदाहरणं यथा –

> 'यथा यमुनावर्णने- तनयमैनाकगवेषणलम्बीकृतजलधिजठर-प्रविष्टहिमगिरिभुजायमानया भगवत्या भागीरथ्याः सखी'[25] इति।

परमेश्वर्याः गङ्गायाः सहचरी यमुना स्वपुत्रस्यान्वेषणाय हिमालयबाहुसमा सा समुद्राभ्यन्तरे प्रविष्टा इति उदाहरणस्यार्थः। अत्र 'हिमगिरिभुजायमाना' इत्यत्र उत्प्रेक्षा एव चमत्कारकारणभूता। वस्तुतोऽत्र पदे भुजा इवाचरन्ती इति विग्रहे आचरणार्थे 'कर्तुः क्यङ् सलोपश्च'[26]

---

24. रसगङ्गाधरे पृ. ७६
25. रसगङ्गाधरः, प्रथमाननम्
26. पा.सू. ३/१/११

इति सूत्रेण विधीयमानः क्यङ्प्रत्ययः उपमानमेव सूचयति, किन्तु सम्पूर्णवाक्यस्य पर्यवसाने सम्भावनायाः प्रतीतेः उपमोपक्रमोत्प्रेक्षा एव। अत्र यमुनायाः तथाविधाचरणमेव वाच्यार्थः। यद्यप्यत्र पद्यांशे हिमालयभुजोत्प्रेक्षातः श्वेतत्वरूपः गवेषणलम्बीकृतजलधिजठरप्रविष्ट इत्यंशेन च पातालचुम्बितत्वरूपो व्यङ्ग्यार्थः चमत्कारं जनयति तथापि यथा ग्राम्यनायिकायाः गौरता केशरद्रवेणाङ्गरागस्य प्रभया तिरोहिता भवति तथैवात्र व्यङ्ग्यचमत्कृतिर्वाच्यचमत्कृतौ लीना सञ्जाता। अतोऽत्र वाच्यार्थस्य स्पष्टतया व्यङ्ग्यार्थस्य चास्पष्टतया प्रतीतेः तृतीयकाव्यलक्षणसङ्गतिः।

ननु द्वितीयतृतीययोः काव्ययोः व्यङ्ग्यस्य गुणीभूतत्वादर्थालङ्कारप्रधानानां काव्यानाम् अत्रान्तर्भावे सति पृथक्तया काव्यभेदस्वीकारः समुचित इति चेन्न, समासोक्त्याद्यलङ्कारेषु गौणेऽपि व्यङ्ग्ये चमत्कारजनकत्वात् तथाविधालङ्कारप्रधानानां काव्यानां द्वितीयेऽन्तर्भावः। दीपकाद्यलङ्कारेषु गौणेऽपि व्यङ्ग्ये चमत्कारजनकत्वाभावात् तथाविधालङ्कारप्रधानानां काव्यानां तृतीयेऽन्तर्भावः। तत्र द्वितीये व्यङ्ग्यः गुणीभूतोऽपि जागरुकतामनुभवगोचरतां वा भजते, तृतीये व्यङ्ग्यः गुणीभूतः सन् नानुभवगोचरतां प्राप्नोतीति।

4. **अधमकाव्यविमर्शः**

अधमकाव्यस्य लक्षणं निरूपितं जगन्नाथेन – 'यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम्' इति। यत्र काव्ये वाच्यार्थचमत्कारेण परिपोषितः शब्दचमत्कार एव प्रधानं तत्राधमकाव्यम्। अत्रावधेयं क्वचिदेतादृशेषु काव्येषु कथञ्चित् व्यङ्ग्यस्य सत्त्वादपि चमत्कारजनकत्वाभावादप्राधान्यमेव विवक्षितम्। अत्र शब्दचमत्कार एव प्रधान इति।

इह उदाहरणतया उपन्यस्तं –

'मित्रारिपुत्रनेत्राय त्रयीशात्रवशत्रवे।
गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः।।'[27] इति पद्यम्।

पद्यस्यास्यार्थो हि – सूर्याचन्द्रमसौ यस्य नेत्रसमौ, ऋग्यजुस्सामवेदानां रिपोर्योऽपहारकः, य इन्द्रवंशजानां त्राणकर्ता, पृथिव्याश्च रक्षकः तादृशाय विष्णवे वृषभवाहनाय वा नम इति।

पद्येऽस्मिन् त्र-इत्यक्षरस्य एकादशवारप्रयोगात् वृत्त्यनुप्रासो नाम शब्दालङ्कार इति निर्बाध एव। एवंविधानुप्रासेनार्थचमत्कारः शब्दालङ्कारे लयं याति। भगवद्विषयकभक्तनिष्ठरतिभावादयो व्यङ्ग्याः सन्तोऽपि तेषामस्फुटत्वात् लीनत्वाच्चाङ्गतामेव ते भजन्तीत्यस्तुरीयकाव्यलक्षणसमन्वयो निर्विघ्नः।

27. रसगङ्गाधरः, प्रथमाननम्

**पञ्चमकाव्यभेदस्य शङ्का निरसनञ्च**

✠ सन्ति खलु कानिचन काव्यानि यत्रार्थचमत्कारस्याभावः शब्दचमत्कारस्य सद्भाव एव परिलक्ष्यते। यथा एकाक्षरानुप्रास-पद्यार्धवृत्तियमक-पद्यबन्धादिषु काव्येष्वर्थचमत्कारस्य लेशतोऽसत्त्वात् शब्दचमत्कार एव प्रधान। एकाक्षरानुप्रासस्योदाहरणं यथा –

‘दादतो दुद्ददुद्दाती दादादो दूददीतदोः।
दुद्दादं दददे दुद्दे ददाददददोऽददः।।’[28] इति।

समुद्रापरनामकस्य पद्यार्धवृत्तियमकस्य –

‘अयशोऽभिदुरालोके कोपधा मरणादृते।
अयशोभिदुरालोके कोपधा मरणादृते।।’[29] इति।

पद्यबन्धस्य-

‘मारमासुषमा चारुरुचा मारवधूत्तमा।
मात्तधूर्ततमावासा सा वामा मेऽस्तु मारमा।।’[30] इति।

एतानि व्यतिरिच्यापि द्व्यक्षराद्यनुप्रास-महायमकापराख्यपद्यावृत्तियमक-चक्र-खड्ग-मुरज-हार-नाग-शक्ति-गोमूत्रिका-सर्वतोभद्रबन्धादि दुष्करशब्दसन्निवेशितानि अर्थचमत्कारशून्यानि शब्दचमत्कारप्रधानानि।

ननुएतादृशानांकाव्यानांपूर्वोक्तचतुर्विधेषुकाव्येषुनान्तर्गतत्वाद्विलक्षणाधमाधमकाव्यस्य पञ्चमतया गणना समुचितेति चेन्न, एकाक्षरादिकाव्येष्वर्थचमत्कारस्य सर्वथा अनुपलम्भाद्रमणीयार्थप्रतिपादकशब्दत्वाभावात् मुख्यकाव्यलक्षणासमन्वयात्। तादृशेषु पद्येषु काव्यता नास्त्येवेति भावः।

पुनरपि शङ्का समुत्पन्ना, तद्यथा – माघादिभिर्महाकविभिः विरचितेषु शिशुपालवधादिमहाकाव्येषु एकाक्षरादिपद्यानां सन्निवेशः संदृश्यते। तानि पद्यानि तु काव्यलक्षणसमन्वयशून्यानि काव्यतया एव गण्यन्तेऽस्माभिः। तत्र खलु वास्तविककाव्यत्वस्याभावेऽपि गतानुगतिकतया प्राचीनानां महाकवीनां परम्परायाः अनुरोधेन एव काव्यत्वं स्वीकार्यं, न तु वस्तुतत्त्वविवेकेन। तानि पद्यानि तातकूपाक्षरजलन्यायेन अस्माभिः उपेक्ष्यान्येव, असद्विषये महाजनानुसरणस्य अनौचित्यात्।

---

28. रसगङ्गाधरस्य चन्द्रिकाटीकायाम्, पृ. ८०
29. तत्रैव
30. रसगङ्गाधरः, प्रथमाननम्

✠ किञ्च, केषुचित् काव्येषु शब्दार्थयोश्चमत्कारस्य समानत्वात् तत्रापि पञ्चमकाव्यस्य शङ्का सञ्जायते। तत्र खलु प्राथम्येन अतिसूक्ष्मेक्षिकया शब्दार्थयोर्न्यूनाधिकप्राधान्यस्य विचारः साध्यः। शब्दचमत्कारस्य प्राधान्ये चतुर्थे अधमे, अर्थचमत्कारस्य प्राधान्ये तृतीये मध्यमे काव्येऽन्तर्भावः। ननु द्वयोः प्राधान्यस्य सूक्ष्मविचारादपि समप्राधान्यमेव दरीदृश्यते तत्र मध्यमे तस्य काव्यस्यान्तर्भावः, मध्यमस्य व्यङ्ग्यचमत्काररहितस्य शब्दाचमत्कारप्राधान्येऽपि विरोधाभावाद् वाच्यचमत्कारस्योपलब्धात्। तथाहि जगन्नाथेनोक्तं– 'समप्राधान्ये तु मध्यमम्' इति। मयूरभट्टविरचिते सूर्यशतक उदयाचलावलम्बितस्य प्रातःकालिकस्य सूर्यस्य वर्णनात्मकः –

'उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पन्धयाना
निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनाम्।
उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः
सङ्घातः कोऽपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत्।'[31]

इति श्लोक एवात्र उदाहरणम्।

अत्र श्लोके पकाराद्यक्षराणां भृशमावृत्तेरनुप्रासस्य प्राचुर्यात् प्रत्येकं पादे ओजोगुणस्य च प्रकाशात् शब्दचमत्कारप्रधानः। अपि च, प्रसादगुणान्वितादपि शब्दश्रवणानन्तरमेव रूपकहेत्वलङ्कारयोरुपलब्धाद् वाच्यार्थचमत्कारोऽपि प्रधानः। अतः पद्यस्यास्य मध्यमेऽन्तर्भावः।

**जगन्नाथनये काव्यस्य चातुर्विध्ये युक्तयः**

वस्तुतः जगन्नाथनये काव्यस्य चातुर्विध्यं समुचितमेव। शब्दचित्रार्थचित्रयोः काव्ययोश्चमत्कारस्य तारतम्यात् न्यूनाधिकभावस्य स्पष्टोपलभ्याद्द्वयोः पृथक्करणमौचित्यमेव काशयति। तत्राविवक्षितव्यङ्ग्यापेक्षया शब्दालङ्कारयुतशब्दचित्रापेक्षया अविवक्षितव्यङ्ग्यार्थालङ्कारप्रधाने अर्थचित्रे चमत्कारस्याधिक्यं स्फुटमेव। अपि च चमत्कारस्य तारतम्यादपि एकत्रैव द्वयोः काव्ययोः सन्निवेशः क्रियते चेत्तर्हि व्यङ्ग्यप्राधान्ये ध्वनिः, अप्राधान्ये गुणीभूतव्यङ्ग्यकाव्यमिति प्राधान्याप्राधान्यमात्रयोः अल्पहेतुकयोः ध्वनिगुणीभूतव्यङ्ग्ययोः पृथक्करणे दुराग्रहः कथम् ? तयोरप्येकत्रैव सन्निवेशः स्यादेव। तन्मा भूदिति विवक्षया शब्दचित्रार्थचित्रयोरपि पृथक्तया परिगणनमेव श्रेयास्पदमिति।

किञ्च, न हि कैश्चित् काव्यतत्त्वज्ञैः

'विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि यम्।
ससम्भ्रमेन्दद्रुतपातितार्गला निमीलिताक्षीव भियामरावती।।'[32] इति,

'स छिन्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः।
अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवावभासे।।'[33]

---

31. रसगङ्गाधरे, पृ. ८४
32. काव्यप्रकाशः, द्वितीयोल्लासः
33. रसगङ्गाधरः, प्रथमाननम्

इत्यादिभि उत्प्रेक्षाद्यलङ्कारचमत्कारजनकैः काव्यैः सह

'स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा-
मूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः।
भिद्यादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम-
द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम्।।'[34]

इत्यादीनामनुप्रासाद्यलङ्कारचमत्कारजनकानां काव्यानां साम्यं मन्यन्ते इति हरिः।

## ग्रन्थेतिवृत्तम्


- जगन्नाथः, रसगङ्गाधरः, सम्पा. मदनमोहन-झाँ, वाराणसी, चौखम्बा-विद्याभवनम्, २०११.
- जगन्नाथः, रसगङ्गाधरः (मर्मप्रकाश-मधुसूदनी-बालक्रीडोपेतः), वाराणसी, काशी-हिन्दु-विश्वविद्यालयः, २०१०.
- राजवंश-सहाय-हीरा, भारतीय काव्यशास्त्र के प्रतिनिधि सिद्धान्त, वाराणसी, चौखम्बा विद्याभवनम्, १९६७.
- मम्मटाचार्यः, काव्यप्रकाशः, सम्पा. रामभट्टात्मजझल्कीकरः, परिमल-पाब्लिसार्स्, २०१२.
- मम्मटाचार्यः, काव्यप्रकाशः, सम्पा. थानेशचन्द्र-उपैतिः, परिमल-पाब्लिसार्स्, २००३
- विश्वनाथः, साहित्यदर्पणः, सम्पा. सत्यानारायणचक्रवर्ती, कोलकाता, संस्कृतपुस्तकभाण्डारः।
- कुन्तकः, वक्रोक्तिजीवितम्, सम्पा. रविशङ्करवन्द्योपाध्यायः, कोलकाता, संस्कृतपुस्तकभाण्डारः, २००९.
- आनन्दवर्धनः,ध्वन्यालोकः,सम्पा.विमलाकान्तमुखोपाध्यायः,वर्धमानम्,वर्धमानविश्वविद्यालयः।
- क्षेमेन्द्रः, औचित्यविचारचर्चा, सम्पा. रमाशङ्करत्रिपाठी, वाराणसी, चौखम्बा-कृष्णदास-अकादेमी, २०१०.
- वामनाचार्यः, काव्यालङ्कारसूत्राणि, सम्पा. ब्रह्मानन्दत्रिपाठी, चौखम्बासुरभारती, २०१०.


34. काव्यप्रकाशः, द्वितीयोल्लासः

Received on: 11/03/2020 Accepted on: 11/02/2021

# अद्वैतवादाचिन्त्यभेदाभेदवादविमर्शः

सौरभ-दे*

**शोधसारः**

धर्मार्थकाममोक्षेषुचतुर्षुपुरुषार्थेषु परमं चरमं च लक्ष्यं मोक्षप्राप्तिः। मोक्षावाप्तौ किं तावत्साधनमित्यत्र विद्यते विदुषां विमति।मतविरोधाय आस्तिकनास्तिकभेदेन द्वादशदर्शनानामुद्भवः इत्यत्र नास्ति संशयः। यद्यपि साक्षात्परम्परया वा मोक्षमार्गमेव उन्मोचयन्ति दर्शनानि तथापि उत्तरमीमांसां वेदान्तदर्शनं वा आधारीकृत्य एवम् अयं शोध प्रबन्धः। वेदान्तदर्शनं श्रुतिस्मृतिन्यायप्रस्थानेषु त्रिषु विभक्तम्। प्रस्थीयते अनेनमार्गेण इति प्रस्थानम् इति व्युत्पत्या श्रुतिप्रस्थानेन उपनिषदां, स्मृतिप्रस्थानेन उपनिषत्तत्त्वप्रतिपादकानां गीतादीनां ग्रहणं न्यायप्रस्थानेन च बादरायणप्रणीत-ब्रह्मसूत्राणां ग्रहणं भवति। वेदान्तदर्शनेऽपि प्रस्थानत्रयव्याख्यानभेदात्सम्प्रदायभेदः दृश्यते। यद्यपि सन्ति बहवो अवान्तरभेदाः तथापि प्रायः दशसम्प्रदायाः मुख्यरूपेण प्रतिष्ठिताः। मया अस्मिन् प्रबन्धे द्वयोःभाष्ययोः विशिष्टमध्ययनं कर्तुमिष्यते।

**कुञ्चिशब्दाः**

अद्वैतदर्शनम्, माया, जीवः, मुक्ताः, ईश्वरः, मायावादः, नित्याः, परमात्मा, निर्गुणः, साक्षी, सद्योमुक्तिः क्रममुक्तिश्चेति।

## अद्वैतवेदान्तस्य स्वरूपम्स

र्वाधिष्ठानभूतनिराकारनिर्विशेषनिर्गुणनित्यशुद्धबुद्धमुक्तब्रह्मव्यतिरेकेणान्तस्य पारमार्थिकसत्वाभावात् नाङ्गीक्रियते अन्येषां पदार्थानाम् अद्वैतत्वम्। अद्वैतम् नाम न द्वैतमिति। वार्तिककारः उच्यते यत्-“द्विधेतं द्वीतमित्याहुस्तद्भावो द्वैतमुच्यते।

तन्निषेधेन चाद्वैतमप्रत्यगवस्त्वभिधीयते”।।[1]इति ।

निर्गुणनिर्विशेषनिराकारं सर्वोपाधिविवर्जितं सत्यज्ञानानन्दस्वरूपमनन्तमं सर्वव्यापकमेकमेवाद्वितीयं

1. बृहदारण्यकभाष्यवार्तिकम्-4.3.1807

***Ph.D Scholar, Sanskrit Department, Raiganj University.**

ब्रह्म। परब्रह्मणो निर्गुणत्वादौ “अशब्दमस्पर्शमरूपमव्ययम्”[2], “साक्षी चेता केवलो निर्गुणश्च”[3], “जन्माद्यस्य यतः”[4] चेत्यादीनि श्रुतिस्मृतिन्यायप्रस्थानानि मानम्।

**माया**-अविद्या अज्ञान-प्रकृति-अव्यक्तादिपर्यायशब्दैः व्यवह्रियते। अव्यक्तं कदाचित् आकाशशब्देन कथ्यते। तथाहि “एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च”[5]। भगवच्छाङ्कराचार्यैः कार्यकारणयोरभेदं मत्वा अध्यासभाष्ये अध्यास एव अविद्या इत्युक्तम्। साविद्या ब्रह्मज्ञाने सति बाधिता भवति।

**जीवः**-अहङ्कारेन्द्रियशरीरेषु अहमित्यभिमन्यमानः शरीरेन्द्रियान्तःकरणोपाधिकश्चेतनो जीवः। स एव स्वकृतकर्मानुगुण्येन जननमरणादिकमनुभूय पौनःपुन्येन संसारचक्रे आपतति। जीवस्य अध्यासमूलकोऽयं संसारबन्धः।

**ईश्वरः**-मायारूपशक्तिविशिष्टः कूटस्थचेतनेश्वरः सकलजगत्कारणं च। स एव साक्षी, स चैकः, न प्रतिशरीरं साक्षी भिद्यते,एको देवःसर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चिति श्रुतेः।

**मुक्तिः**-मुक्तिः द्विविधा भण्यते। सद्योमुक्तिः क्रममुक्तिश्चेति। सर्वोपाधिविवर्जितनिर्गुणब्रह्मानुशीलनवतां ब्रह्म एतैकत्वापरोक्षज्ञानोदयसमकाले एव नित्यशुद्धबुद्धमुक्तसच्चिदानन्दस्वरूपात्मना स्थितिः सद्योमुक्तिः। नाहं कर्ता नाहं भोक्ता अममेवैकोऽद्वितीयः सच्चिदानन्दस्वरूपः परमात्मा इत्येवमनुभवतः सद्योमुक्तपुरूषस्य देहात्मविषयज्ञानाभावात् स्वदृष्टया विदेहःसः। तदा अस्य पुरुषस्य सकाशे जीवन्मुक्तस्तत्प्रतिपादकशास्त्रं च अर्थवादमात्रम्। तस्मात् उच्यते-

“जीवन्मुक्तिप्रत्ययं शास्त्रजातं जीवन्मुक्ते कल्पिते योजनीयम्।
तावन्मात्रेणार्थवत्त्वोपपत्तेः सद्योमुक्तिः सम्यमेतस्य हेतोः।।”[6]

वस्तुतस्तु प्रारब्धकर्मावशेषमङ्गीकृत्य जीवन्मुक्तिकथनमज्ञानिनां कृते एव। एतदेव भगवच्छङ्कारचार्यैः भण्यते यत्-

“देहस्यापि प्रपञ्चत्वात् प्रारब्धावस्थितिःकुतः।
अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः।।”[7]

सगुणब्रह्मविद्यानुशीलतावशात् उपास्यब्रह्मसाक्षात्कारसमकाले एव न मुक्तिः,किन्तु ब्रह्मलोकावस्थितेः ऐश्वर्यभोगाच्च परं क्रमशः अवाप्तमुक्तित्वात् क्रममुक्तिरियम् इत्युच्यते। भगवच्छाराचार्यैः क्रममुक्तिविषये गद्यते तत्राविद्यावस्थायां ब्रह्मण उपास्योपासकादिलक्षणः सर्वव्यवहारः।

---

2. कठोपनिषत्-1.3.15
3. श्वेताश्वतरोपनिषत्-6.11
4. ब्रह्मसूत्रम्-1.1.2
5. बृहदारण्यकोपनिषत्-3.8.11
6. संक्षेपशारीरकम्-4.39
7. अपरोक्षानुभूतिः-93

**अचिन्त्यभेदाभेददर्शनस्य स्वरूपम्**

श्रीमद्भागवततोक्तः भगवान् श्रीकृष्णरेव सच्चिदानन्दस्वरूपः श्रीचैतन्यदेवः। चैतन्यमहाप्रभुः श्रीमद्भागवद्गीतोक्तमतं मध्वाचार्यप्रणीतपूर्णप्रज्ञभाष्योक्तमतं च स्वीयमतरूपेणाङ्गीकृत्य लोकशिक्षां प्रददाति स्म। श्रीकृष्णचैतन्यमहाप्रभोः मतमवलम्ब्य पूज्यपादबलदेवविद्याभूषणाचार्यैः ब्रह्मसूत्रादीणामुपरि प्रणीतं भाष्यं गोविन्दभाष्यम्। ब्रह्मचारमहाराजस्यामृतवर्षिणी लेखनी अपूर्वनामनन्यां कांचन दिव्यां धारामनुसरति। नारिकेलफलसम्मितस्यापातकठोरस्य शास्त्रार्थस्युचपरिचरमावरणमपसार्य्य सा अन्तर्निहितमतिसुखास्वादं तत्त्वामृतमतीव सरलया भाषया भङ्गिमया च सर्वजनसुगमरूपेण परिवेशयितुं पटीयसी। अवदाता प्रतिभाप्रभा चिरसमुज्ज्वलेव सौदमिनी काठिन्यं सरलतायां सरलतां सरसतायां सरसतां च हृदयग्राहिण्या बोधसुषमया समलङ्कृवती जिज्ञासुभक्तहृदयं तत्वज्ञानसम्पदा समनुञ्जरति। ब्रह्मसूत्रं नाम किञ्चन सुकठिनमथच अपरिहार्यमेकं ग्रन्थामृतम्। ब्रह्मसूत्रमिदं जीवस्य ब्रह्मन्तिकता-प्राप्तेः आलोकोज्वलः प्रशस्तो राजपथः। ब्रह्मप्राप्तेः साधनसमूहस्य सुचितमनुशीलनेन प्राप्तायां परममुक्तो न पुनरधोभ्रामणं भवति ब्रह्मचक्ते। अतएव अन्तिमे वेदान्तसूत्रे गीयते "अनावृत्तिः शब्दादनावृत्तिः शब्दात्" इति। स्वसिद्धान्तस्य परिपोषकरूपेण वैपरीत्यस्य विरोधितायाश्च विहङ्गमावलोकनाय परतन्त्रसिद्धान्तस्यापि अनुसन्धानमावश्यकम्। तस्मात् आचार्यशङ्कर प्रोक्तस्य अद्वैतवादस्य पार्श्वेदेशे महाप्रभोः अचिन्त्यभेदाभेदवादमुपस्थाप्य व्याख्यातवान्। अचिन्त्यभेदाभेदवादस्य अनवद्यमुपस्थापानमस्य ग्रन्थस्य गोरवमतिशयितं करोति। कानिचन सूत्रव्याख्यानं पश्यामः -

**"जन्माद्यस्य यतः"** इति सूत्रस्य गोरपरमभिनवं शास्त्रसम्म्तं व्याख्यानं प्रदत्तम्। आद्यस्यादिरस्य जन्म प्रकाशो यस्मात् स एव आद्यरसस्याप्राकृतभोमयमूत्तिः ह्लादिनीशक्तिसहितः श्रीकृष्णः। पश्चात् नवद्वीपधाम्नि तद्वद्वयमेकात्मतां प्राप्य श्रीगोरङ्गरूपेण प्रकटितम्। अतो राधाकृष्णद्युतिसुवलित-श्रीकृष्णविग्रहात्मकः श्रीकृष्णचैतन्येव जन्माद्यस्य सूत्रस्य लक्षीभूतम परमं वस्तु ।

**शास्त्रयोनित्वात्** – शास्त्रयोनित्वादिति सूत्रेऽपि काचनाभिनवा शास्त्रवार्त्ता इदं प्राथम्येन विधोषिता। सूत्रेऽस्मिन् उक्तं यत् शास्त्रस्य योनिः यस्मात् निखिलशास्त्राणि निःसृतानि तद् ब्रह्म। तस्य च परब्रह्मणः प्रकटः प्रकाशः श्रीकृष्णचैतन्य एवेति आनन्दरोमाञ्चसञ्चरिणी प्रेमाश्रुवर्षणविवर्धिनी च वाणी। भगवतः पूर्णतमावतारः श्रीकृष्णचैतन्यः ह्लादिनोशक्तेराधारे आधेयरूपेणाधिष्ठाय प्रपञ्चे अवतरति स्म। श्रीकृष्णचैतन्यः एव परमब्रह्मणः प्रकट-प्रकाश इत्येतत् सर्वपनिषत्सारभूतश्रीमद्भगवदगीतया प्रमाणी क्रियते। गीता क्षराक्षारतीतं पुरूषं पुरुषोत्तमे कथयति। पुरुषोत्तमं कथयति। पुरुषोत्तमोऽयं ब्रह्मवस्तुनः प्रतिष्ठा । ब्रह्मणो हि प्रतिष्याहमिति गीतोक्तिः। प्राक् ब्रह्मतत्त्वं ज्ञात्वा पश्चात् पुरुषोत्तमतत्त्वं प्रवेष्टव्यम्, यथा ज्योतिर्मण्डलं भित्त्वा सूर्य्यविग्रहमुपतिष्ठति तथा, ततो मां तत्त्वतो ज्ञात्वा विश्यते तदनन्तरमिति गीतोक्तेः, "यस्य प्रभाप्रभवतो जगदन्डकोटी" ति ब्रह्मसंहितावचनात्,यद् द्वैतं ब्रह्मपनिषदि तदप्यस्य तनुभेति चैतन्यचरितामृतधृतस्वरूपदामोद वाक्याच्च। पुरुषोत्तमोऽयं एव श्रीकृष्णचैतन्यस्तदधुना स्थाप्यते

– “वजानन्ति मां मूढा मानुषीं तनुमाश्रितमिति” ।[8] अनयैव घोषणया “शास्त्रयोनित्वादिति”[9] ब्रह्मसूत्रं सार्थकं जातम्।

**सिद्धान्तः**-अचिन्त्यभेदाभेदवादिनःकथयन्ति- निर्गुणनिर्विशेषनिराकारं सर्वोपाधिविवर्जितं ब्रह्म तत्तु हरेः अङ्गकान्तिमात्रमेव। यथा सामान्याः चर्मनेत्रेण सूर्यप्रभां दुष्टुं शक्नुवन्ति, न तु सूर्यं यथार्थतः ज्ञातुमर्हन्ति तथैव ज्ञानमार्गेण साधकः श्रीकृष्णस्याङ्गकान्तिमेव ज्ञातुमर्हति, न श्रीकृष्णस्य स्वरूपम्।

“हरिस्तेकं तत्त्वं विधि शिव सुरेश प्रणमितो
यदेवेदं ब्रह्म प्रकृति रहितं तत्तनुमहः।
परात्मा तस्यांशो जगदनुगतो विश्वजनकः
स वै राधाकान्तो नवजलदकान्तिश्चिदुदयः” ।।[10]

उपनिषदि वर्णितं यत् ब्रह्म तदेव श्रीचैतन्यस्यैवाङ्गकान्तिः। चैतन्यात् कृष्णात् जगति परमतत्त्वमेविह नास्ति। जगदनुगतो विश्वजनकः परमात्मा तस्यांशः।

“यदद्वैतं ब्रह्मोपनिषदि तदप्यस्य तनुभा
य आत्मान्तर्यामी पुरूष इति सोऽस्याशविभवः।
षडैश्वर्यैः पूर्णो य इह भगवान् स स्वयमयं
न चैतन्यात् कृष्णज्जगति परतत्त्वं परमिह” ।।[11]

**सिद्धान्तभेदः**-शङ्कराचार्यस्याभिप्रायः जीव-जगतोः अस्तित्वमेव नास्ति। तत्र ब्रह्मणा साकं सम्बन्धे प्रश्नः एव न भवति । अद्वैततत्त्वमेव प्रतिपादितमिति अद्वैतवादःइतरुच्यते । किन्तु मायास्वीकारात् मायावादः इत्यपि पूर्वपक्षिभिः कथ्यते।

**गौडीयवैष्णवाचार्यस्याभिप्रायः**- शक्तिशक्तिमतोः यः सम्बन्धः स च न भेदः नापि अभेदः। युगपदवस्थितेः अचिन्त्यः उच्यते। तथैव जीव जगतोः ब्रह्मण् साकं तदेव सम्बन्धः । उदाहरणत्वेन उच्यते अग्निः, अग्नेः दाहिकशक्तिश्च। अर्थात् –स्फुलिङ्गा ऋद्धाग्नेरिव चिदणवो जीवनिचया। हरेः अपृथगपि तु तद्भेदविषयाः।

“हरेः शक्तेः सर्वं चिदचिदखिलं स्यात् परिणति
विर्वतं नो सत्यं श्रुतिमतविरूद्धं कलिमलम् ।

8. श्रीमद्भगवद् गीता- श्लोकः-9.11
9. शास्त्रयोनित्वात्- 1.1.3
10. श्रीचैतन्योपदेश रत्नमाला-प्रमेयतत्वम्- 9
11. श्रीचैतन्यचरितामृतम् आदिलीला-3

हरेर्भेदाभेदौ श्रुतिविहिततत्त्वं सुविमलं
ततः प्रेम्णः सिद्धिर्भवति नितरां नित्यविषये" ।।[12]

अचिन्त्यशक्तिमयत्वात् अचिन्त्यभेदाभेदवादः उच्यते।

**उपसंहारः**- भगवत् नाम्ना शुद्धिं समवाप्ते दर्पणतुल्ये चित्ते भगवतः प्रसन्नं प्रतिविम्बं सञ्चारितं भवेत्। जीवात्मपरमात्मनोरभिन्नत्वमिति महाप्रभोः आन्तराभिप्रायः अनुमीयते। श्रीमता स्वामिप्रज्ञानन्द सरस्वतीमहाभागेनापि उक्तम्- भक्तेः अन्तराले अद्वैततत्त्वमिति। वैष्णवधर्मस्य प्रमाणरूपेण स्वीक्रियते श्रीमद्भागवदग्रन्थम्। तत्रादौ अवसाने च "सत्यं परं धीमहि " इत्युक्तम् , न तु "कृष्णं न धीमहि" इत्युक्तम् , एतेनावगम्यते महाप्रभुः अपि अद्वैतत्त्वमेव स्वीकरोति । निरञ्जनस्वरूपब्रह्मचारी विचारचातुर्येण प्रतिपादितवान् महाप्रभुः अद्वैतवादी आसीत्, अचिन्त्यभेदाभेदवादश्च अद्वैतववादस्यैव नामान्तरमिति। द्वयोः भाष्ययोः तथा प्रतिपादाने भेदः नास्ति। शङ्करचार्यः निर्गुणब्रह्म स्वीकृत्य स्वमतं प्रकटयति। ब्रह्म सत्यं जगन्मिथ्येति शङ्कराचार्यपादाः। तेषां मतेन प्रत्यक्षदृष्टा भेदानन वास्तवाः परं प्रातिभासिका। परब्रह्मणः कापि शक्तिर्नास्ति। शक्तिस्वीकारे एकमेवाद्वितीयमिति मूलसिद्धान्तो व्याहन्येत। अयं हि शङ्कराचार्यपादानां केवलद्वैतवादः। परन्तु श्रीकृष्णचैतन्यसम्प्रदायचार्यावर्य्याः श्रीजीवचरणाः खलु अचिन्त्यभेदाभेदवादिनः। भेदाभेदौ न स्थापनीयौ तर्केण नापि तयोः सहावस्थानं स्वाभाविकं परन्तु श्रुत्यार्थ्यपत्तेरर्थात् शब्दमूलप्रमाणवलात् शक्तिशक्तिमतोः सम्बन्धः अचिन्त्यभेदाभेदः। गोविन्दपादाचार्यः स्वमते श्रीकृष्णरेव सर्वमिति आधारीकृत्य भाष्यमरचयत्। किं नाम अचिन्त्यत्वमिति चेदाह "प्रकृतिभ्यः परं यत् स्यात्तदचिन्त्यस्य लक्षणम्" ।तथा गीतायां "सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तादिति" ।

एवं प्रकारेण समासेन शङ्करबलदेवभाष्ययोः मतमुपस्थाप्य अद्वैतवादाचिन्त्यभेदाभेदवादमपि प्रतिपादितमिति शिवम्।

**परिशीलनीयग्रन्थसूची -**


- पराशरमुनिप्रणीतम्.2014 विष्णुपुराणम् (1-3 खण्डानि) विक्माब्दः. स्वामिगम्भीरानन्देन सम्पादितम्. गोरक्षपुरः.गीताप्रेस.
- मधुसूदन-ससस्वती-पादविरचितः.1930 ख्रीष्टाब्द.प्रस्थानभेदः (शिवमहिम्नः स्त्रोत्रान्तर्गतः) आनन्दाश्रमग्रन्थावलीतः प्रकाशितः.
- ड. गोपीनाथकविराज-महोदयेन विरचितः 1967 ख्रीष्टाब्दः.श्रीकृष्णप्रसङ्गः.कलिकाताः रघुनाथपुरीचमहाना-अङ्गन्तः प्रकाशितम्.
- आचार्यशङ्करः, ब्रह्मसूत्रशाङ्करभाष्यम (श्रीगोविन्दानन्दकृतयाभाष्यरत्नप्रभयाश्रीवाचस्पतिमिश्रविरचितयाभामत्याश्रीमदानन्दगिरिप्रणीतेनन्यायनिर्णयेनसमुपेतम्), सम्पादकः- आचार्यजगदीशशास्त्री, मोतीलालबनारसीदास, दिल्ली, २०१०


12. श्रीचैतन्योपदेश रत्नमाला-9

- पण्डितप्रवर-कृष्णजोयिस्, शाङ्करदर्शनमर्मप्रकाशः. Editor – Dr. M.L. Narakrishna Murthy, Tirupati : Rastriya Sanskrit Vidyapeetha, २००९
- कृष्णदास-कविराजः, चैतन्यचरितामृतम् (बङ्गपुस्तकम्), गोरखपुर : गीताप्रेस (प्रकाशकएवंमुद्रक), एकादश-संस्करणम्, २०१६
- सर्वज्ञत्वात्ममुनिः, संक्षेपशारीरकम्, पञ्चप्रक्रियासहित-श्रीस्वामिरामानन्दकृत-भावदीपिका-हीन्दिव्याख्यासहितम्, सम्पादकः - स्वामीयोगीन्द्रानन्दः, वाराणसी : चौखम्बाविद्याभवन, १९८७
- श्रीश्रीमद्बलदेवविद्याभूषणः, वेदान्तसूत्रम्(प्रथमोऽध्यायः), सूक्ष्माटीका-सिद्धान्तकणानाम्न्याअनुव्याख्ययाचसहितम्, सम्पादकः-श्रीश्रीमद्भक्तिश्रीरूपसिद्धान्तिगोस्वामिमहाराजः, श्रीसारस्वत-गौडीयासन-मिशन-प्रतिष्ठानम्, १४२० बङ्गाब्दः
- विद्यारण्यस्वामी, पञ्चदशी, रामकृष्णकृतव्याख्यया-विषमस्थलटिप्पणी-पाठान्तरश्रुतिकोशश्लोक-विषयसूच्यादिभिः-श्रीमत्परमहंसपरिव्राजकाचार्य-महेश्वरानन्दगिरि, महामण्डलेश्वरमहोदयानांभूमिकयाचसमलङ्कृता, संशोधकः - नारायणराम-आचार्य (काव्यतीर्थः), दिल्लीः चौखम्बासंस्कृतप्रतिष्ठान, २००८
- सदानन्दयोगीन्द्रः,वेदान्तसारः(वङ्गपुस्तकम्),सम्पादकःविपद्भञ्जनपालः,कलकाताःसंस्कृतपुस्तक-भाण्डारः, २०१० (नवमसंस्करणम्)
- धर्मराजाध्वरीन्द्रः, वेदान्तपरिभाषा, सम्पादकः - श्रीसीताराम-शास्त्री-मुसलगावकरः: वाराणसी, चौखम्ब-विद्या-भवन, २०१०
- सुरेश्वरः, नैष्कर्म्यसिद्धिः, व्याख्याकारः - स्वामीप्रज्ञानानन्दसरस्वती, वाराणसीः दक्षिणामूर्ति-मठ-प्रकाशनम्, २०६६(वैकमाब्दः, द्वितीयसंस्करणम्)
- श्रीमद्भागवतपुराणम्, श्रीधरस्वामिविरचितयाभावार्थबोधिनीनाम्नासंस्कृतटीकयासमुपेतम्, संस्कर्ता - आचार्यजगदीशलालशास्त्री, दिल्ली : मोतीलालबनारसीदास, १९८८
- श्रीमन्महर्षि-वेदव्यासः, विष्णुपुराणम् (बङ्गपुस्तकम्), सम्पादकः - आचार्यपञ्चाननतर्करत्नः, कोलकाताः नवभारत-पावलिशार्स, १३९० (बङ्गाब्दः).


Received on: 01/03/2020 Accepted on: 11/02/2021

# नाटकलक्षणरत्नकोशदृष्टिकोणतोऽर्थप्रकृतयः

सुरेश-घोषः*

**सारसंक्षेपः**

नाट्यतत्त्वसम्बन्धिनो ये ग्रन्थाः उपलभ्यन्ते तेषु भरतविरचितं नाट्यशास्त्रम् एव प्रमाणतमम् तथा प्राचीनतमम्। समग्रसारस्वतसमाजे नाट्यतत्त्वजिज्ञासूनामेतद् दौर्भाग्यं यत् नाट्यशास्त्रात् पूर्वं प्रणीताः सर्वे एव ग्रन्थाः दुर्लभा इदानीमपि। भरतस्य परवर्तिनि समये ये ग्रन्थाः ग्रथिताः तेषु सर्वे एव न उपलभ्यन्ते। सागरनन्दीविरचिते नाटकलक्षणरत्नकोशग्रन्थे समग्रस्य नाट्यशास्त्रस्य षट्त्रिंशदध्यायस्थाः, सर्वे एव विषया एकविंशत्यध्यायेषु सुललिततया वैशद्येन वर्णिताः, तथा स्वकीयं मतमपि उपस्थापितम्। ग्रन्थकारेणास्मिन्नेव ग्रन्थे चतुर्थाध्याये अर्थप्रकृतिस्वरूपं विस्तरेण आलोचितम्। तत् स्वरूपमत्र आलोचितम्। अर्थस्य प्रयोजनस्य मुख्यफलस्य प्रकृतयः सिद्धये हेतवः सहकारिकारणानि एव अर्थप्रकृतयः। सार्थप्रकृतिः पञ्चधा- बीजं, बिन्दुः, पताका, प्रकरी, कार्यञ्चेति। वस्तुतो बीजत्वात् बीजं कथावस्तुनः प्रारम्भे फलत्वात् कार्यमन्तिमे सेतुभूतत्वाच्च मध्ये बिन्दुश्चोल्लिखिताः। श्लेषः,छाया उपक्षेपः इत्यादिभिः अङ्गैः यत् अल्पमात्रं समुद्दिष्टं सत् बहुधा विस्तारं गच्छति, तदेव बीजम्। नाटके प्रासङ्गिकघटनानयनार्थं मूलघटनासु सञ्जातं विच्छेदं दूरीकर्तुं व्यवहृतं पूर्वापरसंयोगसूत्रं हि बिन्दुः। नाटकस्याधिकारिकवस्तुना सह यत् प्रासङ्गिकं वृत्तमुपसंहारपर्यन्तं स्थायि तदेव पताकेत्यभिधीयते। यत् प्रासङ्गिकं वृत्तं प्रधानफलसहायकं स्वकीयं फलशून्यं स्वल्पमात्रं च तत्प्रकरीत्युच्यते। नाटके हि यद्वस्तु अपेक्षितमाकाङ्क्षितं वा साध्यं प्रधानरूपेण प्रतिपाद्यं वर्जनीयं वा यत्सिद्ध्यै आरब्धमिदं नाटकं यत्फललाभेन चावसितं तदेव कार्यमित्युच्यते।

नाटकस्य मुख्यफलसिद्धये अर्थप्रकृतेः हेतुत्वं नितरामेव समस्तीति कृत्वा अर्थप्रकृतेः गुरुत्वमनस्वीकार्यमेव। अस्याश्च ज्ञानेन नाटकं यथा सुष्ठु बोधविषयत्वं गच्छति, तथैव नाटकभेदा अपि अनायासेन निर्णेतुं शक्यन्ते।

**शब्दसंकेतः**

नाटकलक्षणरत्नकोशः, अर्थप्रकृतिः, पताका।

---

**M.Phil Scholar, Sanskrit Department, Ramakrishna Mission*

## नाटकलक्षणरत्नकोशदृक्कोणतोऽर्थप्रकृतयः

दृश्यश्रव्यभेदेन काव्यं द्विधा विभक्तम्। तत्र दृश्यकाव्यमेव रूपकमिति कथ्यते। दृश्यश्रव्ययोश्च दृश्यस्य रूपकस्यैव वा चारुतरत्वमुच्चैः उद्घोषितं विपश्चिद्भिः 'काव्येषु नाटकं रम्यम्' इत्यादिवचनैः।

तस्य च नाटकस्य प्रयोगे किं करणीयं किं वा न करणीयमित्यादिविषयमाधारीकृत्य ये ग्रन्थाः प्रणीताः तेषु आचार्यभरतप्रणीतं नाट्यशास्त्रं प्राथम्यमयते। आचार्यभरतमुनिना प्रणीतमुपदिष्टं वा नाट्यशास्त्रमद्यापि सर्वव्यापकत्वात्पञ्चमो वेद इति संज्ञयालंकृतं विश्वरङ्गमञ्चं नियमयति। आचार्यभरतविरचितस्य नाट्यशास्त्रमिति ग्रन्थस्य षट्त्रिंशदध्यायेषु नाट्यविषयाणां विशदं विवेचनमुपलभ्यते। नाट्यशास्त्रमाधारीकृत्य नाट्याभिनयरसविषयका बहवो ग्रन्थाः विरचिताः।

अत एव नाट्यतत्त्वसम्बन्धिनो येग्रन्थाः प्राप्यन्ते तेषु भरतविरचितं नाट्यशास्त्रम् एव प्रमाणतमम् तथा प्राचीनतमम्। समग्रसारस्वतसमाजे नाट्यतत्त्वजिज्ञासूनामेतद् दौर्भाग्यं यत् नाट्यशास्त्रात् पूर्वं प्रणीताः प्राय सर्वे एव ग्रन्थाः दुर्लभा इदानीमपि। भरतस्य परवर्तिनिसमये ये ग्रन्थाः ग्रथिताः तेषु सर्वे एव न उपलभ्यन्ते। यद्यपि दशरूपकमिति ग्रन्थे नाट्यतत्त्वविषयकम् आलोचनं विद्यते तथापि भरतनाट्यशास्त्रे यानि तथ्यानि उपलभ्यन्ते तानि प्रायः सर्वाणि दशरूपके नोपलब्धानि। अतो दशरूपकमिति पूर्णाङ्गनाट्यग्रन्थरूपेण न स्वीकृतम्। अपि च साहित्यदर्पणे केवलं षष्ठे परिच्छेदे नाट्यतत्त्वविषया आलोचिताः। अतः साहित्यदर्पणोऽपि न पूर्णाङ्गः नाट्यग्रन्थः। परन्तु सागरनन्दीविरचिते नाटकलक्षणरत्नकोशग्रन्थे भरतमतेन सह पूर्वाचार्याणां मतमपि उपस्थापितम्। वङ्गीयनाट्यतत्त्वकारःसागरनन्दी अभिनवगुप्तस्य समसामयिक आसीत्। तत्र भवान् दशमशताब्द्यामाविर्बभूव इति बहूनां विदुषां राद्धान्तः। सिलभा लेभि महोदयः त्रयविंशत्यधिकोनविंशशताब्द्यां नेपालभूपतिगुरुपादानां पुस्तकगृहतः नाटकलक्षणरत्नकोशस्य मातृकापुस्तकं सञ्जग्राह। एशियाटिक-सोसाइटितः एकं विवरणं प्रकाशयामास। एतत् मातृकापुस्तकम् आधारीकृत्य एम्.डिलन महोदयः सप्तत्रिंशत्यधिकोनविंशख्रीष्टाब्दे अक्सफोर्ड विश्वविद्यालयमुद्रणालयतः तस्य ग्रन्थस्य एकं पूर्णाङ्गं संस्करणं प्रकाशयाञ्चकार। १९६० ख्रीष्टाब्दे नाटकलक्षणरत्नकोशस्य डिलनकृतस्य आङ्गुलानुवादस्य संशोधनं कृतवन्तौ एम. फाउलार-भि. राघवन्महोदयौ च। एतद्ग्रन्थद्वयमवलम्ब्य एव सिद्धेश्वरचट्टोपाध्यायेन १३८५ बङ्गाब्दे नाटकलक्षणरत्नकोशग्रन्थः वङ्गभाषया अनूदितः। एष ग्रन्थः एकविंशत्यध्यायेषु विभक्तः।तत्र मङ्गलाचरण- काव्यभेद- रूपकभेद- पञ्चावस्था- नाटकभाषा- अर्थप्रकृति- अर्थोपक्षेपक- सन्धि-पताकास्थान- वृत्ति- नायकगुण- अभिनय- नाट्यलक्षण- नाट्यालंकार- रस- भाव- नायिकाभेद-उपरूपकभेदादयः अपि आलोचिताः। सागरनन्दिना स्वकीये ग्रन्थे समग्रस्य नाट्यशास्त्रस्य षट्त्रिंशदध्यायस्थाः सर्वे एव विषया एकविंशत्यध्यायेषु सुललिततया वैशद्येन वर्णिताः, तथा

स्वकीयं मतमपि उपस्थापितम्। एतद्धि नाट्यतत्त्वप्रतिपादकग्रन्थेषु अभूतपूर्वमेव । अभिनवा एव तदीया दृष्टिः विश्लेषणशक्तिश्च। नाट्यशास्त्रस्य इतिहासे बङ्गीयनाट्यतत्त्वजिज्ञासूनां कृते तदीयो ग्रन्थो हि महदुपकारकः ।

सागरनन्दिनः आलोचनायाः परिसरः दशरूपकापेक्षया नाट्यदर्पणापेक्षया च व्यापकतरः। नाट्यशास्त्रदिशा रचितोऽयं ग्रन्थः अभिनवभारतीवत् अतिसमृद्धटीकया न युक्तो भवतीति सत्यम्, तथापि नाट्यशास्त्रस्य प्रायः सर्वे एव विषया आलोचिता अस्मिन् ग्रन्थे। विस्मृतप्रायं बहुतथ्यं नाट्यशास्त्रदिशा दृढतया स प्रतिष्ठापयति । सागरनन्दिनास्मिन्नेव ग्रन्थे चतुर्थाध्याये अर्थप्रकृतिस्वरूपं विस्तरेण आलोचितम्। तत्स्वरूपमत्र आलोचितम्।अर्थस्य प्रयोजनस्य मुख्यफलस्य प्रकृतयः सिद्धये हेतवः सहकारिकारणानि एव अर्थप्रकृतयः। अत उक्तं दर्पणे- 'अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः'[१]। तथाहि नाट्यस्य अपरिहार्यम् अङ्गं तावत् सन्धिः। सन्धिश्च अवस्थया साकं अर्थप्रकृतेर्योगेन सम्पद्यते। अतः अर्थप्रकृतेः सहकारिकारणत्वम्। अर्थप्रकृतेः भेदप्रसङ्गे सागरनन्दमहोदयेन कथ्यते- "नाटकीयवस्तुनः पूर्वोक्तस्य पञ्च प्रकृतयः स्वभावा भवन्ति। नैतान् परित्यज्य नाटकार्थाः सम्भवन्ति"[२]इति। सार्थप्रकृतिः पञ्चधा- बीजं, बिन्दुः, पताका, प्रकरी, कार्यञ्चेति।वस्तुतो बीजत्वात् बीजं कथावस्तुनः प्रारम्भे फलत्वात् कार्यमन्तिमे सेतुभूतत्वाच्च मध्ये बिन्दुश्चोल्लिखितानि।

**बीजम्**-वृक्षस्योप्तं बीजं यथाङ्कुरोद्गमादिना फलेन परिणमति तथैव नाटकबीजमपि अवान्तरघटनाजालैः दृश्यकाव्यफलेन परिणमति। तदुच्यते नाटकलक्षणरत्नकोशे-

"किञ्चित् स्तोकं श्लेषच्छायोपक्षेपप्रभृतिभिरङ्गैः समुद्दिष्टं कथितम्। बहुधा विसर्पति फलावसानं यावद्बीजमित्यर्थः"[३] इति।

अर्थात् श्लेषः- छाया- उपक्षेपः इत्यादिभिः अङ्गैः यत् अल्पमात्रं समुद्दिष्टं सत् बहुधा विस्तारं गच्छति, तदेव बीजम्। अत्र श्लेषः नाम एकस्य पदस्य अनेकार्थाभिधानम्। तदुदाहरणं यथा-

"सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपृष्ठे।।"[४]इति।

छाया नाम कथासाम्यम्। तदुदाहरणं यथा-

"नीतां दुर्गमगाधवारिधितलं दैत्येन हत्वा च तं
यः पृथ्वीं भुजगेन्द्रभोगभवनात् प्रत्यानयत् प्रेयसीम्।
क्रीडाक्रोडतनुः स कैटभरिपुः पुष्णातु युष्मान् जगत्-
स्वास्थ्यस्वस्त्ययनैकहेतुरमरैः सानन्दमभ्यर्चितः।।"[५] इति।

उपक्षेपः नाम अर्थोपस्थापनम्। तदुदाहरणं यथा-

"क एष आर्याह्वानेन मे साहायकमिवाचरति। (निरूप्य)
लङ्केश्वरस्य भवने सुचिरं स्थितेति
रामेण लोकपरिवादभयाकुलेन।
निर्वासितां पतिगृहाद्विजने वनेऽस्मिन्
सीतां वनाय परिकर्षति लक्ष्मणोऽयम्।।"[६] इति।

**बिन्दुः**- नाटके प्रासङ्गिकघटनानयनार्थं मूलघटनासु सञ्जातं विच्छेदं दूरीकर्तुं व्यवहृतं पूर्वापरसंयोगसूत्रं हि बिन्दुः। अतो नाटकलक्षणरत्नकोशे उच्यते-

"आनुषङ्गिककार्यान्तरेण प्रधानप्रयोजनस्य विच्छेदेऽपि संवृत्ते कथायास्त्वविच्छेदहेतुः स बिन्दुः परिकीर्तितः।"[७] इति।

धनिकनये जले पतितं तैलं यथा विस्तारमेति तथैव नाटकीयबिन्दुना घटनापि विस्तारमेति बिन्दोर्जले तैलबिन्दुवत् प्रसारितत्वात् इति। अपि च साहित्यदर्पणे-

"अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्"[८]इति।

तदुदाहरणं यथा-

"लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आकृष्य पाण्डववधूपरिधानकेशान्
स्वस्था भवन्ति मयि जीवति धार्तराष्ट्राः।।"[९] इति।

**पताका**-आधिकारिकं प्रासङ्गिकञ्चेति द्विविधं वस्तूपादीयते नाटके। प्रधानभूतस्याधिकारिकस्य वस्तुन उपकारकतया परिपोषकतया वा यदन्यद् वस्तूपन्यस्यते तत्प्रासङ्गिकमित्युच्यते। तदुक्तं दशरूपके- "प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः"[१०] इति। वृत्तान्तो हि तादृशमेकं प्रासङ्गिकं वस्तु। स च वृत्तान्तः प्रकरीपताकाभेदेन द्विविधः।

नाटकस्याधिकारिकवस्तुना सह यत् प्रासङ्गिकं वृत्तमुपसंहारपर्यन्तं स्थायि तदेव पताकेत्यभिधीयते। तदुक्तं नाटकलक्षणरत्नकोशे-

"यस्यां वृत्तं वर्त्तनं परार्थं परप्रयोजनार्थं प्रधानस्योपकारकं भवेत्, स्वयमपि पौरुषातिशयार्थं प्रधानवत् कल्पेत सा पताका।"[११] इति।

आयोधने स्थानिके पताकया यथैव अनीकानि प्रकाशितानि तथैव नाटकेऽपि उद्भासितानि भवन्ति। तथाहि निगदितं नाट्यशास्त्रे-

"यद्वृत्तं हि परार्थं स्यात् प्रधानस्योपकारकम्।
प्रधानवच्च कल्प्येत सा पताकेति कीर्तिता।।"[१२] इति।

सर्वासु पताकासु नायकोऽस्ति। सः एव नायकः पताकानायकरूपेणाभिधीयते। नाटकस्य नायकस्य प्रधानफलसाधकरूपेण स्वकीयफलसाधकरूपेणापि तिष्ठति गौणतया पताकानायकः। पताकानायकेन नाटकस्य प्रधाननायकस्य फलं साधितं भूयते, न तु केवलं स्वकीयस्य फलस्य साधनम्। यद्यपि पताकानायकस्य स्वकीयफलस्य समाप्तिर्भवति गर्भे विमर्षसन्धौ वा, तथापि नाटकस्य प्रधाननायकस्य फलसाधनार्थं तु निर्वहणसन्धिपर्यन्तं पताकानायकः विस्तारितः भवति। किन्तु पताकानायकः स्वकीयफलाय निर्वहणसन्धिपर्यन्तं न स्थातुमर्हति। तथाह्योद्भासितं नाटकलक्षणरत्नकोशे-

"सा च गर्भेऽवमर्शे च निवर्तत इति नात्यन्तिकमेतदवगन्तव्यम्। अन्ये पताकेत्युपनायकचरितमेव स्थूलार्थमुपवर्णयन्ति। तेनानन्तर व्याख्यापि सिध्यति। उपनायकेन नायकमुपकर्तुं प्राधान्यमवलम्ब्य यत् क्रियते सा पताका।"[१३]इति।

यथा वेण्यां भीमादेः, रामचरिते सुग्रीवादेः चरितं पताकाया उदाहरणानि।

प्रकरी- प्रकरोति नायकचरितस्य प्रकर्षं जनयतीति प्रकरी अर्थप्रकृतिः। यत् प्रासङ्गिकं वृत्तं प्रधानफलसहायकं स्वकीयं फलशून्यं स्वल्पमात्रं च तत्प्रकरीत्युच्यते। नाटकलक्षणरत्नकोशे कथ्यते यत्-

"पुष्पप्रकरवन्निहिता या शोभां जनयति सा प्रकरी"[१४] इति।

नाटकस्य एकस्मिन् अंशे वर्णितमाख्यानं हि प्रकरी। नाटके पताका तु विस्तारिता भवति परन्तु प्रकरी अल्पीभवति। एतदेव वैसादृश्यं पताकाप्रकर्योर्मध्ये। तथाहि कथितं दशरूपके-

"सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्"[१५] इति।

प्रकर्य्याः नायकस्य स्वकीयफलं न तिष्टति। प्रसूनं यथैव वेदिकाशोभायाः बर्धनं करोति तथैव प्रकरी अपि नाट्यस्य श्रीवृद्धिं करोति।

कार्यम्- पञ्चस्वर्थप्रकृतिषु अनन्यमन्तिमञ्च कार्यम्। नाटके हि यद्वस्तु अपेक्षितमाकाङ्क्षितं वा साध्यं प्रधानरूपेण प्रतिपाद्यं वर्जनीयं वा यत्सिद्ध्यै आरब्धमिदं नाटकं यत्फललाभेन चावसितं तदेव कार्यमित्युच्यते। वस्तुतः समस्तं नाटकं यावत् व्याप्तं मुख्यफलं हि कार्यम्। नाटकलक्षणरत्नकोशे कथ्यते-

"यदर्थे काव्यस्यारम्भः सिद्धे यस्मिन् समापनम्।
आनुषङ्गिकसम्पन्नं तत् कार्यमिति कथ्यते।।"[१६] इति

किन्तु दशरूपके नाटकस्य फलमेव कार्यनाम्ना अभिहितम्। सर्वेषां नाटकानां फलं हि त्रिवर्गस्य प्राप्तिः। त्रिवर्गेषु एक एव विषयो यदि कार्यं भवति तत् शुद्धकार्यं भवति। पुनः यदि त्रिवर्गेषु कार्यद्वयं कार्यत्रयं यदि स्यात्तर्हि अनुबन्धकार्यम्। तथाहि अवलोकटीकायां संकलितम्-

"धर्मार्थकामाः फलम्। तच्च शुद्धमेकैकमेकानेकानुबन्धं द्व्यनुबन्धं वा"[१७] इति।

यथा रामचरितमिति नाटके समस्तं वृत्तमाश्रित्य रावणवधप्रस्तुतिर्लक्ष्यते। अन्तिमे च रावणवधेन नाटकपरिसमाप्तिः। अतो रामचरिते रावणवधः कार्यमिति।

नाटकस्य मुख्यफलसिद्धये अर्थप्रकृतेः हेतुत्वं नितरामेव समस्तीति कृत्वा अर्थप्रकृतेः गुरुत्वमनस्वीकार्यमेव। अस्य च ज्ञानेन नाटकं यथा सुष्ठु बोधविषयत्वं गच्छति, तथैव नाटकभेदा अपि अनायासेन निर्णेतुं शक्यन्ते।

नाट्यस्य मूलमुद्देश्यं तावत् रसप्रतीतिः। यथा चरित्रायणमूलप्रयोजनकस्य शेक्सपियार्-प्रणीतस्य नाटकस्य अवगतये आवश्यिकानामङ्गानां ज्ञानमपरिहार्यम्, अन्यथा तन्नाट्यार्थावबोधः न भवति, तथैव रसप्रतीतिप्रयोजनकस्य नाटकस्य अर्थावबोधे अर्थप्रकृतिरपि भृशं गुरुत्वमावहति। अतो विना अर्थप्रकृतिज्ञानं रसप्रतीतिरपि असम्भवा इति किमु वक्तव्यम्।

**तथ्यसूत्राणि**

१. साहित्यदर्पणः (शास्त्री २०१८, पृ.- ३५१)
२. नाटकलक्षणरत्नकोश (चट्टोपाध्याय २०१७, पृ.- १७)
३. नाटकलक्षणरत्नकोश (चट्टोपाध्याय २०१७, पृ.- १७)
४. नाटकलक्षणरत्नकोश ( चट्टोपाध्याय २०१७, पृ.- १७)
५. नाटकलक्षणरत्नकोश (चट्टोपाध्याय २०१७, पृ.- १७)
६. नाटकलक्षणरत्नकोश (चट्टोपाध्याय २०१७, पृ.- १८)
७. नाटकलक्षणरत्नकोश ( चट्टोपाध्याय २०१७, पृ.- १९)
८. साहित्यदर्पणः (शास्त्री २०१८, पृ.- ३५२)
९. नाटकलक्षणरत्नकोश ( चट्टोपाध्याय २०१७, पृ.- १८)
१०. दशरूपक (वसु २०१८, पृ.- ६६)
११. नाटकलक्षणरत्नकोश (चट्टोपाध्याय २०१७, पृ.- १९)
१२. नाटशास्त्रम्( द्विवेदी१९९२, पृ.- ३२)
१३. नाटकलक्षणरत्नकोश ( चट्टोपाध्याय २०१७, पृ.- १९)
१४. नाटकलक्षणरत्नकोश ( चट्टोपाध्याय २०१७, पृ.- २०)
१५. दशरूपक ( वसु २०१८, पृ.- ६८)

१६. नाटकलक्षणरत्नकोश (चट्टोपाध्याय२०१७, पृ.- २०)
१७. दशरूपक ( वसु २०१८, पृ.- ७५)

**सहायकग्रन्थमाला**


1. धनञ्जयः,२०१८,दशरूपक,सम्पा.- डा. अनिलचन्द्र -वसुः, कोलकाता: संस्कृतवुक् डिपो।
2. भरतमुनिः,१९९२,नाट्यशास्त्रम्, सम्पा.- डा. पारसनाथद्विवेदी, वाराणसी सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
3. सागरनन्दी,२०१७,नाटकलक्षणरत्नकोश,सम्पा.- सिद्धेश्वर -चट्टोपाध्याय,कोलकाता: संस्कृत पुस्तकभाण्डारः।
4. विश्वनाथकविराजः,२०१८,साहित्यदर्पणः, सम्पा.- आचार्य्य- कृष्णमोहन- शास्त्री,वाराणसी: चोखाम्बासंस्कृतसंस्था।



Received on: 19/03/2020 Accepted on: 12/02/2021

# उपक्रमप्राबल्यन्यायेन प्रत्यक्षप्राबल्यनिरासस्य यथार्थत्वविचारः

हरिपद-शोनः

**प्रबन्धसारः**

अनेकभवभ्रमणसमासादितजातिजन्ममरणादिदोषास्तथा तद्धेयविषयविषयिणसंस्काराः मातृपितृभ्योऽप्याप्ततमेन वेदान्तशास्त्रेण प्रबलप्रमाणार्पणपूर्वकमुपमृद्यन्ते किञ्च अस्मिन्नैव शास्त्रे आत्यन्तिकाभ्युदयनिःश्रेयसजनकत्वमक्षुण्णं भवति। तच्चाद्वैतं प्रस्थानत्रयेषु भगवता शङ्कराचार्येण प्रतिष्ठापितम्। परञ्च अल्पाधीषाणाना मल्पाभ्यस्थशास्त्राणां च भ्रमवशात् तच्छास्त्रमन्यथात्वं प्राप्तम्। तस्मात्तमेव श् रीमच्छंकरोक्तमद्वैतमुपद्धलयितुं वादिमतनिरासनेन तेषां भ्रमनिराकरणाय च पण्डितप्रबरमधुसूदनसरस्वती अद्वैतसिद्धिरिति वादप्रधानं ग्रन्थं विरचयामास। ग्रन्थेऽस्मिन् व्यासतीर्थकृतन्यायामृतस्य आमूलचूडं खण्डनं विधीयते। अत्रैव न्यायामृतमिति ग्रन्थे प्रतिपादितस्य प्रत्यक्षप्राबल्यस्य खण्डनं युक्तिपूर्वकं विधाय आगमस्य प्राबल्यं प्रतिष्ठापितम्। अत्र प्रत्यक्षप्राबल्यनिरासस्य विचारपथमधिरोहन्ति पूर्वमीमांसायाः बहवो न्यायाः। तेषु एक उपक्रमप्राबल्यन्यायः। तन्न्यायसत्त्वेऽपि आगमस्यैव प्राबल्यं प्रत्यक्षापेक्षया इति प्रतिपादितस्य सिद्धान्तितस्य विषयस्य यथोपयुक्तत्वं व्याख्यानपुरःसरमस्माभिः अस्मिन्प्रबन्धे विचार्यते। वस्तुतस्तु टीकाकृद्भिः अद्वैतसिद्धिकारोक्तां युक्तिमेव प्रपञ्चितं किन्तु पूर्वमीमांसायां जैमिनिमुनिना किं तादृशी युक्तिः प्रदर्शिता? यदि नास्ति तर्हि स्वमनोमात्रकल्पितेयं युक्तिः ग्रन्थकाराणां स्यात्। अतो विषयोऽयं विचार्य एव संशयनिरासाय। तस्मादस्माभिरत्र पूर्वमीमांसोक्तसूत्राणां सामान्यव्याख्यानपुरःसरं युक्तिसद्भावं प्रदर्श्यते। प्रसंगागतं च किञ्चिदन्यदपि।

**कुञ्चिशब्दाः**

प्रत्यक्षप्राबल्यं, उपक्रमप्राबल्यन्यायः, आगमप्राबल्यम्, अद्वैतसिद्धिः, परस्परसाम्यत्वम्, अर्थवादः, विधिवाक्यम्।

**Assistant Professor, Sanskrit Department, Arambagh Girls' College.*

# उपक्रमप्राबल्यन्यायेन प्रत्यक्षप्राबल्यनिरासस्य यथार्थत्वविचारः

## 1) भूमिका:

अविद्याकामकर्मवशङ्गताः लब्धकर्तृत्वभोक्तृत्वाद्यनेकानर्थाभिमानाः संसारसागरदुःखोदकेऽसीमदुःखसहमानाः जीवाः अलातचक्रवज्जन्मजरामरणचक्रे आवर्तन्ते। तान् उद्धर्तुं मातृपितृभ्योऽपि हितैषिणी श्रुतिः **तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयते**[1] इत्यादिना कर्मचितानामनित्यफलतां प्रदर्श्य, **न च पुनरावर्तते**[2],

**अविद्यास्तमयो मोक्षो नित्यानन्दप्रतीतितः।**
**निःशेषदुःखोच्छेदाच्च पुरुषार्थः परो मतः।।**[3]

इत्यादिना पुरुषार्थचतुष्केषु परमस्य मोक्षस्यैव नित्यतां दर्शयति। अत एवामुमुपोद्बलीकृत्य परमकारुणिकैः शंकरभगवत्पादैः प्रस्थानत्रयेष्वद्वैतं प्रतिष्ठापितम्। अद्वैतग्रन्थेषु वादप्रमुखेषु श्रीमधुसूदनसरस्वतीप्रणीतः अद्वैतसिद्धिरिति ग्रन्थो मूर्धन्यचूडामणिरिववर्तते। ग्रन्थेऽस्मिन् माध्वसम्प्रदायप्रमुखव्यासतीर्थकृतस्य अद्वैतसिद्धान्तखण्डनपरस्य न्यायामृतमिति ग्रन्थस्य खण्डनं चमत्कारकारितया विहितं ग्रन्थकर्त्रा मधुसूदनसरस्वत्या। तत्रैव दृश्यते उपक्रमप्राबल्यन्यायेन प्रत्यक्षप्राबल्यस्य खण्डनम् आगमप्राबल्यस्य प्रतिष्ठापनञ्च। किन्तु मधुसूदनसरस्वती व्यासतीर्थश्च आप्तत्वेन स्वस्वसम्प्रदाये स्वीकृतत्वात् सुतरां प्रश्नः सम्भवति किं खण्डितस्य प्रत्यक्षप्राबल्यस्य यथोपयुक्तत्वमस्ति न वेति। प्रसङ्गेऽस्मिन्नस्माभिः प्रत्यक्षप्राबल्यन्यायपुरःसरं सव्याख्यानपुरःसरञ्च विचार्यते तस्य यथार्थता। वस्तुतस्तु टीकाकृद्भिः अद्वैतसिद्धिकारोक्ता युक्तिरेव प्रपञ्चिता किन्तु पूर्वमीमांसायां जैमिनिमुनिना किं तादृशी युक्तिः प्रदर्शिता? यदि नास्ति तर्हि स्वमनोमात्रकल्पितेयं युक्तिः ग्रन्थकाराणां मधुसूदनसरस्वतीमहाभागानां स्यात्। अतो विषयोऽयं विचार्य एव संशयनिरासाय। अस्माभिरत्र पूर्वमीमांसादिशा तन्न्यायः ससूत्रं सोदाहरणञ्च प्रदर्श्य विचार्यते प्रत्यक्षप्राबल्यखण्डनस्य यथार्थता।

## 2) न्यायार्थः उपक्रमप्राबल्यन्यायश्च :

यद्यपि न्यायशब्दस्यानेके अर्थाः दृश्यन्ते - तथाहि **प्रमाणैरर्थपरीक्षणम्**[4], **समस्तप्रमाणव्यापारादर्थाधिगतिर्न्यायः**[5]इत्यादयोऽथवा न्यायशब्दोऽधिकरणार्थे मीमांसादर्शने प्रसिद्धस्तथापि “नीयते प्राप्यते विवक्षितार्थसिद्धिरनेन इति न्यायः” इति न्यायशब्दव्युत्पत्त्या अनेकेषु दृश्यमानः कश्चन

1. छान्दोग्योपनिषद्-8.1.6, गीताप्रेस 2070(संवत्सरः), पृ 778।
2. छान्दोग्योपनिषद्-8.15.1, गीताप्रेस 2070(संवत्सरः), पृ 902।
3. अद्वैतसिद्धिसिद्धान्तसारः-4.27, श्रीसदानन्दव्यासः 1903, पृ 228।
4. न्यायकोषः भीमाचार्यः 1928, पृ 446।

साधारणनियम इति कथयितुं शक्यते। तथैव कश्चन न्याय उपक्रमप्राबल्यन्याय इति। अस्यार्थ उपक्रमे श्रुतार्थस्य यदि उपसंहारश्रुतार्थेन सह विरोधः सञ्जातस्तर्हि कस्तावदर्थो ग्राह्यः? इत्यस्मिन्विषये उच्यते च पूर्वाचार्यैः-

**असञ्जातविरोधित्वादर्थवादो यथाश्रुतः।**
**आस्थेयस्तद्विरुद्धस्य विध्युद्देशस्य लक्षणा।।[6]इति।**

असञ्जातविरोधित्वात्- न सञ्जातो विरोधी यस्य तत्त्वात्, यथाश्रुतः- मुख्यार्थः, आस्थेयः- स्वीकार्यः, तद्विरुद्धस्य- अर्थात् उपक्रमश्रुतार्थवादवाक्यविरुद्धोपसंहारश्रुतविधिवाक्यार्थस्य, विध्युद्देशस्य- विधिवाक्येषु स्थितस्यार्थस्य, लक्षणा- लक्षकत्वमिति शब्दार्थः। तात्पर्यं तु उपक्रमगतार्थवादवाक्येन साकमुपसंहारगतविधेर्यदि विरोधः स्यात्तर्हि विधिप्रधानत्वेऽपि अर्थवादस्यैव वाच्यार्थो ग्राह्योऽसञ्जातविरोधित्वात् विरोधिनोऽन्यार्थस्यानुत्पन्नत्वादित्यर्थः, किन्तु विधिवाक्यस्य सञ्जातविरोधित्वात् वाच्यार्थं परित्यज्य लक्षणा स्वीकर्तव्या, अर्थवादविधिवाक्ययोरेकवाक्यत्वादिति। जैमिनिन्यायमालायामप्युक्तम्-

**असञ्जातविरोधातस्तद्वशादुपसंहृतेः।**
**नयने सति वाक्येन धर्माणां वेदगामिता।।[7] इति।**

### 3) पूर्वमीमांसादिशा न्यायविस्तारः

ज्योतिष्टोमप्रकरणे एकं वाक्यं पठितं भवति- **"प्रजापतिरकामयत प्रजाः सृजेयेति। स तपोऽतप्यत। तस्मात्तपस्तेपनात् त्रयो देवा असृज्यन्त। अग्निर्वायुरादित्यः। अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेद"**[8] इति। अस्यार्थः- स्वर्गरचनायाः पूर्वं परमात्मना इच्छा कृता यत् मया प्रजाः स्रष्टव्या इति। सः प्रजापतिरूपपरमात्मना विचारपूर्वकं तपः कृतम्। ततस्तपोविशिष्टपरमात्मनः त्रयो देवा उत्पन्नाः- अग्निः, वायुः, किञ्च आदित्यः। तेऽपि तपः आचरितवन्तः। ततस्त्रयो वेदा उत्पन्नाः। अग्नेः ऋग्वेदः, वायोः यजुर्वेदः, आदित्यात् सामवेदः इति। तत्रैव उपक्रमवाक्यात्परमेकं विधिवाक्यं पठितं भवति- **"उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैः साम्ना"**[9] इति। अस्यार्थः- ऋक् तथा साममन्त्राणामुच्चैः स्वरेण उच्चारणपूर्वकं कर्म कर्तव्यं किञ्च यजुर्मन्त्राणामुपांशुस्वरेणेति।

एवंरूपवाक्यविनियोगप्रसंगः जैमिनिमुनिना तृतीयाध्यायान्तर्गतस्य तृतीयपादस्य प्रथमवेदोपक्रमाधिकरणे चिन्तितः। विधिवाक्यगत-ऋगादिपदानां ऋगादिजातिमाश्रित्य

5. न्यायकोषः भीमाचार्यः 1928, पृ 446।
6. अद्वैतसिद्धिः मधुसूदनसरस्वती 1937, पृ- 355।
7. जैमिनीयन्यायमाला3.3.3, माधवाचार्यः 1892, पृ-138।
8. ऐतरेयब्राह्मणम् 25.7।
9. जैमिनीयन्यायमाला 3.3.3, माधवाचार्यः 1892, पृ-138।

मन्त्रवाचकत्वम्। यद्यपि ऋक्त्वादेर्जातिरूपत्वाभावस्तथापि इहोपाधिपरः सन् ऋक्त्वाद्याश्रयमन्त्रेषु पर्यवस्यतीति। एवञ्च विधिवाक्यस्थ-ऋचेति ऋङ्मन्त्रेण यत्क्रियते तदुच्चैस्त्वधर्मकेन कर्तव्यमुत उपक्रमवाक्यगत-ऋग्वेदेन यत्क्रियते तदुच्चैस्त्वगुणकं कर्तव्यमिति संशयः। यद्यपि साक्षात्कर्मणि उच्चैस्त्वादीनामनन्वयस्तथापि **"आनर्थक्यतदंगन्यायेन"** ऋग्वेदविहितकर्मांगमन्त्रेषु उच्चैस्त्वं पर्यवस्यतीति आशयः।

**"उच्चैरृचा क्रियते"**इति मन्त्रवाचक-ऋगादिशब्दश्रवणेन मन्त्रधर्मत्वस्यैव निश्चयेन वेदधर्मत्वकोटेरनुन्मेषात्संदेह एवानुपपन्न इति चेन्न उपक्रमे वेदश्रवणोत्तरमुपसंहारे ऋगादिश्रवणाद्भवति संशयः। एवमपि वेदयतीति वेद इति व्युत्पत्तिमाश्रित्य वेदशब्दस्य ऋगादिमन्त्रमात्रेऽप्युपपत्तेर्भवति संशयोऽनुपपन्न इति कथयितुं न शक्यते। यतो हि नास्ति वेदस्य मन्त्रब्राह्मणान्यतरनिरपेक्षबोधकत्वम्। तदुक्तं शास्त्रदीपिकायां- **वेदशब्दो हि मन्त्रब्राह्मणसमुदायात्मनो ग्रन्थविशेषस्य वक्ता नैकस्य मन्त्रवाक्यस्य ब्राह्मणवाक्यस्य वा वाचकः, प्रयोगाभावात्। न ह्येकं द्वे त्रीणि वाक्यान्यधीत्य- वेदानधीत्य वेदौ वा वेदं वापि यथाक्रममित्येतच्छास्त्रार्थमनुष्ठितं मन्यन्ते। तस्मात्समुदायो वेदः**[10] इति। तस्माद्भवति संशयः-**"उच्चैरृचा क्रियते"**इति मन्त्रस्थ-ऋगादिशब्दस्य ऋक्त्वादिजातेः वाचकत्वमुत ऋग्वेदादिवेदपरकत्वमिति। **मुख्यं वा पूर्वचोदनाल्लोकवत्**[11] इति द्वादशाध्यायाधिकरणे मुख्यजघन्ययोर्धर्मविप्रतिषेधे सति मुख्यधर्मानुग्रहस्य उक्तत्वात् प्रकृतेऽपि तन्न्यायेन अर्थवादस्य मुख्यत्वात् स एवानुरोद्धव्य इति पूर्वपक्षाभावे प्राप्तेऽपि **गुणत्वादनुवादत्वाच्च**[12] मुख्यस्यापि अर्थवादस्यार्थविप्रकर्षे प्राप्ते कथयति पूर्वपक्षः- **श्रुतेर्जाताधिकारः स्यात्**[13] इति। उच्चैस्त्वादिधर्मः ऋक्त्वादिजातेरेव वाचकः स्यात्, कस्मात्, श्रुतेः। यतो हि ऋगादिशब्दश्रवणमात्रादेव जातेः प्रवृत्तिः। जातिरेव शब्दस्य वाच्या इति जैमिनिमुनिना प्रथमाध्यायतृतीयपादान्तिमाधिकरणे प्रतिपादिता। अतः उच्चैस्त्वोपांशुत्वं च ऋक्त्वजात्यवच्छिन्न-ऋक्त्वादिजात्यधिकारे एव स्यादर्थात् ऋक्त्वजात्यावच्छिन्न-ऋङ्मात्रमेव उच्चस्वरैः पठितव्यं किञ्च यजुष्ट्वजात्यवच्छिन्नयजुःमात्रमेव उपांशुस्वरैः पठितव्यमिति।

अपि च वेदाधिकारबोधकप्रमाणाभावादप्यत्र जातिपरकत्वमेव तेषाम्। किञ्च यद्यत्र जात्यवच्छिन्नरूपेण उच्चैस्त्वधर्माणां प्रयोगो न भवेत्तर्हि वैकल्पिकबाधोऽपि स्यात्, यतो हि वेदावच्छिन्नरूपेण उच्चैस्त्वादीनां कर्तव्यत्वे ऋग्वेदगत-ऋङ्मन्त्राणामुच्चस्वरेण पाठ्यत्वेऽपि यजुर्वेदगत-ऋङ्मन्त्रस्य उपांशुस्वरेण पठनीयत्वात् विकल्पः स्यात्, विकल्पे सति बाधः।

10. शास्त्रदीपिका पार्थसारथिमिश्रः 3.3.1।
11. जैमिनीयसूत्रम् 12.2.23।
12. गुणत्वादनुवादत्वादर्थवादस्य लक्षणा।
मुख्यस्यापि प्रधानत्वादप्राप्तविषयत्वतः।।- शास्त्रदीपिका पार्थसारथिमिश्रः 3/3/2।
13. जैमिनीयसूत्रम् 3.3.1।

किन्तु जातिपक्षे नायं दोषः, एकवर्णसमूहे द्वितीयादिजातेरभावात्। एतेनैव प्रकरणमर्यादापि रक्षिता भवेत्। कारणं हि —"**उच्चैर्ऋचा क्रियते**" इत्यादि वाक्यं ज्योतिष्टोमप्रकरणे पठितत्वात् ज्योतिष्टोमविषयक-ऋच एव धर्म इत्येव कथनमुचितमन्यथा वेदवाचकत्वे वाक्यविनियोगानुसारेण इष्टिपशुसोमादिसर्वकर्मणि अपि ऋगादीनामुच्चैस्त्वादिधर्माणां प्रसंगः स्यात्। तथा सति ज्योतिष्टोमप्रकरणे तेषां पाठो निरर्थकः प्रसज्येत। अत उच्चैस्त्वादिधर्मः ऋगादिजात्यवच्छिन्न एव न तु वेदावच्छिन्न इति। वस्तुतस्तु अर्थवादस्य विधिवाक्यं प्रति गुणीभूतत्वात् "**अंगगुणविरोधे च तादर्थ्यात्**" इति न्यायेन अर्थवादवाक्यगत-ऋग्वेदादिपदानां ऋगादिमन्त्रलक्षणापरकत्वम्, न तु विधिवाक्यगतऋगादिपदानां वेदपरता इति।

एवं पूर्वपक्षे प्राप्ते सिद्धान्तिनामभिप्रायबोधकं सूत्रम्- **वेदो वा प्रायदर्शनात्**[14] इति। वेति पूर्वपक्षखण्डनार्थम्। वेदो नाम "**उच्चैर्ऋचा क्रियते**" इत्यादि विधिवाक्यस्थ-ऋगादिपदैः वेद एव बोध्यते, किमर्थमिति चेत् उच्यते प्रायदर्शनात्। अर्थात् वाक्योपक्रमे वेदशब्दोल्लेखो दृश्यते। तथाहि- "**उच्चैर्ऋचा क्रियते**" "**प्रजापतिरकामयत प्रजाः सृजेयेति। स तपोऽतप्यत। तस्मात्तपस्तेपनात् त्रयो देवा असृज्यन्त। अग्निर्वायुरादित्यः। ते तपोऽतप्यन्त। तेभ्यस्तेपानेभ्यो वेदा असृज्यन्त। अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः**" इति। एवं प्रकारेण उपक्रमे साक्षाद्वेदशब्दप्रयोगात् उपसंहारगतविधिवाक्यस्थ-ऋगादिपदानामपि वेदबोधकत्वं न तु मन्त्रबोधकत्वमिति। अतः सिद्धमेतत् विधिवाक्ये श्रूयमाणोच्चैस्त्वादिधर्मः ऋक्त्वादिजात्यवच्छिन्नो नास्ति अपि तु ऋग्वेदादिधर्मावच्छिन्न एव।

वस्तुतो न केवलमुपक्रमवाक्ये वेदशब्दश्रवणमात्रादेव ऋगादिपदानां वेदपरता किन्तु असञ्जातिविरोधित्वादिति परं प्रतिपादयिष्यते।

अपि च "**लिङ्गाच्च**"[15] इत्यादिभिः "**वेदसंयोगान्न प्रकरणेन बाध्येत**"[16] इत्यन्तैः सूत्रैः महामुनिजैमिनिना ऋगादिपदानां वेदादिधर्मावच्छिन्नत्वमेव इति स्वग्रन्थे प्रतिष्ठापितम्।

### 4)- न्यायामृताकारैः व्यासतीर्थचार्यैः प्रत्यक्षप्राबल्यस्य प्रतिष्ठापनम्-

एवं जैमिनिसिद्धान्तमाश्रित्य माध्वचूडामणिव्यासतीर्थैः न्यायामृतमिति ग्रन्थे प्रत्यक्षस्य प्राबल्यं प्रतिष्ठापयितुं यत्यते। पूर्वमीमांसायां यथा उपक्रमे पठितत्वात् असञ्जातविरोधिनः वाक्यस्य प्राबल्यं प्रतिष्ठापितमेवमेव प्रकृते अपि प्रत्यक्षस्य प्रथमोत्पन्नत्वात् असञ्जातविरोधित्वम्, आगमस्य च परोत्पन्नत्वात् सञ्जातविरोधित्वम्। अतः प्रत्यक्षमेव प्रबलमागमापेक्षया। तथा सति

14. जैमिनीयसूत्रम्- 3.3.2।
15. जैमिनीयसूत्रम् 3.3.3।
16. जैमिनीयसूत्रम् 3.3.8।

प्रत्यक्षस्य "सन् घटः" इत्यस्य प्रबलत्वात् आगमस्य "**नेह नानास्ति किञ्चन**" इत्यस्य दुर्बलत्वात् प्रत्यक्षेण आगमस्य बाधो युक्तः। अतो न अद्वैतसिद्धिः।

अपि च प्रत्यक्षमेव प्रबलं श्रुत्यपेक्षया, शीघ्रार्थबोधकत्वात्। आगमस्य च प्रत्यक्षाश्रितार्थबोधकत्वात् मन्दगत्या अर्थबोधकत्वम्। अतो दुर्बल आगमः। यथा लिंगापेक्षया श्रुतेः प्रबलत्वम्। लिंगेण श्रुतेः अनुमानान्तरं भवति अंगबोधकता किन्तु श्रुतिः कस्यचिदपेक्षां विनैव साक्षात् अंगं बोधयति अतः मन्दगतिलिंगापेक्षया शीघ्रगामिश्रुतिः प्रबला। तथैव प्रत्यक्षस्यापि शीघ्रगामित्वात् अद्वैतागमापेक्षया प्रबलत्वम्। पार्थसारथिमिश्रेणापि अमुमर्थमुपोद्बलयति-

**"प्रत्यक्षे चानुमाने च यथा लोके बलाबलम्।**
**शीघ्रमन्थरगामित्वात्तथेह श्रुतिलिंगयोः।।"[17]इति।।**

5)- **अद्वैतसिद्धिकारैः**

**आगमप्राबल्यस्य प्रतिष्ठापनम्**-गुणीभूतस्याप्यर्थवादस्य उपक्रमस्थत्वेनासञ्जात विरोधित्वात् स्वार्थत्यागहेत्वभावाच्च मुख्यार्थ एव किन्तु उपसंहारस्थविधिवाक्यस्यापि सञ्जातविरोधित्वात् स्वार्थत्यागः। अत एव नात्र अङ्गगुणविरोधन्यायस्यावतारः। विध्यर्थवादयोः एकवाक्यत्वतात्पर्यात् उभयोः विरुद्धार्थस्य स्थातुमशक्यम्। यथा- चैत्रस्तपस्वी चैत्रः पूज्यतामित्यादौ हि चैत्रे प्राशस्त्यज्ञानात्तत्कर्मकपूजायामपि प्राशस्त्यज्ञानेन प्रवृत्तिः। प्रथमचैत्रपदस्थले मैत्रपदघटितोक्तवाक्ये तु उक्तज्ञानाभावेनाप्रवर्तकत्वेन नैकवाक्यता इति लघुचन्द्रिकायामुक्तम्।

वस्तुतस्तु प्रकृते प्रत्यक्षागमयोर्बलाबलप्रसंगे उक्तन्यायावतार एकेषां भ्रममात्रमेव। सर्वेषामपि न्यायानामस्ति कश्चित् नियामकः। उपक्रमप्राबल्यन्यायस्यापि नियामकसद्भावाद् तेषामयमाक्षेपोऽज्ञानमात्रमेव। यदि नियामकाभावे केवलं उपक्रमपठितत्वे असञ्जातविरोधित्वात् उपसंहारपठितसञ्जातविरोधिवाक्यापेक्षया प्राबल्यं निश्चीयेत तर्हि "शुक्तौ इदं रजतमि"ति भ्रमज्ञानस्यापि बाधो न स्यात्। तथा हि- शुक्तौ "इदं रजतमि"ति ज्ञानं प्रथममुत्पद्यते, अनन्तरं चाप्तोपदेशात् "नेदं रजतं किन्तु शुक्तिरेव" इति सम्यग्ज्ञानं जायते। अत्र प्रथमोत्पन्नत्वादसञ्जातविरोधित्वाच्च भ्रमज्ञानस्यैव यदि प्राबल्यं स्वीक्रियेत तर्हि सम्यग्ज्ञानेन परोत्पन्नेन दुर्बलेन तस्य बाधो न स्यात् प्रत्युतो बाधो भवतीति दृश्यते। अतो न केवलं प्रथमोत्पन्नत्वादेव प्रबलम्। किं तर्हि। उच्यते- "**एकवाक्यस्थपरस्परसापेक्षपदत्वेन उभयोः साम्ये सति**"[18] इति। साम्ये प्रमाणत्वेन निश्चितत्वे। साम्यत्वे हेतुमाह परस्परसापेक्षपदत्वेनेति अर्थात् एकप्रमाजनने अन्योन्यसापेक्षपदत्वेन इति। अत्रापि

17. शास्त्रदीपिका पार्थसारथिमिश्रः 3.3.1।
18. अद्वैतसिद्धिः मधुसूदनसरस्वती 1937, पृ- 356।

हेतुः एकवाक्यस्थेति। एवञ्च समग्रस्यार्थो भवति- एकवाक्यस्थत्वे सति प्रमाणत्वेन निश्चितत्वे सति एकप्रमाजनने अन्योन्यसापेक्षपदयोर्मध्ये यदि विरोधः स्यात्तर्हि अस्य न्यायस्यावतारः। एवं कथयितुं शक्यते- "यत्र यत्र उभयसाम्यत्वं तत्र तत्र असञ्जातविरोधित्वम्" इति। प्रकृते तु प्रत्यक्षागमयोर्मध्ये साम्याभावात् नास्य न्यायस्यावतारः। उभयोः परस्परापेक्षाभावात्। आगमे तु भ्रमविलक्षणत्वेन निश्चितप्रमाजनकत्वं सिद्धं किन्तु प्रत्यक्षे भ्रमविलक्षणत्वेन निश्चितप्रमाजनकत्वं न एतावता सिद्धम्[19]। अतः श्रुत्यपेक्षया न्यूनबलत्वं प्रत्यक्षस्य। तस्मात् सिद्धमेतत् "नेह नानास्ति किञ्चन" इति श्रुतिः प्रबला। प्रबलत्वात् "सन् घटः" इति प्रत्यक्षस्य बाधकम्। अतोऽद्वैतसिद्धिरिति।

यदुक्तं व्यासतीर्थाचार्यैः शीघ्रमन्थरगामित्वन्यायेन प्रत्यक्षस्यैव प्राबल्यमिति, तन्न। एतेनैव निश्चितप्रमाजनकत्वहेतुनैव आगमस्यैव प्राबल्यं मन्थरगामिनोऽपि। अर्थात् निश्चायकमानान्तर सापेक्षत्वप्रयुक्तविलम्बफलकरूपमन्थरगामिनोऽपि आगमस्य निश्चितप्रमाजनकत्वं सिद्धं किन्तु प्रत्यक्षस्य निश्चितप्रमाजनकत्वे प्रमाणाभावादागमस्यैव प्राबल्यम्। अतो "नेह नानास्ति किञ्चन" इति श्रुतेरेव प्राबल्यं प्रत्यक्षापेक्षया।

अत्रेदं चिन्त्यते- अद्वैतसिद्धिकारैः अन्येषां व्यासतीर्थाद्याचार्याणां मतं निराकर्तुं "एकवाक्यस्थपरस्परसापेक्षपदत्वेन उभयोः साम्ये सति" इति नियामकेन न्यायसंकोचः कृतः। किन्तु जैमिनिमहर्षिभिः कृतेषु वेदोपक्रमाधिकरणसूत्रेषु नियामकोऽयं दृश्यते न वेति द्रष्टव्यं भवति। तथाहि सूत्राणि- "श्रुतेर्जाताधिकारः स्यात्", "वेदो वा प्रायदर्शनात्", "लिङ्गाच्च", "धर्मोपदेशाच्च न हि द्रव्येण संबन्धः"[20], "त्रयीविद्याख्या च तद्विदि"[21], "व्यतिक्रमे यथाश्रुतीति चेत्"[22], "न सर्वस्मिन्निवेशात्"[23], "वेदसंयोगान्न प्रकरणेन बाध्येत"[24]इति। एषु आद्ययोरर्थो दृष्टः। अन्येषां तावत्सामान्यार्थो भवति-

### 6)-वेदोपक्रमाधिकरणसूत्रार्थः-

6.1)-**लिंगाच्च**- "ऋग्भिः प्रातर्दिवि देव ईयते यजुर्वेदेन तिष्ठति मध्ये अह्नः। सामवेदेनास्तमये महीयते वेदैरशून्यैस्त्रिभिरेत सूर्यः" इति लिंगं ज्ञापकवेदवचनं दृश्यते, अतः ऋगादिशब्दो वेदबोधक एव।

6.2)-**धर्मोपदेशाच्च न हि द्रव्येण संबन्धः**- धर्मोपदेशात् अर्थात् "**उच्चैरृचा क्रियते**" इत्यादिमन्त्रे "**उच्चैः साम्ना**"इति सामस्य उच्चैस्तधर्म पठितः। यदि ऋक्पदस्यार्थो ऋक्त्वजातिरेव स्यात्तर्हि साम्नः

19. अद्वैतसिद्धिः मधुसूदनसरस्वती 1937, पृ- 356।
20. जैमिनीयसूत्रम् 3.3.4।
21. जैमिनीयसूत्रम् 3.3.5।
22. जैमिनीयसूत्रम् 3.3.6।
23. जैमिनीयसूत्रम् 3.3.7।
24. जैमिनीयसूत्रम् 3.3.8।

पुनः कथनं निरर्थकं स्यात् साम्नः ऋगभिन्नत्वात्, ऋगेव गेयमानं साम इति उच्यते। अपि च न हि द्रव्येण संबन्धः अस्यार्थः- कुतूहलवृत्त्यनुसारं सामवेदीयस्य ऋचः द्रव्यशब्दभाजो भवन्ति। यदि जाताधिकारः स्यात्तर्हि ऋच उच्चैस्तेन साम्न उच्चैस्त्वस्य सिद्धत्वादपि नास्य सामद्रव्येण सह संबन्धो वेदितव्यः। तस्मादपि ऋगादिपदानां वेदाधिकार एव।

6.3)-**त्रयीविद्याख्या च तद्विदि**- त्रयी यस्य विद्या स त्रयीविद्यः। यस्त्रीन् वेदानधीते स एव त्रयीविद्यः। यदि च ऋगादिपदानां जाताधिकारः स्यात्तर्हि त्रयाणां वेदानां यो वेत्ता, तस्य बोधो न भवेत् । तस्मादपि वेदाधिकार एव।

6.4)-**व्यतिक्रमे यथाश्रुतीति चेत्**- आभाससूत्रमिदम्। अस्यार्थः- व्यतिक्रमे अर्थात् ऋग्वेदस्थाने यजुर्वेदः, किञ्च यजुर्वेदस्थाने ऋग्वेदो यदि तर्हि यथाश्रुति ऋचः उच्चस्वरैः पाठ इति चेत्? इति यदि आशङ्का स्यात्....

6.5)-**न सर्वस्मिन्निवेशात्**- नायं दोषः। सर्वस्मिन्निवेशात् सर्वत्र यजुर्वेदत्वावच्छिन्ने मन्त्रे उपांशुत्वादिधर्म निवेशादिति।

6.6)-**वेदसंयोगान्न प्रकरणेन बाध्येत**- प्रथमेन सूत्रेण या प्रकरणासंगतिः उक्ता सा न भवति वेदाधिकारे, वेदसंयोगात् अर्थात् उपक्रमे वेदेन संबन्धसत्त्वात्। अतोऽनाकूलमिदं वेदाधिकार इति।

### 7) विचारः-

एवं सामान्यार्थे दृष्टे ज्ञायते यत् सूत्रेषु "एकवाक्यस्थपरस्परसापेक्षपदत्वेन उभयोः साम्ये सति" इति नियामकन्यायसंकोचाभावात् स्वमतिकल्पितमद्वैतसिद्धिकारमतमिति। तथाहि उपक्रमोपसंहारयोः विरोधे सति एकस्य बाधो युक्त एव, किन्तु कस्येति संशये उदिते एवं ज्ञातव्यं यस्मात् अर्थवादापेक्षया विधिवाक्यस्य प्रबलत्वमत उपक्रमस्थितार्थवादादुपसंहारस्थितविधिवाक्यान्यथात्वस्य अर्थात् प्रकृते ऋगादिपदानां वेदपरकलक्षणायाः असम्भवात् उपसंहारस्थितविधिवाक्यगत-ऋगादिपदानुरोधेन उपक्रमस्थार्थवादवाक्यगत-ऋग्वेदादिपदानां मन्त्रपरकलक्षणा एव युक्ता। कुत इति चेत् पूर्ववर्त्युपक्रमवाक्यजन्यज्ञानं यदा उत्पद्यते तदा परवर्त्युपसंहारवाक्यजन्यज्ञानं नोत्पद्यते, अतः पूर्ववर्तिवाक्यजन्यज्ञानस्य विरोधिज्ञानाभावात् निर्बिघ्नेन स्वरूपलाभो भवति किन्तु परवर्तिवाक्यजन्यज्ञानं न असञ्जातविरोधि तस्य विरोधिनः पूर्वज्ञानस्य सत्त्वात्। अतस्तस्य पूर्वज्ञानस्य बाधं विना परवर्तिवाक्यज्ञानस्य उत्पत्तिरेव न भविष्यति। तस्माद्विरोधे परवर्त्युपसंहारवाक्यजन्यज्ञानं पूर्ववर्त्युपक्रमवाक्यजन्यज्ञानं बाधते इति युक्तम्। तस्मादेव बलाबलाधिकारवार्तिके उक्तं कुमारिलभट्टपादैः-

**"पूर्वं परमजातत्वादबाधित्वैव जायते।**
**परस्यानन्यथोत्पादान्न त्वबाधेन सम्भवः॥"[25]इति॥**

अर्थात् पूर्ववर्तिज्ञानकाले परवर्तिज्ञानं नोत्पद्यते, अतः तस्य बाधप्रसंगो नोत्पद्यते एव, किन्तु पूर्ववर्तिज्ञानस्य बाधं विना परवर्तिज्ञानस्योत्पत्तिः केनचित् अन्येन प्रकारेण भवितुं नार्हति। तस्मात्पूर्ववर्तिज्ञानं बाधित्वैव परवर्तिज्ञानं जायते। सूत्रकारेणापि जैमिनिमुनिना उक्तं- **"पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्"**[26]इति। पौर्वापर्ये सति पूर्वस्य दुर्बलत्वं भवति यथा प्रकृतिभूतकर्मक्लृप्तोपकारककुशविषयकशास्त्रं विकृतिभूतकर्मकल्प्योपकारकशरविषयकशास्त्रेण बाधितं भवति। अत उपक्रमवाक्यापेक्षया उपसंहारवाक्यस्यैव प्राबल्यम्। तथापि केवलस्य पौर्वापर्यस्य सत्त्वे सति पूर्वज्ञानस्य दुर्बलत्वं परस्य च प्रबलत्वमिति वक्तुं न शक्यते यतो हि तस्यैव जैमिनिमुनेः अपरमेकं सूत्रं भवति- **"श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यम्"**[27]इति। अर्थात् पौर्वापर्ये श्रुतिलिंगादीनां परस्य दुर्बलत्वं पूर्वापेक्षया इति ख्यापितत्वात् उभयोः सूत्रयोः परस्परविरुद्धार्थत्वात् अप्रामाणिकत्वं प्रसज्येत किन्तु यत्र परवर्तिज्ञानं पूर्ववर्तिज्ञानसापेक्षं न भवति तत्र पूर्ववर्तिज्ञानं परवर्तिज्ञानेन बाध्यते इति युक्तम्। तस्मादेव भामतीकारैः वाचस्पतिमिश्रैः उक्तम्-

**"पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयते।**
**अन्योऽन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्॥"इति॥**

अस्यार्थो यत्र ज्ञानद्वयं परस्परनिरपेक्षभावेन उत्पद्यते तत्र पूर्वापेक्षया परस्य बलीयस्त्वे सत्यपि यत्र परवर्तिज्ञानं पूर्वज्ञानसापेक्षं भवति तत्र परवर्तिज्ञानं पूर्वज्ञानस्य बाधकं न भवति परवर्तिज्ञानस्य पूर्वाज्ञानानुरूपेण स्वरूपलाभत्वात्। इत्येव सूत्रयोः तात्पर्यार्थ इति बोध्यम्।

अपि च उपक्रमवाक्यार्थवादः किञ्च उपसंहारवाक्यविधित्वादुभयोर्विरोधे सति परवर्तिन एव प्राबल्यमिति वक्तुं न युक्तं, कारणं हि यत्र अर्थवादो विध्युद्देश्यस्य परं श्रूयते तत्रैव विधिवाक्यजन्यज्ञानं प्रबलं भवति किञ्च अर्थवादवाक्यजन्यज्ञानं दुर्बलं भवति। किन्तु यत्र अर्थवादवाक्यं विध्युद्देश्यस्य पूर्वमेव श्रुयते तत्र विध्यपेक्षया दुर्बलं न भवतीति। अर्थवादापेक्षया विधिवाक्यस्य प्रबलत्वमित्यस्यायमेवार्थो भवति यत् यो विधेयो भवति स एव प्रबलो न तु सम्पूर्णं विधिवाक्यमर्थवादापेक्षया प्रबलमिति। यतो हि अर्थज्ञानविषये अर्थवादविधिवाक्ययोः तुल्यबलत्वम्। भेदस्तु अयमेव अर्थवादस्य विधायकता न भवति किन्तु विधिवाक्यस्य भवति। अतोऽर्थवादो विधेयांशसापेक्षत्वात् तदपेक्षया दुर्बल इति।

---

25. श्रीमज्जैमिनिप्रणीते मीमांसादर्शने 1930, तन्त्रवार्तिकम् पृ- 859।
26. जैमिनीयसूत्रम् 6.5.54।
27. जैमिनीयसूत्रम् 3.0.14।

तस्मात् उपक्रमोपसंहारयोः विरोधे उपसंहारस्यैव प्राबल्यमिति वक्तुं न शक्यते। कारणं हि उपक्रमोपसंहारयोरेकवाक्यत्वं सर्वत्र अभिप्रेतम्। अन्यथा एकविषयस्य आरम्भनात्परमन्यस्य विषयस्योपसंहारे असंबन्धप्रलापितत्वं स्यात्। उभयोरेकवाक्यतातात्पर्यत्वेऽपि उपक्रमस्य बाधो न भवति, उपक्रमवाक्यस्यासञ्जातविरोधित्वादिति। एवञ्च प्रकृते प्रत्यक्षागमयोर्मध्ये एतादृशसम्बन्धाभावात् नात्रासञ्जातविरोधिन्यायेन प्रत्यक्षस्य प्राबल्यम्।

अपि च अद्वैतसिद्धिकारैरपि युक्तिः प्रदर्शिता- केवलमुपक्रमस्यासञ्जातविरोधित्वे यदि प्राबल्यं तर्हि इदं रजतमिति भ्रमज्ञानस्य बाधो न भवतीति।

अतो वक्तव्यमेवास्माभिरपि- "यत्र यत्र उभयसाम्यत्वं तत्र तत्र असञ्जातविरोधित्वम्" इति।

एवञ्च प्रकृते प्रत्यक्षागमयोर्मध्ये नास्ति किञ्चिदपि साम्यत्वम्। अतोऽसञ्जातविरोधित्वेऽपि नास्य "सन् घटः" इति प्रत्यक्षस्य "नेह नानास्ति किञ्चन" इति श्रुत्यपेक्षया प्रबलत्वम्। प्रत्युतः श्रुतेरेव परीक्षितप्रामाण्यत्वात् प्रबलत्वम्। अतो बाधित्वैव द्वैतजातं भवति अद्वैतसिद्धिरिति।

ननु जैमिनीयसूत्रेषु न दृश्यते इति चेन्न अर्थतः प्राप्तत्वात्, कुमारिलभट्टपादैः प्रतिपादितत्वाच्च एवं परस्परसाम्यत्वरूपन्यायनियामकोक्तिः ग्रन्थकारस्य न स्वमतकल्पनमिति ज्ञातुं शक्यते। यथा च अर्थप्राप्तत्वादेव यवागुपाकस्य पाठतः परत्वेऽपि यवागुपाकानन्तरमेव अग्निहोत्रयागानुष्ठानम्। एवमेव प्रकृतेऽपि अर्थतः सिद्धत्वात् परस्परसाम्यत्वरूपनियामकः कल्पनीय एव।

न च अर्थप्रमाणस्य अर्थापत्तेर्वा स्वमतासिद्धतामात्रेण नियामकोऽयमप्रामाणीभूत इति वक्तुं शक्यते। अन्येषामपि मीमांसकानां सिद्धत्वात्। एवं न भवति चेत् अन्यथाख्यातिवादिभिः केनचिद्धेतुना इदं रजतमिति भ्रमज्ञानस्य पुरोवर्तिरजतविषयकत्वमिति साधिते वेदान्तमते तस्य अनिर्वचनीयत्वसिद्धत्वात् सिद्धसाधनमिति दोषदाने नास्माकं नये सिद्धसाधत्वमिति कथनमात्रेण ते अन्यथाख्यातिवादिनः चरितार्थाः भवेयुरिति प्रत्यक्तत्त्वप्रदीपिकायां चित्सुखाचार्येण प्रतिपादितम्। यद्यपि तत्र पूर्वपक्षरीत्या इदं वचनं तथापि नात्र वैषम्यं भजते इत्यलमति विस्तारेण।

**उपसंहारः**

एवं व्यासतीर्थचार्यमतमद्वैतसिद्धिकारमतं च पर्यालोच्येदमस्माभिः ज्ञातुं शक्यते आगमस्यैव प्रत्यक्षापेक्षया प्राबल्यमिति। यद्यपि व्यासतीर्थाचार्यैः प्रत्यक्षस्यैव प्राबल्यं प्रतिष्ठापयितुं नानायूक्तयः दर्शितास्तथापि ते युक्त्याभासा एव इति अद्वैतसिद्धिकारमतपर्यालोचनेन स्पष्टं ज्ञायते। तस्मादनाकूलमिदं प्रत्यक्षप्राबल्यखण्डनं ग्रन्थकारस्येति शिवम्।

॥ ग्रन्थसंदर्भसूची (BIBLIOGRAPHY) ॥

1) छान्दोग्योपनिषद् (सानुवाद शांकरभाष्यसहित). 2070(संवत्सरः). गोरखपुर: गीताप्रेस.
2) जैमिनिः.2041(विक्रमाब्दः). मीमांसादर्शनम् (शाबरभाष्यं, न्यायसुधा, तन्त्रवार्तिकं, भाष्यविवरणं, भाष्यभावप्रकाशिका). सम्पादकः. श्रीमहाप्रभुलालगोस्वामी. वाराणसी:तारा बुक एजेंसी.
3) जैमिनिः.1930. श्रीमज्जैमिनिप्रणीते मीमांसादर्शने (द्वितीयाध्यायद्वितीयपादमारभ्यतृतीयाध्यायपञ्चमपादान्ता द्वितीयभागस्य पूर्वार्धः). सम्पादकः. विनायक गणेश आपटे. पुणा: आनन्दाश्रममुद्रणालयः.
4) झालाकिकरः, भीमाचार्यः. 1928. न्यायकोशः(सकलशास्त्रोपकारकन्यायादिशास्त्रीयपदार्थप्रकाशकः). सम्पादकः- अभ्यंकरोपाह्न-वासुदेवशास्त्री. मुम्बाइ: निर्णयसागरमुद्रणालयः.
5) माधवाचार्यः. 1892. जैमिनीयन्यायमाला(मीमांसाधिकरणन्यायमाला). सम्पादकः चिमणाजी आपटे. पुणे : आनन्दाश्रममुद्रणालयः.
6) मधुसूदनसरस्वती. 2005. अद्वैतसिद्धिः (विठ्ठलेशीयव्याख्योपबृंहितगौडब्रह्मानन्दीव्याख्या, सिद्धिव्याख्या, न्यायामृताद्वैतसिद्धितरङ्गिणी, लघुचन्द्रिका). सम्पादकः. अनन्तकृष्णशास्त्री. दिल्ली: परिमल पब्लिकेशन्स.
7) मधुसूदनसरस्वती.2007.अद्वैतसिद्धिः(सत्यानन्दप्रबोधिका).सम्पादकः.स्वामिविशुद्धानन्दगिरिः. पहाडी बाजारः, कनखलः, हरिद्वारः(उत्तराखण्डः):श्रीगोकुलधामः पुजारीगली(नयाघाट).
8) मधुसूदनसरस्वती. 1937. अद्वैतसिद्धिः (विठ्ठलेशीयव्याख्योपबृंहितगौडब्रह्मानन्दीव्याख्यासनाथीकृता-बलभद्रप्रणीतसिद्धिव्याख्या-अनन्तकृष्णशास्त्रिसंगीतन्यायामृताद्वैतसिद्धि-तरंगिणी-लघुचन्द्रिकासंग्रहात्मकचतुर्ग्रन्थालंकृता च).सम्पादकः.अनन्तकृष्णशास्त्री.मुम्बाइ:निर्णयसागरमुद्रणालयः.
9) मिश्रः,पार्थसारथी. 2003. शास्त्रदीपिका (जैमिनीयन्यायमाला, मयूखमालिका). सम्पादकः. झोपाख्यः धर्मदत्तः(बच्चाझा). वाराणसी:चौखम्बा-कृष्णदास -अकादमी.
10) व्यासतीर्थयतिः किञ्च मधुसूदनसरस्वती. 2002. न्यायामृताद्वैतसिद्धी. सम्पादकः. स्वामियोगिन्द्रानन्दः. वाराणसी:चौखम्बा-विद्याभवनम्.
11) सदानन्दव्यासः. 1903. अद्वैतसिद्धिसिद्धान्तसारः. सम्पादकः. हरिदासगुप्तः. काशी: विद्याविलास.

Received on: 01/03/2020 Accepted on: 11/02/2021

# सरस्वतीकण्ठाभरणमर्मोद्घाटिनी हृदयहारिणी

कृष्णगोपाल-पात्रः

**शोधसारः**

भोजव्याकरणपरम्परायां मुख्यो ग्रन्थो हि सरस्वतीकण्ठाभरणम्। पाणिनीयं चान्द्रं च व्याकरणं भोजव्याकरणस्य मूलभूतम्। एवमपि भोजव्याकरणे मौलिकत्वं विद्यते न वा, अथवा भोजः केवलं चान्द्रं पाणिनीयं च व्याकरणं यथावत् समादाय काञ्चित् भिन्नां परम्परां प्रवर्तयामास इति अत्र प्रबन्धे यथामति वितन्यते। बहून् ग्रन्थानालोड्य एकेनैव टीकाग्रन्थेन कृत्स्नमपि तत्त्वं सङ्ग्रहीतुं सरस्वतीकण्ठाभरणटीकाकर्तुः दण्डनाथस्य हृदयहारिणीप्रणयनरूपः प्रयासः। व्याख्यायामस्यां व्याख्यान्तराणां ग्रन्थान्तराणां वा कीदृशः प्रभावो वर्तते तदत्र विचार्यते। ग्रन्थस्यास्य टीकायाः हृदयहारिणी इति नामकरणे किमपि स्वारस्यं विद्यते न वा इत्यपि विमृश्यते। सरस्वतीकण्ठाभरणस्य व्याख्यान्तरसद्भावे हृदयहारिणी किमपि प्रमाणं दर्शयति वेति विवेच्यते। एतट्टीकाकरणे टीकाकर्तुः किमुद्देश्यम्? कथं वेदं व्याख्यानं मूलग्रन्थाध्ययने साहाय्यमाचरति तदपि मीमांस्यते। कथं वा व्याख्याग्रन्थोऽयं भोजव्याकरणपरम्परायाः सम्वर्धक इति प्रतिपाद्यते। अष्टाध्यायीपरम्परायां यथा पाणिनिसूत्राणां नैकाः टीकाः समुपलभ्यन्ते तद्वत् अस्यां व्याकरणपरम्परायां नैव, सरस्वतीकण्ठाभरणव्याकरणस्योपलभ्यमाना अद्वितीया टीका हि हृदयहारिणी। एवं व्याख्याशतैरुपबृंहितानां पाणिनीयसूत्राणां यथा प्रतिष्ठा तद्वत् प्रतिष्ठा हृदयहारिणीसमेतानां एतद्व्याकरणसूत्राणां विद्यते न वेति वितन्यते। आकारेण एवञ्च विषयबाहुल्येनाप्ययं व्याख्याग्रन्थोऽत्यन्तं समादृतः। अत्र कीदृशी शैली समादृता, भाषाप्रयोगः वा कीदृश इत्यादयः विषयाः यथायथं विवेचयिष्यते। सरस्वतीकण्ठाभरणव्याकरणस्य तट्टीकासम्पदः तदभिनवत्वं वैशिष्ट्यं च किं व्याख्यान्तरात् तत्सर्वमत्र प्रबन्धे प्रस्तूयते।

**कूटशब्दाः-**

भोजः, सरस्वतीकण्ठाभरणम्, हृदयहारिणी, दण्डनाथः।

---

**Ph.D Scholar, Department of Sanskrit & Philosophy.*
*Ramakrishna Mission Vivekananda Educational & Research Institute.*

## भूमिका

सुविस्तृतं खल्विदं वाङ्मयम्, तत्र च वेदस्य महिमा सर्वजनविदितः। वेदार्थावबोधे च षडङ्गानि नूनम् आवश्यकानि। तेषु षडङ्गेषु च प्रधानं व्याकरणम्। अतः वेदस्य सम्यग्ज्ञानार्थं रक्षार्थं च अत्यावशकं व्याकरणम्। 'मुखं व्याकरणं स्मृतम्' इति वचनादपि व्याकरणस्य सर्वशास्त्रमुख्यत्वं संसूच्यते। यद्यपि अष्टौ व्याकरणानि सुप्रसिद्धानि वैयाकरणनिकाये, तत्रापि सत्सु नैकविधेषु व्याकरणेषु पाणिनीयव्याकरणं सर्वाण्यपि अतिशेते। प्रचारे प्रसारे च तत्समं नास्ति किमपि व्याकरणम्। परं पाणिनीयव्याकरणस्य एवंविधप्रचारे सत्यपि पाणिनीयेतरव्याकरणानि अपि तदा तदा व्यरच्यन्त। तेषु नृपस्य भोजदेवस्य सरस्वतीकण्ठाभरणव्याकरणम् अत्यन्तं प्रसिद्धम्। यद्यपि भोजराजस्य व्याकरणस्य मूलभूतं हि पाणिनीयं चान्द्रं च व्याकरणं, तथापि तत्र तस्य मौलिकत्वं भृशम् अवाप्यते।

## सरस्वतीकण्ठाभरणम्

संस्कृतभाषायाः शास्त्राणां च समुद्धारकस्य भोजराजस्य राज्ये संस्कृतस्य महान् आदरः आसीत्। नैके ग्रन्थाः भोजराजेन प्रणीताः। तेषु शृङ्गारप्रकाशसरस्वतीकण्ठाभरणप्रभृत यो ग्रन्थाः अत्यन्तं प्रसिद्धाः। सरस्वतीकण्ठाभरणमिति नाम्ना तस्य ग्रन्थद्वयं सुप्रसिद्धम्। एकं तु अलङ्कारशास्त्रे, परं च व्याकरणशास्त्रे। सरस्वतीकण्ठाभरणम् इति व्याकरणग्रन्थं निर्माय तेन खलु विशिष्टा दिक् प्रादर्शि। प्रचलितम् अष्टाध्यायीनियमम् उल्लङ्घ्य अपि तेन केचन विलक्षणाः नियमाः प्रदर्शिताः। यथा पाणिनिना अष्टाध्यायी विरचिता तद्वत् भोजराजेनापि सरस्वतीकण्ठाभरणम् इति पृथक् एकं व्याकरणं निर्मितम्। अत्रापि अष्टौ अध्यायाः, प्रत्यध्यायं च चत्वारः पादा, आहत्य द्वात्रिंशत् पादाः विलसन्ति। अत्र आद्येषु सप्ताध्यायेषु लौकिकशब्दानां विवरणं दृश्यते, तदनु अष्टमे अध्याये तावत् स्वरवैदिकप्रक्रियायाः विवरणं समुपलभ्यते। तथाहि अस्य ग्रन्थस्य प्रथमं सूत्रं तावत् "सिद्धिः क्रियादेः लोकात्"[1] इति। प्रथमाध्यायस्य प्रथमपादे हि संज्ञासूत्राणि उपन्यस्तानि। तत्र प्रायः भोजराजेन अशीत्यधिकाः संज्ञाः प्रतिपादिताः। सर्वाण्यपि संज्ञासूत्राणि अत्रैव प्रथमाध्यायस्य प्रथमपादे विराजन्ते। ततः द्वितीयपादे परिभाषासूत्राणि प्रतिपादितानि। पाणिनिविरचितानि कानिचन संज्ञासूत्राण्यपि अत्र परिभाषात्वेन कल्पितानि। तृतीयपादे च धातुभ्यः विहिताः प्रत्ययाः समुपवर्णिताः। चतुर्थपादेऽपि प्रत्ययाः विहिताः विद्यन्ते। तत्र च पुनः लकारसम्बद्धं कार्यम् उपवर्णितम्। द्वितीयाध्यायस्य प्रथमे द्वितीये तृतीये च पादे उणादिप्रत्ययाः विहिताः, ततश्च चतुर्थे पादे केचन प्रत्ययाः पुनश्च लकाराः विहिताः।

1. भोजसूत्रम्-१/१/१।

तृतीयाध्यायस्य प्रथमे पादे तिङन्तप्रक्रिया तत्सम्बद्धानि कार्याणि च वर्णितानि, ततश्च विभक्तिप्रक्रिया अपि प्रदर्शिता। द्वितीये तृतीये च पादे समासप्रक्रिया प्रतिपादिता। चतुर्थे अपि पादे स्त्रीप्रत्ययाः पठिताः। चतुर्थाध्यायस्य पञ्चमाध्यायस्य च चतुर्षु पादेषु तद्धितप्रत्ययाः वर्णिताः। षष्ठाध्यायस्य प्रथमे पादे सन्धिद्वित्वसम्प्रसारणादिकार्यम् उपन्यस्तम्। द्वितीये पादे अलुग्विधानादिकं विहितम्। तृतीये पादे दीर्घविधानप्रक्रिया असिद्धप्रक्रिया ततश्च अनुनासिकप्रक्रिया प्रदर्शिता। चतुर्थे पादे नुमागमेडागमादिविषयाः निबद्धाः। सप्तमाध्यायस्य प्रथमे पादे वृद्धिविधानं तन्निषेधः नैके आदेशाश्च प्रतिपादिताः। द्वितीये पादे गुणवृद्धिविधानं तन्निषेधश्च वर्णितः। तृतीये च पादे युष्मदस्मदोः स्थाने आदेशाः, द्वित्त्वं च विहितम्। चतुर्थे पादे षत्वणत्वविसर्गादिविषयाः वर्णिताः। अष्टमाध्यायस्य चतुर्षु पादेषु स्वरवैदिकप्रक्रिया निबद्धा।

## सरस्वतीकण्ठाभरणस्य वैशिष्ट्यम्

अभिनवम् इदं व्याकरणम् स्वीयवैशिष्ट्येन गुणमण्डितम्। अत्र सूत्राणि क्वचित् पाणिनीयव्याकरणात् चान्द्रव्याकरणात् वा साक्षात् स्वीकृतानि, क्वचिच्च पृथक्तया ग्रन्थकृता एव विरचितानि। इह तु सूत्रवार्तिकादिभेदो न विद्यते। सूत्रे एव सर्वं निहितम् इत्येव विशेषः। अत इदं व्याकरणान्तरापेक्षया सरलमपि विद्यते। सरस्वतीकण्ठाभरणे आहत्य द्वात्रिंशत् पादाः सन्ति। भोजराजेन सूत्राणां स्वोपज्ञवृत्तिः विरचिता इति श्रूयते। परं कालेन ग्रस्ताया अस्याः कृतेः उपलब्धिः अद्य भवति न वेति विद्वांसः संशयम् आपद्यन्ते। अथापि सरस्वतीकण्ठाभरणनामकस्य अस्य व्याकरणस्य दण्डनाथविरचिता हृदयहारिणी टीका कदाचित् मुद्रिता प्राकाश्यं च गता। सूत्रपरम्परायां सर्वबृहद् ग्रन्थः सरस्वतीकण्ठाभरणम्। प्रायः सार्धषट्सहस्रं सूत्राणीह विद्यन्ते। परन्त्वस्य ग्रन्थस्य काचिद्विशिष्टता विद्यते तद्यथा-

व्याकरणान्तराणि प्रमथ्य इदं व्याकरणं विनिर्मितमिति तु निश्चप्रचम्। तस्य प्रमाणं प्रतिपदं स्फुटमवाप्यते। यथा अत्र भोजराजेन क्वचित् साक्षात् पाणिनीयसूत्राणि चान्द्रसूत्राणि वा स्वस्वरूपेणैव गृहीतानि। क्वचित् तान्येव सूत्राणि अंशतः परिवर्त्य नूतनं सूत्रं तेन निर्मितम्। यथा अत्र व्याकरणे प्रकरणविभागः चान्द्रव्याकरणानुसारं व्यवस्थापितः। परन्तु न केवलं अनयोरेव व्याकरणसम्प्रदाययोः सम्बन्धः दृश्यते अपि तु पाल्यकीर्तिकृतस्य शाकटायनव्याकरणस्यापि भृशं प्रभावः अत्र बहुत्र प्रकरणेषु स्फुटः। अष्टाध्याय्याः महाभाष्यस्य काशिकावृत्तेः प्रभावः अत्र बहुलमिति पूर्वमेव कथितम्।

अत्र ग्रन्थे संज्ञासूत्राण्यपि क्वचित् परिभाषात्वेन कल्पितानि। सामान्यतः ज्ञापकन्यायसिद्धाः परिभाषाः अष्टाध्याय्यां न विद्यन्ते परन्त्वत्र पाणिनीयतन्त्रे वाचनिकाः, तथैव ज्ञापकन्यायसिद्धाः अपि परिभाषात्वेन वर्णिताः। अर्थात् पाणिनिः यत्र स्थलेषु ज्ञापकादिभिः कार्यं साधयति तत्रैवायं भोजः सूत्रं निर्माय सारल्येन कार्यं साधयति। तेन ज्ञापनप्रक्रियाकाठिन्यं न स्पृशति इदं व्याकरणम्।

पाणिनीयपरम्परायां बहुत्र ज्ञापनप्रक्रियया प्रयोगाः समाहिताः दृश्यन्ते। यथा 'चतुर्थी सम्प्रदाने'[2] इति पाणिनीयसूत्रे वार्तिकं पठितम्- 'चतुर्थीविधाने तादर्थ्ये उपसंख्यानम्'। भाष्याकारश्च- चतुर्थीविधाने तादर्थ्ये उपसंख्यानं कर्तव्यम्। यूपाय दारु। कुण्डलाय हिरण्यम्। इत्येवमभिधाय प्रत्याख्याति तत् तर्हि वक्तव्यम्। न वक्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति भवत्यर्थशब्देन योगे चतुर्थीति, यदयं 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः'[3] इति चतुर्थ्यन्तस्यार्थशब्देन सह समासं शास्ति।[4] इत्थं यूपाय इति प्रयोगः साधितः। परं भोजमते अत्र पृथक्सूत्रद्वयं विनिर्मितम्। यथा 'चतुर्थी सम्प्रदाने'[5] पुनश्च 'तादर्थ्ये'[6] इति। तेनात्र ज्ञापनप्रकियायाः गौरवं तथा नास्ति इति अभिनवमिदं व्याकरणम्।

अत्र व्याकरणे सूत्रं वार्तिकं भाष्यम् गणपाठः इत्यादिभेदः नैव दृश्यते। केवलं च धातुपाठं विहाय प्रायः सर्वोऽपि विषयः सूत्रपाठे एव अन्तर्याति। अष्टाध्याय्यां वार्तिकानि गणाश्च नैव पठिताः, तदर्थं सूत्रार्थपूर्तये क्वचित् तेषाम् आवश्यकता भवेत्, परमिह तु साक्षात् सूत्रे एव तत्सर्वं विवेचितं विद्यते, अत इदं व्याकरणं व्याकरणान्तरापेक्षया अत्यन्तं सरलम्। सुललिततया सरलतया च व्याकरणज्ञानमेव अस्य ग्रन्थस्य प्रयोजनम् इति तु स्पष्टं भाति। सरस्वतीकण्ठाभरणस्य चतुर्थभागे प्रस्तावनांशे के एस् महादेवशास्त्री अस्य ग्रन्थस्य निर्माणोद्देश्यं साधु निर्दिशति-

"एवमपि लोकवेदोभयानुग्राहकत्वादार्षत्वाद्, बहुभिरादृतत्वाद्, व्याख्याशतैरुपबृंहितत्वाच्च सर्वतोमुखीं प्रतिष्ठामास्थाय प्रवर्तमानेऽस्मिन् पाणिनीये तन्त्रे वार्तिकगणपाठादिसापेक्षतयाऽध्येतॄणाम तीव क्लेशजातं पश्यन्नाचार्यदेशीयो भोजदेवो बहुग्रन्थालोडनमन्तरा एकेनैव ग्रन्थेनाधीतेन कृत्स्नस्यापि व्याकरणशास्त्रस्य लघुनोपायेन प्रतिपत्तावभ्युपायं चिन्तयन् प्रायेण पाणिनिम् एवानुरुन्धानः तत्र तत्र चान्द्रकातन्त्रादिगतानप्यर्थान् यावदपेक्षितं सञ्चित्य वार्तिकगणोणादिपरिभाषापाठफिट्सूत्रादिकं निखिलमपि सङ्गृह्य पाणिन्यननुशिष्टानां तत्तत् समयसमुच्चितानां महाकविभिरन्यैश्च साधुतया प्रयुज्यमानानां शब्दानामप्यनुशासनं विदधत् सरस्वतीकण्ठाभरणाख्यं ग्रन्थरत्नं निर्ममे।"[7]इति।

क्वचित् वार्तिककारभाष्यकारादिभिः प्रत्याख्याताः परं कविभिः प्रयुक्ताः प्रयोगाः अत्र व्याकरणे कातन्त्रप्रक्रियया साधुतया साधिताः।

किञ्च येन शब्देन अस्य व्याकरणस्य आरम्भः तेनैव परिसमाप्तिः दृश्यते। आदौ अन्ते च मङ्गलवाचकः सिद्धिशब्दः उपात्तः।

निगदितं च तत्रैव-

"अस्मिंश्च सरस्वतीकण्ठाभरणेऽधेतृजनसौकर्याय महान् यत्नः कृतो दृश्यते भोजदेवेन। इह

2. पाणिनीयसूत्रम्-२/३/१३।
3. पाणिनीयसूत्रम्-२/३/३६।
4. तत्रैव सूत्रभाष्ये।
5. भोजसूत्रम्- ३/१/२३०।
6. भोजसूत्रम्- ३/१/२३४।
7. शाम्बशिवशास्त्रिसम्पादितस्य सरस्वतीकण्ठाभरणस्य चतुर्थभागस्य प्रस्तावनायाम् पृ-६।

हि पाणिनीयं तन्त्रमधिजिगांसमानानां महान् क्लेशः सम्पद्यते। तथा हि- क्वचिद् ज्ञापकेन, क्वचिद् योगविभागेन, कुत्रचिद् व्याख्यानेन, क्वचन पदानामनुकर्षेण, क्वचिच्च मण्डुकप्लुत्या, क्वचिच्च परिगणनेन, एकत्र भाष्यार्थपरिशीलनेन, इतरत्र वार्तिकपरिचिन्तनेन, अपरत्र गणपाठादिशीलनेन ते तेऽर्थाः साधनीयाः दृश्यन्ते। तानेतान् क्लेशान् परिजिहीर्षुर्भोजदेवो गणपठितान् शब्दान्, परिभाषाः, ज्ञापकभाष्येष्टिवार्तिकव्याख्यागम्यानर्थांश्च सूत्ररूपेण ग्रन्थशरीर एव समयोजयत्। क्वचित् तत्र तत्र विप्रकीर्णानां सूत्राणां प्रदेशविनिमयेन, पौर्वापर्यविपरिणामादिनि च महती सौकर्यसम्पत्तिः सम्पादिता।”[8]

## हृदयहारिणी

टीकासम्पत्तिभिः विभूषितस्य ग्रन्थस्य महिमा वर्धते इति कारणात् सुप्राचीनकालादेव टीकाटिप्पणीपरम्परा अस्यां भारतभूमौ प्रचलिता विद्यते। क्वचिद् एकेन टीकाग्रन्थेनापि ग्रन्थस्य महान् आदरो भवति, कदाचिच्च व्याख्याशतैरपि न तथा। अत्रैव स्वारस्यं टीकारचनस्य। सरस्वतीकण्ठाभरणस्य एका एव टीका अद्यत्वे प्राप्यते। सा च हृदयहारिणी। वैदुष्यप्रकाशिकेयं कृतिः। संरचनशैल्या विषयविचारशैल्या भाषादृष्ट्या अपि सहृदयहृदयहारिणी इयं हृदयहारिणी। तत्रभवता भोजदेवेन सरस्वतीकण्ठाभरणव्याकरणस्य स्वोपज्ञवृत्तिः काचित् विरचिता आसीत् इति श्रुतिपथम् आयाति। परन्तु अद्यत्वे सा वृत्तिः नैव समुपलभ्यते अस्मिन् प्रपञ्चे। हृदयहारिणी इति व्याख्या अत्यन्तं प्रसिद्धा अस्यां भोजव्याकरणपरम्परायाम्। सरस्वतीकण्ठाभरणस्योपरि कृष्णलीलाशुकमुनिना पुरुषकारः[9] इति नाम्नी व्याख्या ख्यापिता। रामसिंहदेवेन च रत्नदर्पणः इति व्याख्यानं विरचितम्। पुनश्च अज्ञातनामकेन केनचित् पदसिन्धुसेतुः इति व्याख्यान्तरं निर्मितमिति श्रूयते।[10] इतोऽपि नैके व्याख्याग्रन्थाः अस्य व्याकरणस्य विरचिताः आसन् इति श्रुतिः जनमानसे यद्यपि प्रचलिता तथापि तस्य सुष्ठु प्रमाणं किमपि नास्ति। हृदयहारिणीव्याख्यायाः कर्ता द्वादशशतकीयः दण्डनाथनारायणः। यद्यप्यस्य समयः निश्चयेन वक्तुं शक्यः तथापि कोऽयं दण्डनाथः किंदेशीयः इति प्रश्ने तु सन्दिग्धाः विद्वांसोऽपि। गवेषकैः दण्डनाथ इति नामश्रवणेन इदमनुमीयते यत् स कश्चित् सेनापतिः न्यायाधिपतिः वासीत्। भोजराजस्यैव अयं सेनापतिः न्यायाधीशो वासीत् इत्यपि केषाञ्चन मतं परन्त्वत्रापि किमपि दृढतरं प्रमाणं नैव विलसति। तस्मात् अन्यस्यापि कस्यचित् समये अयं भवितुम् अर्हति इति आपातरमणीयं पूर्वोक्तं मतम्।

8. तत्रैव।
9. देवविरचितस्य धातुपाठविषयकव्याकरणग्रन्थस्य टीका अपि पुरुषकारः इति नाम्ना एव प्रसिद्धा। अस्या अपि कर्ता कृष्णलीलाशुकमुनिः इत्येव प्रसिद्धिः।
10. प्रक्रियाकौमुद्याः प्रसादटीकायां टीकाकारः विठ्ठलाचार्यः सरस्वतीकण्ठाभरणस्य व्याख्यात्वेन पदसिन्धुसेतुम् उल्लिखति। अयं च ग्रन्थः सरस्वतीकण्ठाभरणस्य प्रक्रियाग्रन्थः इत्यपि तन्मतम्। तथा च सरस्वतीकण्ठाभरणप्रक्रियायां पदसिन्धुसेतावित्युक्तं- धारयतीत्येके प्राययतीत्येके इति च (७/८/३८)।

पाणिनीयतन्त्रे पारङ्गतस्य अस्य आलङ्कारिकशास्त्रादिष्वपि निर्बाधं पादसञ्चरनमासीत् इति तु तद्ग्रन्थपठनेनैव ज्ञायते। यतो ह्ययं बहुत्र काव्यग्रन्थेभ्यः उदाहरणानि संगृह्य सावलीलतया पाठकहृदयं मोदयति। हृदयहारिणीद्वारेणैव सरस्वतीकण्ठाभरणस्य प्रचारः व्यापृतः भोजव्याकरणपरम्परायाम्। भोजीयसूत्रतात्पर्यं सुष्ठु प्राबाहयत् दण्डनाथः तट्टीकायाम्। हृदयहारिणीमन्तरेण बहुत्र सरस्वतीकण्ठाभरणस्य अर्थावगमः सन्देहनिरसनं वा नैव सम्भवति। पदप्रयोगः वाक्यप्रयोगश्चापि विलक्षणः। टीकाकारः व्याकरणस्यास्य विषयान् ललितया सरसया च शैल्या पाठकान् प्रति प्रापयति। अतः सरस्वतीकण्ठाभरणसदृशग्रन्थपठनेऽपि क्लेशः नैव भवति।

## हृदयहारिण्याः वैशिष्ट्यम्

किमत्र प्रबन्धे विचारयिष्यते तत् किञ्चित् प्रस्तुयते। बहून् ग्रन्थान् आलोड्य एकेनैव टीकाग्रन्थेन सर्वोऽपि विषयः सङ्ग्रहीतुं दण्डनाथस्य हृदयहारिणीप्रणयनरूपोऽयं प्रयासः। व्याख्यायामस्यां व्याख्यान्तराणां ग्रन्थान्तराणां वा कीदृशः प्रभावो वर्तते तत् अत्र विचार्यते। अस्मिन् सरस्वतीकण्ठाभरणव्याकरणे यद्यपि बहूनां ग्रन्थानां प्रभावो दरीदृश्यते तथापि बाहुल्येन काशिकावृत्तिं महाभाष्यप्रदीपं चादाय अयं व्याख्याग्रन्थः विरचितः इति वक्तुं शक्यते। काशिकायाः महाभाष्यस्य प्रदीपस्य च प्रभावः प्रतिपदमत्र व्याख्याने स्फुटमवाप्यते। यथा– अ इ उ ण् इति माहेश्वरसूत्रव्याख्यानप्रसङ्गे काशिकाकृता व्याख्यातम्- "अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम्"[11] इति। एवं हृदयहारिणीकृता अपि साक्षात् तथैव व्याख्यायते- "अ इ उ इति क्रमेण वर्णानुपदिश्यान्ते णकारिमितं करोति प्रत्याहारार्थम्"[12]। एवं महाभाष्ये अपि। परं केवलं एतेषां ग्रन्थानामेव न, अपि तु वाक्यपदीयप्रभृतिग्रन्थानामपि उद्धरणं समवलोक्यते। यथा 'कर्तुरीप्सिततमं कर्म'इति सूत्रस्य व्याख्यानवेलायां व्याख्याकृता कर्मत्रैविध्यं भर्तृहरिप्रतिपादितमार्गेण न्यरूपि-

यदसज्जायते सद्वा जन्मना यत् प्रकाशते।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्॥
प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्।
किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्॥
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते॥

---

11. जयशङ्करलालत्रिपाठिसम्पादितायां काशिकायां प्रत्याहारप्रकरणम् पृ-१५।
12. शाम्बशिवशास्त्रिसम्पादितस्य सरस्वतीकण्ठाभरणस्य प्रथमभागः पृ-२।

संस्कृतव्याकरणम् इति शब्दश्रवणेन जनानां मनसि पाणिनीयव्याकरणमेव एदम्प्राथम्येन स्फुरति। तत्रापि भट्टोजिदीक्षितेन विरचिता पाणिनीयसूत्राणां प्रकरणानुसारिणी टीका वैयाकरणसिद्धान्तकौमुदी पाणिनीयव्याकरणस्य महिमानं वर्धयति। आपततः यथा वैयाकरणसिद्धान्तकौमुद्यां तद्वत् एव भाषा शैली सर्वमपि अत्र हृदयहारिण्याम् अवलोक्यते। अतः अनयोः ग्रन्थयोः सादृश्यं वैसादृश्यं किमपि अस्ति न वा तदपि वर्णनीयम्। कतरो वा ग्रन्थः पूर्वं विरचितः इत्यपि विचारणीयम्। वस्तुतः हृदयहारिणी एव पूर्वकालिकी रचना। यतो हि तत्रभवान् दण्डनाथनारायणः द्वादशशतकीयः। अयं च वैयाकरणमूर्धन्यः भट्टोजिदीक्षितः सप्तदशशतकीयः। अतः दण्डनाथनारायण एव पूर्ववर्ती इति स्पष्टमेव ज्ञातम्। परं तथापि उभयत्र समाना एव शैली आधिक्येन पङ्क्तयः अपि समाः परिलक्ष्यन्ते। एवं हृदयहारिण्याः अत्र सर्वमुद्धृतं वेति प्रश्ने इदं वक्तुं शक्यं यत् उभावपि ग्रन्थौ सामान्यतः महाभाष्यकाशिकादिग्रन्थौ आदाय विरचितौ अतः एवं स्थितिः उभयत्रापि दरीदृश्यते। हृदयहारिण्याः प्रभावः अन्यत्र टीकासु क्वचित् दृश्यते।

व्याकरणस्यास्य टीकायाः हृदयहारिणी इति नामकरणे किमपि स्वारस्यं विद्यते न वा इत्यपि विमृश्यते। व्याख्यायाः नाम हृदयहारिणी इति ग्रन्थकृता कथं प्रदत्तमिति प्रश्नः अवश्यं स्यात्। यतो हि नामान्तरम् अपि प्रदातुं शक्यम् आसीत्। परम् इयं हृदयहारिणी यथार्थनाम्नी। निरूपणभङ्ग्या सङ्गतोदाहरणघटनया प्रमाणभूतबहुग्रन्थादरेण व्याकरणजिज्ञासूनां हृदयं हरति इति कृत्वा अस्याः नाम हृदयहारिणी इति तर्कयामः। प्रस्तुते च इयं पण्डितानां हृदयं हरति न वेति द्रष्टव्यमेव। अस्य ग्रन्थस्य रचनाशैली तादृशी अस्ति येन द्रागेव विद्वांसोऽप्यत्र मोदन्ते। यथा 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्'इति सूत्रव्याख्यानसमये व्याख्याकृता कथितम्- "अर्थोऽभिधेयः स च स्वार्थो द्रव्यं लिङ्गं संख्या शक्तिरिति। द्योत्यश्च समुच्चयादिः। तद्वच्छब्दरूपं प्रातिपदिकसंज्ञं भवति। धातुः प्रत्ययान्तश्च न भवति।"[13] एवं बहुत्र स्थलेषु असकृत् पाठकहृदयं हरति हृदयहारिणी।

सरस्वतीकण्ठाभरणस्य व्याख्यान्तरसद्भावे हृदयहारिणी किमपि प्रमाणं दर्शयति वेति सविस्तारमत्र विवेच्यते। इदमत्र वक्तुं शक्यते यत् सरस्वतीकण्ठाभरणस्य व्याख्यान्तरसद्भावे प्रमाणं हृदयहारिणी एव। यतो हि हृदयहारिण्याः पुष्पिकां[14] प्रपठ्य एवं भाति यत् काञ्चित् बृहद्वृत्तिम् अवलम्ब्य इदं हृदयहारिणी इति वृत्तिः दण्डनाथनारायणेन विरचिता। सा च बृहद्वृत्तिः केन विरचिता इति विषये तु मतैक्यं नास्ति। केचन[15] अभिप्रयन्ति यत् सा वृत्तिः स्वयं भोजदेवेन एव रचितम्, परे तु कथयन्ति यत् अन्यस्य कस्यचित् सा वृत्तिरिति।

13. तत्रैव-पृ-६।
14. इति श्रीदण्डनाथनारायणभट्टसमुद्धृतायां सरस्वतीकण्ठाभरणस्य लघुवृत्तौ हृदयहारिण्यां...... इत्येवम्।
15. युधिष्ठिरमीमांसकमहोयस्य इदं मतम्। गणरत्नमहोदधिः एवञ्च अमरकोशोद्धाटन इति ग्रन्थयोः उद्धृतं भोजराजस्य वचनं हृदयहारिण्यामपि परिलक्ष्यते अतः इदं वक्तुं शक्यते यत् इयं बृहद्वृत्तिः भोजराजेनैव विरचिता। ततश्च लघुवृत्तौ हृदयहारिण्यां तत् वचनं दण्डनाथेनापि स्वीकृतम्।

एतट्टीकाकरणे टीकाकर्तुः किम् उद्देश्यम्? कथं वा इदं व्याख्यानं मूलग्रन्थाध्ययने साहाय्यमाचरति तदपि मीमांस्यते। एवं पूर्वत्रैवोक्तं यत् सरस्वतीकण्ठाभरणस्य काचित् बृहद्वृत्तिः आसीत् परं न प्राप्यते सा कृतिः। अतः मूलग्रन्थाध्ययने व्याख्यायाः कस्याश्चित् आवश्यकतायां सत्यां वृत्तिकारेण दण्डनाथनारायणेन इयं वृत्तिः विरचिता। तेन मूलग्रन्थाध्ययने इतोऽपि सौकर्यं भवति। यद्यपि मूलग्रन्थे तथा काठिन्यं नास्ति तथापि क्वचित् सन्दिग्धस्थलेषु वृत्तेः प्रयोजनं भवत्येव। तत् प्रयोजनं साधु निष्पादयति हृदयहारिणी।

कथं वा अयं व्याख्याग्रन्थः भोजव्याकरणपरम्परायाः सम्वर्धकः इति अधुना प्रतिपाद्यते। भोजव्याकरणस्य मूलभूतं हि भोजसूत्रम्। तेषां सूत्राणां काचित् बृहद्वृत्तिरासीत् इति पूर्वमेव उक्तम्। परं गच्छता कालेन सा कृतिः नष्टा। किन्तु भोजव्याकरणजिज्ञासवः ये आसन् तेषां बोधसौकर्याय कस्याश्चित् वृत्तेः प्रयोजनं अनुभूतं विद्वद्भिः अतः तद्विरचने अचेष्टन्त। तस्मादेव ज्ञायते तत्काले भोजव्याकरणस्य आदरः आसीदिति। अस्य व्याकरणस्य सारल्यात् एव लोके प्रचारः आसीत् इति अनुमीयते। पुनश्च तादृशसारल्यस्य महिमा न केवलं भोजीयसूत्राणामपि तु हृदयहारिणीवृत्तेरपि। यदा कस्यचिद् ग्रन्थस्य टीकारचनं विधीयते तदा तस्य ग्रन्थस्य विद्वत्समाजे महान् आदरो विद्यते इति तु सर्वैरपि उररीक्रियते।

भगवता पाणिनिना विलिखिता अष्टाध्यायी पाणिनीयव्याकरणपरम्परायां मूर्धन्यस्थानं भजते। अत्र च पाणिनीयपरम्परायां अष्टाध्यायीगतसूत्राणां व्याख्यानप्रसङ्गे बहुभिः विद्वद्भिः नैकाः व्याख्याग्रन्थाः विरचिताः, प्रसिद्धिं च गतास्ते। यथा अष्टाध्यायीगतसूत्राणां व्याख्या काशिका अत्यन्तं प्रसिद्धा। एवमेव अद्यत्वे भट्टोजीदिक्षितविरचितां वैयाकरणसिद्धान्तकौमुदीं प्रपठ्य मोदमानास्तिष्ठन्ति शब्दशास्त्रपारावारीणः। यथा पाणिनिसूत्राणां नैकाः टीकाः, तासां पुनः टीकाः एवं टीकाटिप्पणपरम्परा अद्यत्वे अपि प्रचलिता दृश्यते तद्वत् अस्यां व्याकरणपरम्परायां नैव। सरस्वतीकण्ठाभरणव्याकरणस्य उपलभ्यमाना अद्वितीया टीका तावत् हृदयहारिणी। सरस्वतीकण्ठाभरणस्य प्राप्यमाना एका एव टीका इति एतद्व्याकरणपरम्परायाः यत्किमपि माहात्म्यं तत्तु एतट्टीकाद्वारेणैव। बहुत्र ग्रन्थेषु एतट्टीकायाः वाक्यानि उद्धृतानि। तदस्याः व्याख्यायाः महिमानं प्रकाशयति। व्याख्याशतैरुपबृंहितायाः पाणिनीयव्याकरणपरम्परायाः महती प्रतिष्ठा अद्यत्वेऽपि। तद्वत् प्रतिष्ठा यद्यपि इदानीं भोजव्याकरणस्य नास्ति, तथापि क्वचित् काले अस्यापि व्याकरणस्य महती प्रतिष्ठा आसीत् इति तु अनुमेयमेव। अधुनापि केरलप्रदेशेषु क्वचित् एतद्व्याकरणस्य अध्ययनं अध्यापनं च भवति, अतो नेयं व्याकरणपरम्परा विलुप्तिं गता इति स्मारं स्मारम् एव मोदामहे।

सूत्रपरम्परम्परायां ये ग्रन्थाः विरचिताः तत्र प्रायः सर्वबृहद्ग्रन्थः सरस्वतीकण्ठाभरणम्। प्रायेणेह सार्धषट्सहस्रसूत्राणि सन्ति। हृदयहारिणी यतोऽस्य व्याख्याग्रन्थः अतः आकारेण एवञ्च विषयबाहुल्येन अपि अयं व्याख्याग्रन्थः अत्यन्तं दीर्घः। प्रायः सर्वेषां सूत्राणां व्याख्यानमत्र

प्रस्तुतमित्यतः भोजव्याकरणपरम्परायां अतिशयेन समादृतः अयं टीकाग्रन्थः। क्वचित् पाणिनीयव्याकरणपरम्परायां वार्तिककारभाष्यकारादिभिः प्रत्याख्याताः परं कविभिः प्रयुक्ताः प्रयोगाः अत्र ग्रन्थे साधुतया साधिताः। शब्दसाधुत्वनियामकं हि व्याकरणमित्युच्यते। तस्मात् तादृशप्रयोगानां साधुत्वं प्रतिपाद्य इदमपि व्याकरणपदवीं लभते।

अस्याञ्च सरस्वतीकण्ठाभरणव्याख्यायाम् अध्येतृजनसौकर्याय महान् यत्नः कृतो दृश्यते दण्डनाथेन। अत्र अत्यन्तं सरला भाषा दरीदृश्यते। यस्य पठने पुनः टीकान्तरस्य प्रायः आवश्यकता नैव जायते। दृष्टान्ता अपि नितरां समुचिताः। वर्णनरीतिरपि विविधबाहुल्यवर्जिता। सूत्राणां व्याख्यानपद्धतिरपि अत्यन्तं रमणीया। सूत्राणां सामान्योऽर्थः प्रथमं प्रतिपादितः। ततश्च उदाहरणप्रत्युदाहरणशैल्या सूत्रं विस्तरशः व्याख्याति। अत्र कीदृशी शैली समादृता, भाषाप्रयोगः वा कथं विद्यते इत्यादयः विषयाः यथासम्भवं समासेन विवेचिताः शोधप्रबन्धेऽस्मिन्।

**निष्कर्षः**

एवमत्र प्रबन्धे भोजव्याकरणपरम्परायाः अन्यतमस्य सरस्वतीकण्ठाभरणस्य तट्टीकायाश्च वैशिष्ट्यं अभिनवत्वं इत्यादयः विषयाः यथोचितं सप्रमाणं प्रतिपादिताः। भोजव्याकरणे मूलभूतं हि भोजसूत्राण्येव। भोजसूत्रोपरि विरचिता दण्डनाथनारायणेन हृदयहारिणी इति व्याख्या। एतद्द्वयं भोजव्याकरणपरम्परायां अत्यन्तं प्रसिद्धम्। यद्यपि शृङ्गाराप्रकाशादिष्वपि व्याकरणसम्बन्धिनः विचाराः दरीदृश्यन्त एव तथापि ते तु साक्षात् व्याकरणसूत्राणामुपरि न आधारिताः। अपि तु आधिक्येन व्याकरणस्य दार्शनिकभागस्यैव विचाराः तत्र विचारिताः। अत्र तु सरस्वतीकण्ठाभरणे प्रक्रियाभागेन सहैव क्वचित् प्रसङ्गवशात् दार्शनिकविचारा अपि यथासम्भवं निरूपिताः। परं तथापि दुरूहः विचारः क्वचित् ग्रन्थस्य मौलिकतां विहन्येत इति विचिन्त्य प्रायः तादृशाः अंशाः नैव स्वीकृताः। अतः एव अत्यन्तं सरलः अयं व्याकरणग्रन्थः। टीकाकृत् दण्डनाथनारायणोऽपि सूत्रकारस्यैव परम्पराम् अनुसरति। वस्तुतः पाणिनिव्याकरणं सरलीकृत्य सरसया शैल्या पाठकहृदयहरणेवास्य व्याकरणस्य मूलभूतम् उद्देश्यमिति एतद्व्याकरणपठने सुष्ठु प्रतीयते। तत्करणे सूत्रकारः व्याख्याकारश्च नितरां प्रचेष्टः सफलीभूतश्च इति प्रतिपदं सप्रमाणम् अस्माभिः अवलोकितम्। किञ्च मूलकारानुमतम् आकूतं कथं पाठकान् प्रापयति, पाठकाश्च तट्टीकासहायेन मूलग्रन्थतात्पर्यावगमनेन कथं मोदन्ते इति टीकाकारस्य निरूपमवर्णनशैल्यपि अत्र उल्लेख्या।

**उपसंहारः**

इत्थं सरस्वतीकण्ठाभरणव्याकरणस्य टीकासम्पत्तिः तदभिनवत्वं वैशिष्ट्यं च किं व्याख्यान्तरात् तत्सर्वमत्र विवेचितमत्र। एवञ्चात्र शोधप्रबन्धरचनेन पुरा प्रचलितासु बहुविधव्याकरणपरम्परासु कस्याश्चन परम्परायाः पुनरुद्धारः भवेत् इति आशास्महे।

## सहायकग्रन्थाः


1. देवशर्मा कालीजीवनः। १९९५। शब्दशास्त्रेर इतिहास। कोलकाता : रामकृष्णमिशन् इन्सटिट्युट् अफ कालचार।
2. पाणिनिः। २०१३। अष्टाध्यायी। वाराणसी : चौखम्बा सुरभारती प्रकाशन।
3. भोजः। २००६। सरस्वतीकण्ठाभरणम्(अलङ्कारशास्त्रीयम्)। कामेश्वरनाथमिश्रः। वाराणसी : चौखम्बा ओरियन्टलिया।
4. भोजः। १९३७। सरस्वतीकण्ठाभरणम् (मूलमात्रम्)। चिन्तामणिः टि. आर् (सम्पा.)। मद्रास विश्वविद्यालयः।
5. भोजः। १९३५। सरस्वतीकण्ठाभरणम् (व्याकरणशास्त्रीयम्)। शास्त्री शाम्बशिव (सम्पा.)। त्रिवन्दम् : अनन्तशयन विश्वविद्यालयः।
6. युधिष्ठिरमीमांसकः। संस्कृत व्याकरणशास्त्र का इतिहास (प्रथमः भागः)। हरियाणा।
7. वामनजयादित्यौ। २०१६। काशिका(न्यासपदमञ्जरीभावबोधिनीसहिता)। त्रिपाठी जयशङ्करलालः (सम्पा.)। वाराणसी : तारा बुक एजेन्सी।
8. शास्त्री विश्वनाथ। १९९६। सरस्वतीकण्ठाभरण का समीक्षात्मक इतिहास। परिमल पाब्लिकेशन्स।



Received on: 14/02/2020 Accepted on: 11/02/2021

# नायकविचारे अलंकारशास्त्रेषु उज्ज्वलनीलमणेः स्थितिः

शिवनाथ-सर्दारः

**विषयसारः**

वैष्णवालंकारिकाः भक्तिनामकं रसमेकं रसत्वेन स्वीकृतवन्तः। अपि च तेषां नये स रसः मुख्यरसः। बैष्णवालंकारिकाणाम् अलंकारग्रन्थेषु दार्शनिकालंकारिकसिद्धान्तयोः सुष्ठू समन्वयः दृश्यते।नायकविचारस्तु आलंकारिकाणाम् अन्यतमः मुख्यः विषयः।। नाट्यशास्त्रे एव सर्वप्रथमं नायकभेदविषये तेषां स्वरूपविषये च आलोचना प्राप्यते। भरतस्य मते नायकः चतुर्विधः।दशरूपके चतुर्विधस्य नायकस्योल्लेखः प्राप्यते। ततश्च ते धृष्ट-शठ-दक्षिणानुकुलाद्यवस्थाभेदेन षोडशधा विभक्ताः। पुनः ते उत्तम-मध्यमाधमभेदेन अष्टचत्वारिंशत्प्रकाराः। साहित्यदर्पणेऽपि अनुरूपं भेदाः दृश्यन्ते। नाटकलक्षणरत्नकोशे नायकस्य लक्षणम् एवं प्राप्यते यत् -'बीजविन्द्वादिसंवलितस्य नाटकस्य नाट्यमन्तं नयतीति नायकः'[1] इति। स च नायकः धीरोद्धतः धीरललितः धीरोदात्तः धीरप्रशान्तश्चेति भेदेन चतुर्विधः।बैष्णवालंकारिकैः अपि नायकस्वरूपविषये स्वकीयग्रन्थेषु विविधा आलोचनाः विहिताः। श्रीकृष्णदासकविराज-गोस्वामिपादस्य उज्ज्वलनीलमणिः वैष्णवालंकारशास्त्रेषु अन्यतमः ग्रन्थः। तत्रापि उच्यते नायकश्चतुर्विधः। पुनः ते नायकाः पूर्णतमः पूर्णतरः पूर्ण इति च भेदेन द्वादशः, अनन्तरं पत्युपपतिभेदेन चतुर्विंशतिः। अन्ततो गत्वा दक्षिणानुकूल-धृष्ट-शठभेदेन साकल्येन षण्णवतिधा। इत्थं विभिन्नेषु अलङ्कारग्रन्थेषु तथा उज्ज्वलनीलमणौ प्रतिपादितं नायकस्वरूपमाधारीकृत्य एकं तूलनात्मकमालोचनमस्मिन् प्रबन्धे यथामति विहितम्।

**शब्दसंकेतः**

नायकः, नाटकलक्षणरत्नकोशः, उज्ज्वलनीलमणिः।

# नायकविचारे अलंकारशास्त्रेषु उज्ज्वलनीलमणेः स्थितिः

## अवतरणिका

इह खलु मोहमयेऽसारेसंसारे सुखलिप्सवः जनाः नितरां सुखमेव अन्विष्यमानाः तिष्ठन्ति। वेदपाठात् श्रवणाच्च तेषां सुखप्राप्तिः। अपि च काव्यपाठादेव सौष्ठवेन जनानां सुखप्राप्तिर्भवति।

*Ph.D Scholar, Sanskrit Department, Ramakrishna Mission Vidyamandira.

तस्य च काव्यस्य आत्मानुसन्धाने प्राचीनालंकारिकाः भूयसीं प्रचेष्टां कृतवन्तः। विषयेऽस्मिन् तेषां मतवैपरीत्यं दृक्पथमायाति। मतवैभिन्न्यमाधारीकृत्य संस्कृतालंकारशास्त्रे विविधानि प्रस्थानानि समुपजायन्ते। प्रसिद्धेषु षट्सु प्रस्थानेषु रसप्रस्थानः अन्यतमः। प्रस्थानमिदं परवर्तिनि काले समधिकं प्रसिद्धिं गतम्। प्रस्थानस्यास्य प्रायः सर्वैरेव प्राचीनालंकारिकैः नवविधाः रसाः तथा तेषां नवविधाः स्थायिभावाश्च स्वीकृताः। परन्तु वैष्णवालंकारिकाः भक्तिनामकं रसमेकं रसत्वेन स्वीकृतवन्तः। अपि च तेषां नये स रसः मुख्यरसः। बैष्णवालंकारिकाणाम् अलंकारग्रन्थेषु दार्शनिकालंकारिकसिद्धान्तयोः सुष्टुसमन्वयोः दृश्यते ।

नायकविचारस्तु आलंकारिकाणाम् अन्यतमः मुख्यः विषयः। तत्र नायकविचारे गौडीयबैष्णवालंकारशास्त्राणां विशेषतः उज्ज्वलनीलमणेः स्वतन्त्रता अस्माकं दृक्पथमायाति। नाट्यशास्त्रे एव सर्वप्रथमं नायकभेदविषये तेषां स्वरूपविषये च आलोचना प्राप्यते । भरतस्य मते नायक आदौ चतुर्विधः । तन्मते देवाः खलु धीरोद्धताः । अमात्याः सेनापतयश्च धीरोदात्तनायकाः। राजानः धीरललिताः, विप्राः वणिजश्च धीरप्रशान्ताः। अग्निपुराणे वर्णितं दृश्यते यत् नायकः चतुर्धा -

"धीरोदात्तो धीरोद्धतः स्याद्धीरललितस्तथा।
धीरप्रशान्त इत्येवं चतुर्धा नायकः स्मृतः ।।"[2] इति ।

नायकगुणाः -दशरूपकस्य द्वितीयप्रकाशे नायकगुणाः निर्दिष्टाः धनञ्जयेन -

"नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ।।
बुद्ध्युत्साहस्थितिप्रज्ञाकलमानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ।।"[3] इति ।

तदनुरूपं साहित्यदर्पणेऽपि-

"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता ।।"[4] इति ।

सर्वेषु एव बैष्णवालंकारशास्त्रेषु नायकत्वेन केवलः श्रीकृष्ण एव स्वीकृतः । अतः बैष्णवालंकारिकाः आदौ श्रीकृष्णस्य गुणान्निर्दिष्टवन्तः। यथा उज्ज्वलनीलमणौ श्रीकृष्णस्य चतुर्विंशतिः गुणाः वर्णिताः।

"अयं सुरम्यो मधुरः सर्व्वसल्लक्षणान्वितः ।
वलीयान्नवतारुण्यो वावदूकः प्रियंवदः ।।
सुधीः सप्रतिभो धीरो विदग्धश्चतुरः सुखी ।
कृतज्ञो दक्षिणः प्रेमवश्यो गम्भीरताम्बुधिः ।।

वरीयान् कीर्तिमान् नारीमोहनो नित्यनूतनः ।
अतुल्यकेलिसौन्दर्य्यप्रेष्ठवंशीस्वनांकितः।।"[5] इति ।

भक्तिरसामृतसिन्धौ साकल्येन श्रीकृष्णस्य चतुःषष्टिः गुणा उल्लिखिताः ।

## दशरूपके साहित्यदर्पणे च नायकविचारः

दशरूपके आदौ चतुर्विधस्य नायकस्योल्लेखः प्राप्यते । ते च धृष्ट-शठ-दक्षिणानुकुलादयः अवस्थाभेदेन षोडशः । पुनः ते उत्तम-मध्यमाधमभेदेन अष्टचत्वारिंशत्प्रकाराः । साहित्यदर्पणेऽपि अनुरूपं भेदाः दृश्यन्ते । तथाह्युक्तं साहित्यदर्पणे –

"धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ।।"[6] इति ।

पुनः - "एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा ।"[7] इति ।

अनन्तरं च –

"एषां च त्रैविध्यादुत्तममध्याधमत्वेन ।
उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च ।।"[8] इति ।

नायकभेदनिरूपणानन्तरं धनञ्जयेन नायकसहायभेदोऽपि प्रदर्शितः । तन्मते पीठमर्द-विट-विदूषकभेदेन नायकसहायकाः त्रिविधाः । अनन्तरं प्रतिनायकस्य प्रसङ्गोऽपि तेन उत्थापितः । तन्मते प्रतिनायकः धारोद्धतः लुब्धः स्तब्धः पापकारी व्यसनासक्तश्च भवति । यथा रामस्य प्रतिनायकः रावणः । विश्वनाथमते तु नायकानुरक्ता परिहासेषु निपुणाः कुपितमधुमानभञ्जनाः, नायककार्ये औदासीन्यादिदोषरहिताः परदारगमनदोषरहिता च विट-चेटक-विदूषकद्या नायकस्य सहायका भवन्ति । अनन्तरं तेन नायकस्य अर्थानां चिन्तायां सहायकत्वेन मन्त्रिणः पुनः अन्तःपुरसहायकत्वेन वामनादीनां नामोल्लेखः कृतः । नायकसहायकानामुल्लेखः प्राप्यते अग्निपुराणेऽपि –

"पीठमर्द्दो विटश्चैव विदूषक इति त्रयः ।
शृङ्गारे नर्मसचिवा नायकस्यानुनायकाः ।।"[9] इति ।

## नाटकलक्षणरत्नकोशे नायकभेदाः

नाटकलक्षणरत्नकोशे नायकस्य लक्षणम् एवं प्राप्यते यत् -'बीजविन्द्वादिसंवलितस्य नाटकस्य नाट्यमन्तं नयतीति नायकः'[10] इति । स च नायकः धीरोद्धतः धीरललितः धीरोदात्तः

धीरप्रशान्तश्चेति भेदेन चतुर्विधः। सागरनन्दिनापि भरतस्य मतमवलम्ब्य नायकभेदाः प्रदर्शिताः । तन्मते देवता भवति धीरोदात्तः। नृपतिः खलु धीरललितः । धीरोदात्तः सेनापतिरमात्यश्च । श्रोत्रियः सार्थवाहकश्च धीरप्रशान्तः । अनन्तरं तेन निर्दिष्टं यत् ये खलु जनाः एभ्यो भिन्नाः ते खलु सङ्कीर्णाः । ग्रन्थेऽस्मिन् सहायनायकानाम् उल्लेखो भेदो वा तेन न कृतः ।

**बैष्णवालंकारग्रन्थेषु नायकविचारः**

बैष्णवालंकारिकैः अपि नायकस्वरूपविषये स्वकीयग्रन्थेषु विविधा आलोचनाः विहिताः । नायकविचारे तेषां मतवादाः विस्मापयन्ति अस्मान् । ते सर्वस्यैव नायकस्य उदाहरणत्वेन केवलं श्रीकृष्णमेव स्वीकुर्वन्ति। इदानीं प्रश्न एक उत्थाप्यते यत् एकस्य एव श्रीकृष्णस्य सर्वनायकरूपत्वं कथं सम्भवति । अत्रोत्तरं प्रददति बैष्णवालंकारिकाः यतो हि भगवान् श्रीकृष्णः बहुविधानां गुणानां क्रियाणां च आश्रयस्वरूपः, अतः लीलाभेदेन श्रीकृष्णस्य सर्वनायकरूपत्वं सम्भाव्यते । उक्तञ्च भक्तिरसामृतसिन्धौ –

"बहुविध-गुण-क्रियाणामास्पदभूतस्य पद्मनाभस्य ।
तत्तल्लीलाभेदाद्-विरुध्यते न हि चतुर्विधता ।।"[11] इति ।

भक्तिरसामृतसिन्धौ आदौ हरिः पूर्णतम-पूर्णतर-पूर्णभेदेन त्रिधा इति वर्णनं प्राप्यते । अनन्तरं तत्रोच्यते सः खलु श्रीकृष्णः धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्तभेदेन चतुर्विधः । उच्यते च -

"हरिः पूर्णतमः पूर्णतरः पूर्ण इति त्रिधा ।
श्रेष्ठमध्यादिभिः तथैव धीरोद्धतः कथितः ।।"[12] इति ।

पुनः - "स पुनश्चतुर्विधः स्याद् धीरोदात्तश्च धीरललितश्च ।
धीरप्रशान्तनामा तथैव धीरोद्धतः कथितः ।।"[13] इति ।

भक्तिरसामृतसिन्धौ श्रीकृष्णस्य अष्ट सात्त्विकगुणाः निर्दिष्टाः ।

"अथाष्टावनुकीर्त्यन्ते सद्गुणत्वेन विश्रुताः ।
मङ्गलालङ्क्रियारूपाः सत्त्वभेदास्तु पौरुषाः ।।
शोभा विलासो माधुर्य्यं माङ्गल्यं स्थैर्यतेजसी ।
ललितौदार्य्यमित्येते सत्त्वभेदास्तु पौरुषाः ।।" इति ।

दशरूपके साहित्यदर्पणेऽपि च नायकस्य एतादृशानाम् अष्टानां सात्त्विकगुणानाम् उल्लेखः प्राप्यते।

**उज्ज्वलनीलमणेः स्थितिः**

श्रीकृष्णदासकविराज-गोस्वामिपादस्य उज्ज्वलनीलमणिः वैष्णवालंकारशास्त्रेषु अन्यतमः ग्रन्थः। तत्रादौ उच्यते नायकश्चतुर्विधः। ते च नायकाः पूर्णतमः पूर्णतरः पूर्ण इति च भेदेन द्वादशः, अनन्तरं पत्युपपतिभेदेन चतुर्विंशतिः । अन्ततो गत्वा दक्षिणानुकूल-धृष्ट-शठभेदेन साकल्येन षण्णवतिधा । उक्तञ्च –

"उदात्ताद्यैश्चतुर्भेदैस्त्रिभिः पुर्णतमादिभिः ।
द्वादशात्मा चतुर्विंशत्यात्मा पत्यादियुग्मतः ।।
नायकः सोऽनुकूलाद्यैः स्यात् षण्णवतिधोदितः ।"[15] इति ।

ग्रन्थेऽस्मिन् पतेः उपपतेश्च लक्षणोदाहरणानि प्राप्यन्ते । कन्यायाः पाणिग्राहकः पुरुषो भवति पतिः। उदाहरणं यथा -

"रुक्मिणं युधि विजित्य रुक्मिणीं द्वारकामुपगम्य विक्रमी ।
उत्सवच्छलितपौरमण्डलः पुरण्डरीकनयनः करेऽग्रहीत् ॥"[16] इति ।

उपपतेः लक्षणं तत्र –

"रागेणोल्लङ्घयन् धर्मं परकीयवलार्थिना
तदीयप्रेमवसतिर्बुधैरुपपतिः स्मृतः।।"[17] इति।

उदारहरणं च –

"संकेतीकृतकोकिलादिनिनदं कसद्विषः कुर्व्वतो
द्वारोन्मोचनलोलशङ्खबलयक्काणं मुहुः शृण्वतः।
केयं केयमिति प्रगल्भजरनीवाक्येनदूनात्मनो
राधाप्राङ्खणकोणकलिविटपिक्रोडे गता शर्व्वरी।।"[18] इति।

अनन्तरं गोस्वामिपादेन अनुकूल-दक्षिण-शठ-धृष्टभेदेन नायकानां भेदाः प्रदर्शिताः। एकस्यामेव नायिकायामासक्तः नायकः खलु अनुकूलः। यथा सीतायां रामचन्द्रः। ततः परं धीरोदात्तादिभेदेन अनुकूलनायकस्यापि चातुर्विध्यं प्रदर्शितं तेन। यः खलु नायकः अन्यस्यां नायिकायामासक्तः सन्नपि पुर्वां नायिकां प्रति सहृदयः स्यात् स एव दक्षिणनायकः। तदुदाहरणं यथा-

"कथयसि प्रेक्ष्यते न व्यलीकं
स्वप्नेऽप्यस्य त्वयि मधुभिदः प्रेमशुद्धान्तरस्य।
श्रुत्वा जल्पं पिशुनमनसां तद्विरुद्धं सखीनां
युक्तः कर्तुं सखि सविनयेनात्र विश्रन्तभङ्गः।।"[19] इति।

यः खलु नायकः प्रच्छन्नतया पूर्वनायिकाया अप्रियं कार्यं सम्पादयति स एव शठः। परनारीसम्भोगचिह्नं नायिकायाः सकाशे प्रकटितं सदपि यः खलु नायको निर्भयः तिष्ठते स एव धृष्टनायकः। नायकोऽयं मिथ्यावचनदक्षश्च।

अनन्तरं तेन पञ्चविधस्य नायकसहायकस्य नामोल्लेखः कृतः । ते यथा चेटकः विटः विदूषकः पीठमर्दः प्रियनर्मसखश्च । तदुक्तम् उज्ज्वलनीलमणौ –

"अथैतस्य सहायाः स्युः पञ्चधा चेटको विटः ।
विदूषकः पीठमर्द्दः प्रियनर्मसखस्तथा ।।"[20] इति ।

तत्र चेटस्य लक्षणं –'सन्धानचतुरश्चेटो गूढकर्म्मा प्रगल्भधीः'[21] इति । यथा गोकुले भङ्गुरभृङ्गारादयः। वेशोपचारकुशलो कामतन्त्रकलावेदी धूर्तो गोष्ठीविशारदः विट इत्यभिधीयते । यथा कडारो भारतीयबन्धप्रमुखाः ब्रजपरिचारकाः । भोजनरसिकः कलहप्रियः परिहासेषु निपुणः खलु विदूषकः । यथा विदग्धमाधवे मधुमङ्गलः । गुणैः नायकतुल्यः प्रेम्णा यः तत्रानुवृत्तिमान् स एव पीठमर्द्दः । यथा हरेः श्रीदामा । आत्यन्तिकरहस्यज्ञः सखाभावसमाश्रितः खलु प्रियनर्म्मसखः । यथा गोकुले सुवलादयः अर्ज्जुनादयश्च । भक्तिरसामृतसिन्धौ अपि श्रीकृष्णस्य सहायकानां भेदाः उदाहृताः ।

अन्ततो गत्वा एवं वक्तुं शक्यते यत् यतो हि मम प्रबन्धोऽयं नायकविषयकः पार्श्वनायकविषयकश्च अतः यद्यपि अलंकारग्रन्थादीनां विस्तृतेषु क्षेत्रेषु नायकसहायरूपेण कञ्चूक्यादिनां दूत्यादिनां च नारीणाम् नामोल्लेखः प्राप्यते तथापि प्रसङ्गोऽयं प्रबन्धेऽस्मिन् मया विस्तृतिभियाँ उपेक्षित इति शिवम् ।

## तथ्यसूत्राणि

1. नाटकलक्षणरत्नकोश (चट्टोपाध्याय २०१७ पृ-३०)
2. SAHITYADARPANA (SASTRI 2018, P-97)
3. दशरूपक (वसु २०१८, पृ-१६२)
4. SAHITYADARPANA (SASTRI 2018, P-97)
5. श्रीश्री उज्ज्वलनीलमणिः (दासः२०१७, पृ-३,४,५)
6. SAHITYADARPANA (SASTRI 2018, P-97)
7. SAHITYADARPANA (SASTRI 2018, P-99)
8. SAHITYADARPANA (SASTRI 2018, P-102)
9. SAHITYADARPANA (SASTRI 2018, P-103)

10. नाटकलक्षणरत्नकोश (चट्टोपाध्याय  २०१७ पृ-३०)
11. श्रीभक्तिरसामृतसिन्धु (देवगोस्वामी १३९६वङ्गाब्द, पृ-११३)
12. श्रीभक्तिरसामृतसिन्धु (देवगोस्वामी १३९६वङ्गाब्द, पृ-११२)
13. श्रीभक्तिरसामृतसिन्धु (देवगोस्वामी १३९६वङ्गाब्द, पृ-११३)
14. श्रीभक्तिरसामृतसिन्धु (देवगोस्वामी १३९६वङ्गाब्द, पृ-१२५-१२६)
15. श्रीश्री उज्ज्वलनीलमणिः (दासः२०१७, पृ-१४)
16. श्रीश्री उज्ज्वलनीलमणिः (दासः२०१७, पृ-८)
17. श्रीश्री उज्ज्वलनीलमणिः (दासः२०१७, पृ-९)
18. श्रीश्री उज्ज्वलनीलमणिः (दासः२०१७, पृ-९)
19. श्रीश्री उज्ज्वलनीलमणिः (दासः२०१७, पृ-१२)
20. श्रीश्री उज्ज्वलनीलमणिः (दासः२०१७, पृ-१४)
21. श्रीश्री उज्ज्वलनीलमणिः (दासः२०१७, पृ-१४)

सहायकग्रन्थाः


1. धनञ्जय,२०१८, दशरूपक, सम्पा. अनिलचन्द्र वसु, कोलकाता: संस्कृत वुक डिपो।
2. रूपगोस्वामी,२०१७,श्रीश्रीउज्ज्वलनीलमणिः सम्पा. हरिदास-दासः, कोलकाता: संस्कृत वुक डिपो।
3. रूपगोस्वामी, १३९६(बङ्गाब्दः), श्रीभक्तिरसामृतसिन्धुः, सम्पा.- श्रीधरदेवगोस्वामी, कोलकाता: श्रीचेतन्य-सारस्वत-कृष्णानुशीलनसंघ
4. सागरनन्दी २०१७, नाचकलक्षणरत्नकोष, सम्पा.- सिद्धेश्वर-चट्टोपाध्याय, कोलकाता: संस्कृत-पुस्तक-भाण्डार
5. Viswanath, 2018, Sahityadarpana, Ed.- Acharya KrishnamohanSastri, Varanasi: Choukhambha Sanskrit Sansthan.


Received on: 20/03/2020 Accepted on:12/02/2021


RAMAKRISHNA SIKSHANAMANDIRA
MATH